॥ चतुर्थाध्यायस्य प्रथमः पादः ॥

ङ्याप्प्रातिपदिकात् ॥ १ ॥

अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्याम आ पञ्चमाध्यायपरिसमाप्तेर्ङ्याप्प्रातिपदिकादित्येवं तद् वेदितव्यम्। स्वादिषु कपूपर्यन्तेषु प्रकृतिरधिक्रियते। ङीब्ङीष्ङीनां सामान्येन ग्रहणं ङीति, टापूङापूचापामाबिति, प्रातिपदिकमुक्तम् 'अर्थवद्०' (१.२.४५) 'कृत्तद्धितसमासाश्च' (१.२.४६) इति। तेषां समाहारनिर्देशो ङ्याप्प्रातिपदिकादिति। यद्यपि च प्रत्ययपरत्वेन पारिशेष्यादियमेव प्रकृतिर्लभ्यते, तथापि वृद्धावृद्धावर्णस्वरद्ध्यज्-लक्षणप्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कर्तव्यम्। इतरथा हि समर्थविशेषण-मेतत् स्यात्। अथ ङ्याब्ग्रहणं किम्, न 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (परि० ७१) इत्येव सिद्धम् ? नैतदस्ति। स्वरूपविधिविषये परिभाषेयम्—प्रातिपदिकस्वरूपग्रहणे सति लिङ्गविशिष्टग्रहणं भवतीति। तथा च 'युवा खलतिपलितवलि-नजरतीभिः' (२.१.६७) इति ज्ञापकमस्यास्तादृशमेव। किं च, तदन्तात् तद्धितविधानार्थं ङ्याब्ग्रहणम्—कालितरा, हरिणितरा, खट्वातरा, मालातरेति। विप्रतिषेधाद्धि तद्धितबलीय-स्त्वं स्यात्॥

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्यो-स्सुप्॥ २ ॥

ङ्याप्प्रातिपदिकादित्यधिकृतम्। ङ्याप्प्रातिपदिकात् स्वादयः प्रत्यया भवन्ति। उकारादयोऽनुबन्धा यथायोगमुच्चारणविशेषणार्थाः। औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः। पकारः सुबिति प्रत्याहारार्थः। संख्या कर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहिताः, तेन सहास्यैकवाक्यता। ङ्यन्तात् तावत्—कुमारी। गौरी। शार्ङ्गरवी। ङीब्ङीष्ङीनां क्रमेणोदाहरणम्—कुमारी, कुमार्यौ, कुमार्यः। कुमारीम्, कुमार्यौ, कुमारीः। कुमार्या, कुमारीभ्याम्, कुमारीभिः। कुमार्यै, कुमारीभ्याम्, कुमारीभ्यः। कुमार्याः, कुमारीभ्याम्, कुमारीभ्यः। कुमार्याः, कुमार्योः, कुमारीणाम्। कुमार्याम्, कुमार्योः, कुमारीषु। एवं गौरी शार्ङ्गरवी चोदाहार्ये। आपः खल्वपि—खट्वा। बहुराजा। कारीषगन्ध्या। टाब्ङापूचापां क्रमेणोदाहरणम्—खट्वा, खट्वे, खट्वाः। खट्वाम्, खट्वे, खट्वाः। खट्वया, खट्वाभ्याम्, खट्वाभिः। खट्वायै, खट्वाभ्याम्, खट्वाभ्यः। खट्वायाः, खट्वाभ्याम्, खट्वाभ्यः। खट्वायाः, खट्वयोः, खट्वानाम्। खट्वायाम्, खट्वयोः, खट्वासु। एवं बहुराजाकारीषगन्ध्ये चोदाहार्ये। एवं प्रातिपदिकात्—दृषद्, दृषदौ, दृषदः। दृषदम्, दृषदौ, दृषदः। दृषदा, दृषद्भ्याम्, दृषद्भिः। दृषदे, दृषद्भ्याम्, दृषद्भ्यः। दृषदः, दृषद्भ्याम्, दृषद्भ्यः।

दृषदः, दृषदोः, दृषदाम्। दृषदि, दृषदोः, दृषत्सु॥

स्त्रियाम् ॥ ३ ॥

अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यामः स्त्रियामित्येवं तद् वेदितव्यम्। 'ङ्याप्प्राति- पदिकात्' (४.१.१) इति सर्वाधिकारेऽपि प्रातिपदिकमात्रमत्र प्रकरणे संबध्यते, ङ्यापोरनेनैव विधानात्। स्त्रियामित्युच्यते। केयं स्त्री नाम ? सामान्यविशेषाः स्त्रीत्वादयो गोत्वादय इव बहुप्रकारा व्यक्तयः। क्वचिदाश्रयविशेषाभावादुपदेशव्यङ्ग्या एव भवन्ति, यथा ब्राह्मणत्वादयः। स्त्रीत्वं च प्रत्ययार्थः प्रकृत्यर्थविशेषणं चेत्युभयथापि युज्यते—स्त्रियामभिधेयायां स्त्रियां वा यत् प्रातिपदिकं वर्तत इति। वक्ष्यति—'अजाद्यतष्टाप्' (४.१.४)—अजा। देवदत्ता। स्त्रियामिति किम् ? अजः। देवदत्तः॥

अजाद्यतष्टाप् ॥ ४ ॥

अजादिभ्यः प्रातिपदिकेभ्योऽकारान्ताच्च प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति। पकारः सामान्यग्रहणार्थः। टकारः सामान्यग्रहणाविघातार्थः। अजा। एडका। कोकिला। चटका। अश्वा। खट्वा। देवदत्ता। तपरकरणं तत्कालार्थम्। शुभंयाः, कीलालपाः ब्राह्मणी। 'हल्ङ्याब्भ्यः०' (६.१.६८) इति सुलोपः स्यात्। अजादिग्रहणं तु क्वचिद् जातिलक्षणे ङीषि प्राप्ते (४.१.६३), क्वचित् तु पुंयोगलक्षणे (४.१.४८), क्वचित् तु पुष्पफलोत्तरपदलक्षणे (४.१.६४), क्वचित् तु वयोलक्षणे (४.१.२०) ङीपि, क्वचित् टिल्लक्षणे (४.१.१५)। हलन्तानां त्वप्राप्त एव कस्मिंश्चिदाब् विधीयते। शूद्रा चामहत्पूर्वा जातिरिति पठ्यते। तस्यायमर्थः। शूद्रशब्दष्टापमुत्पादयति जातिश्चेद् भवति। शूद्रा। पुंयोगे ङीषैव भवितव्यम्। शूद्रस्य भार्या शूद्री। महत्पूर्वस्य प्रतिषेधः। महाशूद्री। महाशूद्रशब्दो ह्याभीरजातिवचनः, तत्र तदन्तविधिना टाप् प्राप्तः प्रतिषिध्यते। 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' (परि० ३१) इति कथं तदन्तविधिः ? एतदेव ज्ञापकम्—भवत्यस्मिन् प्रकरणे तदन्तविधिरिति। तेनातिधीवरी, अतिपीवरी, अतिभवती, अतिमहती इति भवति॥ अजा, एडका, चटका, अश्वा, मूषिकेति जातिः। बाला, होढा, पाका, वत्सा, मन्दा, विलातेति वयः। पूर्वापहाणा। अपरापहाणा। टित्, निपातनाण् णत्वम्। संभस्त्राजिनशणपिण्डेभ्यः फलात् (ग० सू० ३५)। संफला। भस्त्रफला। अजिनफला। शणफला। पिण्डफला। त्रिफला द्विगौ (ग० सू० ३६)। बहुव्रीहौ त्रिफली संहतिः। सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात् (ग० सू० ३७)। सत्पुष्पा। प्राक्पुष्पा। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा। 'पाककर्ण०' (४.१.६४) इति ङीषोऽपवादः। शूद्रा चामहत्पूर्वा जातिः (ग० सू० ३८)। क्रुञ्चा। उष्णिहा। देवविशा हलन्ताः। ज्येष्ठा। कनिष्ठा। मध्यमा पुंयोगः। कोकिला जातिः। मूलान्नञः

(ग० सू० ३६)। अमूला॥

ऋन्नेभ्यो ङीप् ॥ ५ ॥

ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। ङकारः सामान्यग्रहणार्थः। कर्त्री। हर्त्री। दण्डिनी। छत्रिणी॥

उगितश्च ॥ ६ ॥

उग् इद् यत्र संभवति यथाकथंचित् तदुगिच्छब्दरूपम्, तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति। भवती। अतिभवती। पचन्ती। यजन्ती॥ धातोरुगितः प्रतिषेधो वक्तव्यः॥ उखास्रत्। पर्णध्वत् ब्राह्मणी ॥ अञ्चतेश्चोपसंख्यानम्॥ प्राची। प्रतीची। उदीची॥

वनो र च ॥ ७ ॥

वन्नन्तात् प्रातिपदिकाद् स्त्रियां ङीप् प्रत्ययो भवति, रेफश्चान्तादेशः। धीवरी। पीवरी। शर्वरी। परलोकदृश्वरी। 'ऋन्नेभ्यः०' (४.१.५) इत्येव ङीपि सिद्धे तत्सन्नियोगेन रेफविधानार्थं वचनम् ॥ वनो न हशः॥ प्राप्तौ ङीब्रावुभावपि प्रतिषिध्येते। सहयुध्वा ब्राह्मणी॥

पादोऽन्यतरस्याम् ॥ ८ ॥

पाद इति कृतसमासान्तः पादशब्दो निर्दिश्यते। पादन्तात् प्रातिपदिकादन्यतरस्यां स्त्रियां ङीप् प्रत्ययो भवति। द्विपात्। द्विपदी। त्रिपात्। त्रिपदी। चतुष्पाद्। चतुष्पदी॥

टाबृचि ॥ ९ ॥

पाद इत्येव। ऋचीत्यभिधेयनिर्देशः। ऋचि वाच्यायां पादन्तात् प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति। ङीपोऽपवादः। द्विपदा ऋक्। त्रिपदा ऋक्। चतुष्पदा ऋक्। ऋचीति किम् ? द्विपदी देवदत्ता॥

न षट्स्वस्रादिभ्यः ॥ १०॥

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यः स्त्रीप्रत्ययो न भवति। यो यतः प्राप्नोति स सर्वः प्रतिषिध्यते। पञ्च ब्राह्मण्यः। सप्त। नव। दश। स्वस्रादिभ्यः— स्वसा। दुहिता। ननान्दा। याता। माता। तिस्रः। चतस्रः।

---

१ - 'पकारः सामान्यग्रहणाविघातार्थः' इत्यधिकं बाल०।

षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात्।
प्रत्याहाराच्चापा सिद्धं दोषस्त्विक्त्वे तस्मान्नोभौ॥

मनः ॥ ११ ॥

मन्नन्तात् प्रातिपदिकात् ङीप् प्रत्ययो न भवति। 'ऋन्नेभ्यो ङीप्' (४.१.५) इति ङीप् प्राप्तो मन इति सूत्रेण प्रतिषिध्यते। दामा, दामानौ, दामानः। पामा, पामानौ, पामानः। 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (परि० १६)। सीमा, सीमानौ, सीमानः। अतिमहिमा, अतिमहिमानौ, अतिमहिमानः॥

अनो बहुव्रीहेः ॥ १२ ॥

अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीप् प्रत्ययो न भवति। अनुपधालोपी बहुव्रीहिरिहोदाहरणम्। उपधालोपिनो हि विकल्पं वक्ष्यति। सुपर्वा, सुपर्वाणौ, सुपर्वाणः। सुचर्मा, सुचर्माणौ, सुचर्माणः। बहुव्रीहेरिति किम् ? अतिक्रान्ता राजानम् अतिराज्ञी[1]॥

डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥

डाप् प्रत्ययो भवत्युभाभ्यां मन्नन्तात् प्रातिपदिकादनन्ताच्च बहुव्रीहेरन्यतरस्याम्। पामा, पामे, पामाः। सीमा, सीमे, सीमाः। न च भवति—पामानः। सीमानः। बहुव्रीहौ—बहुराजा, बहुराजे, बहुराजाः। बहुतक्षा, बहुतक्षे, बहुतक्षाः। न च भवति—बहुराजानः। बहुतक्षाणः। अन्यतरस्यांग्रहणं किमर्थम् ? बहुव्रीहौ 'वनो र च' (४.१.७) इत्यस्यापि विकल्पो यथा स्यात्। बहुधीवा, बहुधीवरी। बहुपीवा, बहुपीवरी॥

अनुपसर्जनात् ॥ १४ ॥

अधिकारोऽयम्। उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोति। यदित ऊर्ध्वमनुक्रमिष्यामोऽनुपसर्जनादित्येवं तद् वेदितव्यम्। वक्ष्यति—'टिड्ढाणञ्०' (४.१.१५) इति ङीप्। कुरुचरी। मद्रचरी। अनुपसर्जनादिति किम् ? बहुकुरुचरा, बहुमद्रचरा मधुरा। 'जातेः०' (४.१.६३) इति ङीष्। कुक्कुटी। शूकरी। अनुपसर्जनादिति किम् ? बहुकुक्कुटा, बहुशूकरा मधुरा। कथं पुनरुपसर्जनात् प्रत्ययप्रसङ्गः ? तदन्तविधिना। ज्ञापितं (४.१.४) चैतद्—अस्त्यत्र प्रकरणे तदन्तविधिरिति। तथा च प्रधानेन तदन्तविधिर्भवति। कुम्भकारी। नगरकारी। न चाणिति कृद्ग्रहणम्, तद्धितोऽप्यणस्ति॥

---

१ - ' अतिराजी ' इति मुद्रितेषु। टजभावः, समासान्तविधेरनित्यत्वादिति हरदत्तः।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ॥१५॥

अत इति सर्वत्रानुवर्तते। तत् सति संभवे विशेषणं भवति। टिदादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। टापोऽपवादः। टितस्तावत्—कुरुचरी। मद्रचरी। इह कस्माद् न भवति—पचमाना यजमाना ? द्व्यनुबन्धकत्वाल् लटः। ल्युडादिषु कथम् ? टित्करणसामर्थ्यात्। इतरत्र तु टेरेत्वं फलम्। पठिता विद्येति ? आगमटित्त्वमनिमित्तम्, ट्युट्युलौ तुट् च (४.३.२३) इति लिङ्गात्। ढ—सौपर्णेयी। वैनतेयी। निरनुबन्धको ढशब्दः स्त्रियां नास्तीति निरनुबन्धकपरिभाषा (परि० ८१) न प्रवर्तते। अण्—कुम्भकारी। नगरकारी। औपगवी। 'णेऽपि क्वचिदणकृतं कार्यं भवति' (परि० ८७)। चौरी, तापसी। दाण्डा, मौष्टेत्यत्र न भवति। अञ्—औत्सी। औदपानी। 'शार्ङ्गरवाद्यञः०' (४.१.७३) इति पुनरञो ग्रहणं जातिलक्षणं ङीषं बाधितुम्। द्वयसच्—ऊरुद्वयसी। जानुद्वयसी। दघ्नच्—ऊरुदघ्नी। जानुदघ्नी। मात्रच्—ऊरुमात्री। जानुमात्री। तयप्—पञ्चतयी। दशतयी। ठक्—आक्षिकी। शालाकिकी। ठञ्—लावणिकी। ठक्ठञोर्भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम्। कञ्—यादृशी। तादृशी। क्वरप्—इत्वरी। नश्वरी। ख्युन्—आढ्यंकरणी। सुभगंकरणी ॥ नञ्स्नञ्त्रीककूतरुणतलुनानामुपसंख्यानम्॥ स्त्रैणी। पौंस्नी। शाक्तीकी। याष्टीकी। तरुणी। तलुनी॥

यञश्च ॥ १६ ॥

ङीबित्येव। यञन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति। गार्गी। वात्सी ॥ आपत्यग्रहणं कर्तव्यम्॥ इह मा भूत्—'द्वीपादनुसमुद्रं यञ्' (४.३.१०)—द्वैप्या। योगविभाग उत्तरार्थः॥

प्राचां ष्फस्तद्धितः॥ १७ ॥

यञ इत्येव। प्राचामाचार्याणां मतेन यञन्तात् स्त्रियां ष्फः प्रत्ययो भवति, स च तद्धितसंज्ञः। षकारो ङीषर्थः। प्रत्ययद्वयेनेह स्त्रीत्वं व्यज्यते। तद्धितग्रहणं प्रातिपदिकसंज्ञार्थम्। गार्ग्यायणी। वात्स्यायनी। अन्येषाम्—गार्गी। वात्सी। सर्वत्रग्रहणमुत्तरसूत्रादिहापकृष्यते, बाधकबाधनार्थम्। 'आवट्यात्०' (४.१.७५) चापं वक्ष्यति, तमपि बाधित्वा प्राचां ष्फ एव यथा स्यात्। आवट्यायनी॥

सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥

यञ इत्येव। पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम्। सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यो यञन्तेभ्यः स्त्रियां ष्फः प्रत्ययो भवति। कतशब्दः स्वतन्त्रं यत् प्रातिपदिकं

तदवधित्वेन परिगृह्यते कपिशब्दात् परः कपि कतेति, न प्रातिपदिकावयवः कुरुकतेति। लौहित्यायनी। शांसित्यायनी। बाभ्रव्यायणी।

कण्वात् तु शकलः पूर्वः कतादुत्तर इष्यते।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्॥

प्रातिपदिकेष्वन्यथा पाठः, स एवं व्यवस्थापयितव्य इति मन्यते। कतन्तेभ्य इति बहुव्रीहितत्पुरुषयोरेकशेषः, तथा 'कण्वादिभ्यो गोत्रे' (४.२.१११) इति। तत्र तत्पुरुष-वृत्त्या संगृहीतो मध्यपाती शकलशब्दो यञन्तः प्रत्ययद्वयमपि प्रतिपद्यते। शाकल्यायनी। शाकल्यस्येमे छात्राः शाकलाः॥

कौरव्यमाण्डूकाभ्यां च ॥ १६ ॥

कौरव्य माण्डूक इत्येताभ्यां स्त्रियां ष्फः प्रत्ययो भवति। कुर्वादिभ्यो ण्ये (४.१.१५१) कृते 'ढक् च मण्डूकात्' (४.१.११६) इत्यणि च। यथाक्रमं टाबूङीपोरपवादः। कौरव्यायणी। माण्डूकायनी। कथं कौरवी सेना ? 'तस्येदं'-(४.३.१२०)-विवक्षायामणि कृते भविष्यति ॥ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम्॥ आसुरायणी। शैषिकेष्वर्थेषु 'इञश्च' (४.२.११२) इत्यणि प्राप्ते छप्रत्यय इष्यते। आसुरीयः कल्पः॥

वयसि प्रथमे ॥ २० ॥

कालकृतशरीरावस्था यौवनादिर्वयः। प्रथमे वयसि यत् प्रातिपदिकं श्रुत्या वर्तते, ततः स्त्रियां ङीप् प्रत्ययो भवति। कुमारी। किशोरी। बर्करी। प्रथम इति किम् ? स्थविरा। वृद्धा। अत इत्येव - शिशुः ॥ वयस्यचरम इति वक्तव्यम्॥ वधूटी। चिरण्टी। द्वितीयवयोवचनावेतौ। प्राप्तयौवना स्त्र्यभिधीयते। कथं कन्या ? 'कन्यायाः कनीन च' (४.१.११६) इति ज्ञापकात्। उत्तानशया लोहितपादिकेति ? नैता वयःश्रुतयः॥

द्विगोः ॥ २१ ॥

द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति। पञ्चपूली। दशपूली। कथं त्रिफला ? अजादिषु दृश्यते॥

अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥ २२ ॥

पूर्वेण ङीप् प्राप्तः प्रतिषिध्यते। अपरिमाणान्ताद् द्विगोर्बिस्ताचितकम्बल्यान्तात् च तद्धितलुकि सति ङीप् प्रत्ययो न भवति। बिस्तादीनां परिमाणार्थं ग्रहणम्। सर्वतो

मानं परिमाणम्। अपरिमाणान्तात् तावत्—पञ्चभिरश्वैः क्रीता पञ्चाश्वा। दशाश्वा। कालः संख्या च न परिमाणम्। द्विवर्षा। त्रिवर्षा। द्वाभ्यां शताभ्यां क्रीता द्विशता। त्रिशता। बिस्तादिभ्यः—द्विबिस्ता। त्रिबिस्ता। द्व्याचिता। त्र्याचिता। द्विकम्बल्या। त्रिकम्बल्या। अपरिमाणेति किम् ? द्व्याढकी। त्र्याढकी। तद्धितलुकीति किम् ? समाहारे—पञ्चाश्वी। दशाश्वी॥

काण्डान्तात् क्षेत्रे ॥ २३ ॥

काण्डशब्दान्ताद् द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये ङीप् प्रत्ययो न भवति। द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः। 'प्रमाणे द्वयसज्०' (५.२.३७) इति विहितस्य तद्धितस्य 'प्रमाणे लो द्विगोर्नित्यम्' (वा० ५.२.३७) इति लुकि कृते, द्विकाण्डा क्षेत्रभक्तिः। त्रिकाण्डा क्षेत्रभक्तिः। काण्डशब्दस्यापरिमाणवाचित्वात् पूर्वेणैव प्रतिषेधे सिद्धे क्षेत्रे नियमार्थं वचनम्। इह मा भूत्—द्विकाण्डी रज्जुस्त्रिकाण्डी रज्जुरिति। प्रमाणविशेषः काण्डम्॥

पुरुषात् प्रमाणेऽन्यतरस्याम् ॥ २४ ॥

द्विगोस्तद्धितलुकीत्येव। प्रमाणे यः पुरुषशब्दः, तदन्ताद् द्विगोस्तद्धितलुकि सत्यन्यतरस्यां न ङीप् प्रत्ययो भवति। द्वौ पुरुषौ प्रमाणमस्याः परिखायाः द्विपुरुषा, द्विपुरुषी। त्रिपुरुषा, त्रिपुरुषी। अपरिमाणान्तत्वाद् नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं वचनम्। प्रमाण इति किम् ? द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा। त्रिपुरुषा। तद्धितलुकीत्येव—समाहारे—द्विपुरुषी, त्रिपुरुषी॥

बहुव्रीहेरूधसो ङीष् ॥ २५ ॥

ऊधस्शब्दान्ताद् बहुव्रीहेः स्त्रियां ङीष् प्रत्ययो भवति। 'ऊधसोऽनङ्' (५.४.१३१) इति समासान्ते कृते 'अनो बहुव्रीहेः' (४.१.१२) इति डापूप्रतिषेधयोः प्राप्तयोरिदमुच्यते। घटोध्नी। कुण्डोध्नी। बहुव्रीहेरिति किम् ? प्राप्ता ऊधः प्राप्तोधाः। 'अन उपधालोपिनः०' (४.१.२८) इत्यस्यापि ङीपोऽयमुत्तरत्रानुवृत्तेर्बाधक इष्यते। समासान्तश्च स्त्रियामेव। इह न भवति—महोधाः पर्जन्य इति॥

संख्याव्ययादेर्ङीप् ॥ २६ ॥

पूर्वेण ङीषि प्राप्ते ङीब् विधीयते। संख्यादेरव्ययादेश्च बहुव्रीहेरूधःशब्दान्ताद् ङीप् प्रत्ययो भवति। संख्यादेस्तावत्—द्व्यूध्नी। त्र्यूध्नी। अव्ययादेः—अत्यूध्नी। निरूध्नी। आदिग्रहणं किम् ? द्विविधोध्नी। त्रिविधोध्नीत्यत्रापि यथा स्यात्॥

दामहायनान्ताच्च ॥ २७ ॥

ऊधस इति निवृत्तम्। संख्याग्रहणमनुवर्तते, नाव्ययग्रहणम्। संख्यादेर्बहुव्रीहेर्दाम-शब्दान्ताद् हायनशब्दान्तात् च स्त्रियां ङीप् प्रत्ययो भवति। दामान्तात् डापूप्रतिषेधविकल्पेषु प्राप्तेषु नित्यार्थं वचनम्। द्विदाम्नी। त्रिदाम्नी। हायनान्तात् टापि प्राप्ते, द्विहायनी। त्रिहायणी। चतुर्हायणी ॥ हायनो वयसि स्मृतः॥ तेनेह न भवति—द्विहायना शाला। त्रिहायना। चतुर्हायना। 'णत्वमपि त्रिचतुर्भ्यां हायनस्येति वयस्येव स्मर्यते' (महाभाष्य २.२१३)॥

अन उपधालोपिनोऽन्यतरस्याम् ॥ २८ ॥

बहुव्रीहेरित्येव। अन्नन्तो यो बहुव्रीहिरुपधालोपी, तस्मादन्यतरस्यां ङीप् प्रत्ययो भवति। ङीपा मुक्ते डापूप्रतिषेधौ भवतः। किमर्थं तर्हीदमुच्यते, ननु सिद्धा एव डापूप्रतिषेध- ङीपः? अनुपधालोपिनो ङीपूप्रतिषेधार्थं वचनम्। बहुराजा। बहुराज्ञी। बहुराजे। बहुतक्षा। बहुतक्ष्णी। बहुतक्षे। अन इति किम् ? बहुमत्स्या। उपधालोपिन इति किम्? सुपर्वा, सुपर्वे, सुपर्वाः। सुपर्वाणौ, सुपर्वाणः। डापूप्रतिषेधावेवात्र भवतः॥

नित्यं संज्ञाछन्दसोः ॥ २९ ॥

अन्नन्ताद् बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङीप् प्रत्ययो भवति। विकल्पस्यापवादः। सुराज्ञी। अतिराज्ञी नाम ग्रामः। छन्दसि—गौः पञ्चदाम्नी। एकदाम्नी। द्विदाम्नी। एकमूर्ध्नी (शौ० सं० ८.६.१५)। समानमूर्ध्नी (तै० सं० ४.३.११.४)॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३०॥

संज्ञाछन्दसोरित्येव। केवलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां छन्दसि विषये स्त्रियां ङीप् प्रत्ययो भवति। केवली (पै० सं० १६.२०.१)। केवलेति भाषायाम्। मामकी (पै० सं० ६.६.८)। मामिकेति भाषायाम्। मित्रावरुणयोर्भागधेयीः स्थ (तै० सं० १.३.१२.१)। भागधेयेति भाषायाम्। सा पापी (मै० सं० ४.२.१४)। पापेति भाषायाम्। उताऽपरीभ्यो मघवा विजिग्ये (ऋ० १.३२.१३)। अपरेति भाषायाम्। समानी (ऋ० १०.१६१. ३) प्रवाणी। समानेति भाषायाम्। आर्यकृती (मै० सं० १.८.३)। आर्यकृतेति भाषायाम्। सुमङ्गली (ऋ० १०.८५.३३)। सुमङ्गलेति भाषायाम्। भेषजी (तै० सं० ४.५.१०.१)। भेषजेति भाषायाम्॥

रात्रेश्चाजसौ ॥ ३१ ॥

जस्विषयादन्यत्र संज्ञायां छन्दसि च रात्रिशब्दाद् ङीप् प्रत्ययो भवति। या रात्री सृष्टा। रात्रीभिः (ऋ० १०.१०.६)। अजसाविति किम् ? यास्ता रात्रयः ॥ अजसादिष्विति वक्तव्यम्॥ रात्रिं सहोषित्वा। कथं तिमिरपटलैरवगुण्ठिताश्च रात्र्यः? ङीषयं बह्वादिलक्षणः। तत्र हि पठ्यते 'कृदिकारादक्तिनः' (ग० सू० ४६) 'सर्वतोऽक्तिन्नर्थादित्येके' (ग० सू० ५०) इति॥

अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥

प्रकृतिर्निपात्यते, नुगागमस्तु विधीयते। अन्तर्वत्पतिवतोर्नुग् भवति ङीप् च प्रत्ययः, स तु नकारान्तत्वादेव सिद्धः। निपातनसामर्थ्यात् च विशेषे वृत्तिर्भवति। अन्तर्वत् पतिवदिति गर्भभर्तृसंयोगे। इह न भवति—अन्तरस्यां शालायां विद्यते, पतिमती पृथिवी। अन्तर्वदिति मतुब् निपात्यते, वत्वं सिद्धम्। पतिवदिति वत्वं निपात्यते, मतुप् सिद्धः। अन्तर्वत्नी गर्भिणी। पतिवत्नी जीवपतिः।

अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात्।
गर्भिण्यां जीवपत्यां च वा छन्दसि तु नुग्विधिः॥

सान्तर्व[1]त्नी (मै० सं० ४.२.६) देवानुपैत्। सान्तर्वती देवान् (काठ० सं० ८. १०) उपैत्। पतिवत्नी तरुणवत्सा। पतिवती तरुणवत्सा॥

पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥

पतिशब्दस्य नकारादेशः स्त्रियां विधीयते, ङीप् प्रत्ययस्तु नकारान्तत्वादेव सिद्धः, यज्ञसंयोगे। यज्ञेन संयोगो यज्ञसंयोगः। तत्साधनत्वात् फलग्रहीतृत्वाद् वा यजमानस्य पत्नी। पत्नि वाचं यच्छ। यज्ञसंयोग इति किम् ? ग्रामस्य पतिरियं ब्राह्मणी। कथं वृषलस्य पत्नी ? उपमानाद् भविष्यति॥

विभाषा सपूर्वस्य ॥ ३४ ॥

पत्युर्न इति वर्तते। पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रियां विभाषा नकारादेशो भवति, ङीप् तु लभ्यत एव। वृद्धपत्नी, वृद्धपतिः। स्थूलपत्नी, स्थूलपतिः। अप्राप्तविभाषेयमयज्ञसंयोगत्वात्। सपूर्वस्येति किम् ? पतिरियं ब्राह्मणी ग्रामस्य॥

---

१ - 'जीवत्प०' इति बाल०।

नित्यं सपत्न्यादिषु ॥ ३५ ॥

सपत्न्यादिषु नित्यं पत्युर्नकारादेशो भवति, ङीप् तु लभ्यत एव। पूर्वेण विकल्पे प्राप्ते वचनम्। नित्यग्रहणं विस्पष्टार्थम्। समानः पतिरस्याः सपत्नी। एकपत्नी। समानादिष्विति वक्तव्ये समानस्य सभावार्थं वचनम्॥ समान। एक। वीर। पिण्ड। भ्रातृ। पुत्र। दासाच्छन्दसि (ग० सू० ४०)॥

पूतक्रतोरै च ॥ ३६ ॥

पूतक्रतुशब्दस्य स्त्रियामैकारश्चान्तादेशो भवति, ङीप् प्रत्ययः। पूतक्रतोः स्त्री पूतक्रतायी। त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः। यया हि पूताः क्रतवः पूतक्रतुः सा भवति॥

वृषाकप्यग्निकुसितकुसीदानामुदात्तः ॥ ३७ ॥

वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियाम् , ङीप् च प्रत्ययः। वृषाकपिशब्दो मध्योदात्त उदात्तत्वं प्रयोजयति। अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धम्। वृषाकपेः स्त्री वृषाकपायीं। अग्नायीं। कुसितायीं। कुसीदायीं[1]। पुंयोग इत्येव—वृषाकपिः स्त्री॥

मनोरौ वा ॥ ३८ ॥

ऐ उदात्त इति वर्तते। मनुशब्दात् स्त्रियां ङीप् प्रत्ययो भवति, औकारश्चान्तादेशः, ऐकारश्चोदात्तः। वाग्रहणेन द्वावपि विकल्प्येते। तेन त्रैरूप्यं भवति। मनोः स्त्री मनायी (मै० सं० १.८.६)। मनावीं (काठ० सं० ३०.१)। मनुः। मनुशब्द आद्युदात्तः॥

वर्णादनुदात्तात्तोपधात्तो नः ॥ ३९ ॥

वेति वर्तते। वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् तकारोपधाद् वा ङीप् प्रत्ययो भवति, तकारस्य नकारादेशो भवति। एनीं, एतां। श्येनीं, श्येतां। हरिणी, हरिता। सर्व एत आद्युदात्ताः, 'वर्णानां तणतिनितान्तानाम्' (फि० सू० २.१०) इति वचनात्। वर्णादिति किम् ? प्रकृता। प्ररुता। गतिस्वरेणाद्युदात्तः। अनुदात्तादिति किम् ? श्वेता। घृतादित्वाद् (फि० सू० १.२१) अन्तोदात्तः। तोपधादिति किम् ? अन्यतो ङीषं वक्ष्यति। अत इत्येव—शितिब्राह्मणी ॥ पिशङ्गादुपसंख्यानम् ॥ पिशङ्गी ॥ असितपलितयोः प्रतिषेधः॥ असिता। पलिता ॥ छन्दसि क्नमित्येके॥

---

१ - 'कुसितायीं' इति है०। सूत्रे खल्वपि तथैव।

असिंक्नी (शौ० सं० १.२३.१)। पलिंक्नी (ऋ० ५.२. ४)। भाषायामपीष्यते। गतो गणस्तूर्णमसिक्निकानाम्॥

अन्यतो ङीष् ॥ ४० ॥

वेति निवृत्तम्। वर्णादनुदात्तादिति वर्तते, तोपधापेक्षमन्यत्वम्। वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् स्त्रियां ङीष् प्रत्ययो भवति। स्वरे विशेषः। स॒ार॒ङ्गी। क॒ल्माषी। श॒ब॒ली। वर्णादित्येव—खट्वा। अनुदात्तादित्येव—कृष्णा। क॒पि॒ला॥

षिद्गौरादिभ्यश्च ॥ ४१ ॥

ङीषनुवर्तते। षिद्भ्यः प्रातिपदिकेभ्यो गौरादिभ्यश्च स्त्रियां ङीष् प्रत्ययो भवति। 'शिल्पिनि ष्वुन्' (३.१.१४५)—नर्तकी। खनकी। रजकी। गौरादिभ्यः—गौरी। मत्सी॥ गौर। मत्स्य। मनुष्य। शृङ्ग। हय। गवय। मुकय। ऋष्य। पुट। द्रुण। द्रोण। हरिण। कण। पटर। उकण। आमलक। कुवल। बदर। बिम्ब। तर्कार। शर्कार। पुष्कर। शिखण्ड। सुषम। सलन्द। गडुज। आनन्द। सृपाट। सृगेठ। आढक। शष्कुल। सूर्म। सुब। सूर्य। पूष। मूष। घातक। सकलूक। सल्लक। मालक। मालत। साल्वक। वेतस। अतस। पृस। मह। मठ। छेद। श्वन्। तक्षन्। अनडुही। अनड्वाही। एषणः करणे (ग० सू० ४१)। देह। काकादन। गवादन। तेजन। रजन। लवण। पान। मेध। गौतम। आयस्थूण। भौरि। भौलिकि। भौलिङ्गि। औद्गाहमानि। आलिङ्गि। आपिच्छिक। आरट। टोट। नट। नाट। मलाट। शातन। पातन। सवन। आस्तरण। अधिकरण। एत। अधिकार। आग्रहायणी। प्रत्यवरोहिणी। सेवन। सुमङ्गलात् संज्ञायाम् (ग० सू० ४२)। सुन्दर। मण्डल। पिण्ड। विटक। कुर्द। गूर्द। पट। पाण्ट। लोफाण्ट। कन्दर। कन्दल। तरुण। तलुन। बृहत्। महत्। सौधर्म। रोहिणी नक्षत्रे (ग० सू० ४३)। रेवती नक्षत्रे (ग० सू० ४४)। विकल। निष्फल। पुष्कल। कटाच्छ्रोणिवचने (ग० सू० ४५)। पिप्पल्यादयश्च (ग० सू० ४६)। पिप्पली। हरीतकी। कोशातकी। शमी। करीरी। पृथिवी। क्रोष्ट्री। मातामह। पितामह। 'मातामहपितामहयोर्मातरि षिच् च' (महाभाष्य वा० ४.२.३६) इति षित्त्वादेव सिद्धे ज्ञापनार्थं वचनम्—अनित्यः षिल्लक्षणो ङीषिति। तेन दंष्ट्रेत्युपपन्नं भवति॥

जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ४२॥

जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्य एकादशसु वृत्त्यादिष्वर्थेषु यथासंख्यं ङीष् प्रत्ययो भवति। जानपदी भवति वृत्तिश्चेत्। जानपदी अन्या। स्वरे विशेषः। उत्सादिपाठादञि कृते ङीप्, आद्युदात्तत्वं भवति। कुण्डी भवति, अमत्रं चेत्। कुण्डान्या। गोणी भवति, आवपनं चेत्। गोणान्या। स्थली भवति, अकृत्रिमा चेत्। स्थलान्या। भाजी भवति, श्राणा चेत्। पक्वेत्यर्थः। भाजान्या। नागी भवति, स्थौल्यं चेत्। नागान्या। नागशब्दो गुणवचनः स्थौल्ये ङीषमुत्पादयति, अन्यत्र गुण एव टापम्। जातिवचनात् तु जातिलक्षणो ङीषेव भवति। नागी। काली भवति, वर्णश्चेत्। कालान्या। नीली भवति, अनाच्छादनं चेत्। नीलान्या। न च सर्वस्मिन्नाच्छादन इष्यते। किं तर्हि? नीलादोषधौ, प्राणिनि च। नीली ओषधिः। नीली गौः। नीली वडवा। संज्ञायां वा। नीली, नीला। कुशी भवति, अयोविकारश्चेत्। कुशान्या। कामुकी भवति, मैथुनेच्छा चेत्। कामुकान्या। मैथुनेच्छावती भण्यते, नेच्छामात्रम्। कबरी भवति, केशवेशश्चेत्। कबरान्या॥

शोणात् प्राचाम् ॥ ४३ ॥

शोणशब्दात् प्राचामाचार्याणां मतेन स्त्रियां ङीष् प्रत्ययो भवति। शोणी, शोणा वडवा॥

वोतो गुणवचनात् ॥ ४४ ॥

गुणमुक्तवान् गुणवचनः। गुणवचनात् प्रातिपदिकाद् उकारान्तात् स्त्रियां वा ङीष् प्रत्ययो भवति। पट्वी, पटुः। मृद्वी, मृदुः। उत इति किम् ? शुचिरियं ब्राह्मणी। गुणवचनादिति किम् ? आखुः ॥ वसुशब्दाद् गुणवचनाद् ङीबाद्युदात्तार्थम्॥ वस्वीं ॥ खरुसंयोगोपधात् प्रतिषेधो वक्तव्यः॥ खरुरियं ब्राह्मणी। पाण्डुरियं ब्राह्मणी।

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥

बह्वादिभ्यश्च ॥ ४५ ॥

बहु इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्त्रियां वा ङीष् प्रत्ययो भवति। बह्वी, बहुः॥ बहु। पद्धति। अङ्कति। अञ्चति। अंहति। वंहति। शकटि। शक्तिः शस्त्रे (ग० सू० ४७)। शारि। वारि। गति। अहि। कपि। मुनि। यष्टि। इतः प्राण्यङ्गात् (ग० सू० ४८)। कृदिकारादक्तिनः (ग० सू० ४९)। सर्वतोऽक्तिन्नर्थादित्येके (ग० सू० ५०)। चण्ड। अराल। कमल। कृपाण। विकट। विशाल। विशङ्कट। भरुज।

ध्वज। चन्द्रभागाद् नद्याम् (ग० सू० ५१)। कल्याण। उदार। पुराण। अहन्। बहुशब्दो गुणवचन एव। तस्येह पाठ उत्तरार्थः॥

नित्यं छन्दसि ॥ ४६ ॥

बह्वादिभ्यश्छन्दसि विषये नित्यं स्त्रियां ङीष् प्रत्ययो भवति। बह्वीषु हित्वा प्रपिबन्। बह्वी नाम ओषधी भवति। नित्यग्रहणमुत्तरार्थम्॥

भुवश्च ॥ ४७ ॥

छन्दसि विषये स्त्रियां भुवो नित्यं ङीष् प्रत्ययो भवति। वि॒भ्वी (ऋ०५.३८.१) च। प्र॑भ्वी (ऋ० १.१८८.५) च। संभ्वी च। इह कस्माद् न भवति—स्वयम्भूः ? उत इति तपरकरणमनुवर्तते। ह्रस्वादेवेयं पञ्चमी। भुव इति सौत्रो निर्देशः॥

पुंयोगादाख्यायाम् ॥ ४८ ॥

पुंसा योगः पुंयोगः। पुंयोगात् हेतोर्यत् प्रातिपदिकं स्त्रियां वर्तते पुंस आख्याभूतम्, तस्माद् ङीष् प्रत्ययो भवति। गणकस्य स्त्री गणकी। महामात्री। प्रष्ठी। प्रचरी। पुंसि शब्दप्रवृत्तिनिमित्तस्य संभवात् पुंशब्दा एते, तद्योगात् स्त्रियां वर्तन्ते। पुंयोगादिति किम्? देवदत्ता। यज्ञदत्ता। आख्याग्रहणं किम् ? परिसृष्टा। प्रजाता। पुंयोगादेते शब्दाः स्त्रियां वर्तन्ते, न तु पुमांसमाचक्षते ॥ गोपालिकादीनां प्रतिषेधः॥ गोपालकस्य स्त्री गोपालिका ॥ सूर्याद् देवतायां चाब् वक्तव्यः॥ सूर्यस्य स्त्री देवता सूर्या। देवतायामिति किम् ? सूरी॥

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्॥ ४९॥

इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति, आनुक् चागमः। येषामत्र पुंयोग एवेष्यते, तेषामानुगागममात्रं विधीयते। प्रत्ययस्तु पूर्वेणैव सिद्धः। अन्येषां तूभयं विधीयते। इन्द्राणी। वरुणानी। भवानी। शर्वाणी। रुद्राणी। मृडानी ॥ हिमारण्ययोर्महत्त्वे॥ महद्धिमं हिमानी। महदरण्यमरण्यानी ॥ यवाद् दोषे॥ दुष्टो यवो यवानी ॥ यवनाल्लिप्याम्॥ यवनानी लिपिः ॥ उपाध्यायमातुलाभ्यां वा॥ उपाध्यायी, उपाध्यायानी। मातुली, मातुलानी ॥ आचार्यादणत्वं च॥ आचार्यानी।[1] ॥ अर्यक्षत्रियाभ्यां वा॥ अर्याणी, अर्या। क्षत्रियाणी, क्षत्रिया। विना पुंयोगेन स्वार्थ एवायं विधिः। पुंयोगे तु ङीषैव भवितव्यम्। अर्यी। क्षत्रियी ॥ मुद्गलाच्छन्दसि लिच्च॥ र॑थीर॑भून्मुद्ग॑लानी॒ गवि॑ष्टौ (ऋ० १०.१०२.२)॥

---

१. 'आचार्या' इत्यधिकः पाठो मुद्रितेषु। स त्वयुक्तः।

क्रीतात् करणपूर्वात् ॥ ५० ॥

करणं पूर्वमस्मिन्निति करणपूर्वं प्रातिपदिकम्। क्रीतशब्दान्तात् प्रातिपदिकात् करणपूर्वात् स्त्रियां ङीष् प्रत्ययो भवति। वस्त्रेण क्रीयते सा वस्त्रक्रीती। वसनक्रीती। करणपूर्वादिति किम् ? सुक्रीता। दुष्क्रीता। इह कस्माद् न भवति—सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसीति ? टाबन्तेन समासः। अत इति चानुवर्तते। 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' (परि० ७५) इति बहुलं तदुच्यते, 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इति॥

क्तादल्पाख्यायाम् ॥ ५१ ॥

करणपूर्वादित्येव। करणपूर्वात् प्रातिपदिकात् क्तान्तादल्पाख्यायां ङीष् प्रत्ययो भवति। अल्पाख्यायामिति समुदायोपाधिः। अभ्रविलिप्ती द्यौः। सूपविलिप्ती पात्री। अल्पसूपेत्यर्थः। अल्पाख्यायामिति किम् ? चन्दनानुलिप्ता ब्राह्मणी॥

बहुव्रीहेश्चान्तोदात्तात् ॥ ५२ ॥

क्तादित्येव। बहुव्रीहिर्योऽन्तोदात्तः, तस्मात् स्त्रियां ङीष् प्रत्ययो भवति। स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणम्। 'अस्वाङ्गपूर्वपदाद्०' (४.१.५३) विकल्पं वक्ष्यति। शङ्खभिन्नी। ऊरुभिन्नी। गलोत्कृत्ती। केशलूनी। बहुव्रीहेरिति किम् ? पादपतिता ॥ अन्तोदात्ताज् जातप्रतिषेधः॥ दन्तजाता। स्तनजाता ॥ पाणिगृहीत्यादीनामर्थविशेषे॥ पाणिगृहीती भार्या। यस्यास्तु कथंचित् पाणिर्गृह्यते पाणिगृहीता सा भवति ॥ अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम्॥ बहुकृता। नञ्—अकृता। सु—सुकृता। काल—मासजाता। संवत्सरजाता। सुखादिः—सुखजाता। दुःखजाता। 'जातिकालसुखादिभ्योऽनाच्छादनात्०' (६.२.१७०) इत्येवमादिना बहुव्रीहेरन्तोदात्तत्वम्॥

अस्वाङ्गपूर्वपदाद् वा ॥ ५३ ॥

अन्तोदात्तात् क्तादित्यनुवर्तते। अस्वाङ्गपूर्वपदादन्तोदात्तात् क्तान्ताद् बहुव्रीहेः स्त्रियां वा ङीष् प्रत्ययो भवति। पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। शार्ङ्गजग्धी, शार्ङ्गजग्धा। पलाण्डुभक्षिती, पलाण्डुभक्षिता। सुरापीती, सुरापीता। अस्वाङ्गपूर्वपदादिति किम् ? शङ्खभिन्नी। ऊरुभिन्नी। अन्तोदात्तादित्येव—वस्त्रच्छन्ना। वसनच्छन्ना ॥ बहुलं संज्ञाछन्दसोरिति वक्तव्यम्॥ प्रवृद्धविलूनी, प्रवृद्धविलूना। प्रवृद्धा चासौ विलूना चेति। नायं बहुव्रीहिः॥

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५४ ॥

बहुव्रीहेः क्तान्तादन्तोदात्तादिति सर्वं निवृत्तम्। वाग्रहणमनुवर्तते। स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् प्रत्ययो भवति। चन्द्रमुखी, चन्द्रमुखा। अतिक्रान्ता केशान् अतिकेशी, अतिकेशा माला। स्वाङ्गादिति किम् ? बहुयवा। उपसर्जनादिति किम् ? अशिखा। असंयोगोपधादिति किम् ? सुगुल्फा। सुपाश्वर्वा ॥ अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्॥ मृद्वङ्गी, मृद्वङ्गा। सुगात्री, सुगात्रा। स्निग्धकण्ठी, स्निग्धकण्ठा।

अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्।
अतत्स्थं तत्र दृष्टं चेत् तस्य चेत् तत्तथायुतम्॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥ ५५ ॥

स्वाङ्गाच्चोपसर्जनादित्येव। बह्वजूलक्षणे संयोगोपधलक्षणे च प्रतिषेधे प्राप्ते वचनम्। सहनञ्विद्यमानपूर्वलक्षणस्तु प्रतिषेधो भवत्येव। नासिकाद्यन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् प्रत्ययो भवति। तुङ्गनासिकी, तुङ्गनासिका। तिलोदरी, तिलोदरा। बिम्बोष्ठी, बिम्बोष्ठा। दीर्घजङ्घी, दीर्घजङ्घा। समदन्ती, समदन्ता। चारुकर्णी, चारुकर्णा। तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा ॥ पुच्छाच्चेति वक्तव्यम्॥ कल्याणपुच्छी, कल्याणपुच्छा ॥ कबरमणिविष- शरेभ्यो नित्यम्॥ कबरपुच्छी। मणिपुच्छी। विषपुच्छी। शरपुच्छी ॥ उपमानात् पक्षात् च पुच्छात् च॥ उलूकपक्षी सेना। उलूकपुच्छी शाला॥

न क्रोडादिबह्वचः ॥ ५६ ॥

स्वाङ्गादिति ङीष् प्राप्तः प्रतिषिध्यते। क्रोडाद्यन्ताद् बह्वजन्तात् च प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति। कल्याणक्रोडा। कल्याणखुरा। कल्याणोखा। कल्याणबाला। कल्याणशफा। कल्याणगुदा। कल्याणघोणा। सुभगा। सुगला। क्रोडादिराकृतिगणः। बह्वचः खल्वपि—पृथुजघना। महाललाटा॥

सहनञ्विद्यमानपूर्वाच्च ॥ ५७ ॥

'स्वाङ्गाच्चोपसर्जनाद्०' (४.१.५४) इति 'नासिकोदरौष्ठजङ्घा०' (४.१.५५) इति च प्राप्तो ङीष् प्रतिषिध्यते। सह नञ् विद्यमान इत्येवंपूर्वात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति। सकेशा। अकेशा। विद्यमानकेशा। सनासिका। अनासिका। विद्यमाननासिका॥

---

१ - ' कल्याणनखा, कल्याणमुखा ' इति मुद्रितेष्वधिकः पाठः। यथापदमञ्जरि सोऽग्रन्थः।

नखमुखात् संज्ञायाम् ॥ ५८ ॥

नखमुखान्तात् प्रातिपदिकात् संज्ञायां विषये स्त्रियां ङीष् प्रत्ययो न भवति। शूर्पणखा। वज्रणखा। गौरमुखा। कालमुखा। संज्ञायामिति किम्? ताम्रनखी कन्या। चन्द्रमुखी॥

दीर्घजिह्वी चच्छन्दसि ॥ ५९ ॥

दीर्घजिह्वी इति छन्दसि विषये निपात्यते। संयोगोपधत्वादप्राप्तो ङीष् विधीयते। दीर्घजिह्वी वै देवानां हव्यम्वाले ट् (तु—मै० सं० ३.१०.६)। चकारः संज्ञानुकर्षणार्थः। दीर्घजिह्वीति निपातनं नित्यार्थम्॥

दिक्पूर्वपदान् ङीप् ॥ ६० ॥

'स्वाङ्गाच्चोपसर्जनाद्०' (४.१.५४) इत्येवमादिविधिप्रतिषेधविषयः सर्वोऽप्यपेक्ष्यते। यत्र ङीष् विहितस्तत्र तदपवादः। दिक्पूर्वपदात् प्रातिपदिकाद् ङीप् प्रत्ययो भवति। स्वरे विशेषः। प्राङ्मुखी, प्राङ्मुखा। प्राङ्नासिकी, प्राङ्नासिका। इह न भवति—प्राग्गुल्फा, प्राक्क्रोडा, प्राग्जघनेति॥

वाहः ॥ ६१ ॥

ङीषेव स्वर्यते, न ङीप्। वहेरयं ण्विप्रत्ययान्तस्य निर्देशः। सामर्थ्यात् तदन्तविधेर्विज्ञानम्। वाहन्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति। दित्यौही (तै० सं० ४.७.१०.१)। प्रष्ठौही॥

सख्यशिश्वीति भाषायाम् ॥ ६२ ॥

सखी अशिश्वी इत्येतौ शब्दौ ङीषन्तौ भाषायां निपात्येते। सखीयं मे ब्राह्मणी। नास्याः शिशुरस्तीति अशिश्वी। भाषायामिति किम्? सखा सप्तपदी भव (आ० गृ० १.७.१६)। अशिशुमिव मामयं शिशुरभिमन्यते॥

जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥

जातिवाचि यत् प्रातिपदिकं न च स्त्रियामेव नियतमस्त्रीविषयमयकारोपधं च, तस्मात् स्त्रियां ङीष् प्रत्ययो भवति।

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥

---

१. 'पष्ठौही' इति श्रूयते (मा० सं० १८.२७; तै० सं० ४.७.१०.१)।

कुक्कुटी। सूकरी। ब्राह्मणी। वृषली। नाडायनी। चारायणी। कठी। बह्वृची। जातेरिति किम् ? मुण्डा। अस्त्रीविषयादिति किम् ? मक्षिका। अयोपधादिति किम् ? क्षत्रिया ॥ योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः॥ हयी। गवयी। मुकयी। मत्सी। मनुषी॥

पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च ॥ ६४ ॥

पाकाद्युत्तरपदाज् जातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति। स्त्रीविषयत्वादेतेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोबाली। पुष्पफलमूलोत्तरपदात् तु यतो नेष्यते तदजादिषु पठ्यते। 'सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्' (ग० सू० ३७)। 'संभस्राजिनशणपिण्डेभ्यः फलात्' (ग० सू० ३५)। 'मूलान्नञः' (ग० सू० ३६) इति ॥

इतो मनुष्यजातेः ॥ ६५ ॥

इकारान्तात् प्रातिपदिकात् मनुष्यजातिवाचिनः स्त्रियां ङीष् प्रत्ययो भवति। अवन्ती। कुन्ती। दाक्षी। प्लाक्षी। इत इति किम् ? विट्। दरत्। मनुष्यग्रहणं किम् ? तित्तिरिः। जातेरिति वर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात्। औदमेयी ॥ इञ उपसंख्यानमजात्यर्थम्॥ सौतङ्गमी। मौनिचित्ती। सुतङ्गमादिभ्यश्चातुरर्थिक इञ् (४. २.८०) न जातिः॥

ऊङुतः ॥ ६६ ॥

मनुष्यजातेरिति वर्तते। उकारान्ताद् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियामूङ् प्रत्ययो भवति। कुरूः। ब्रह्मबन्धूः। वीरबन्धूः। ङकारो 'नोङ्धात्वोः' (६.१.१७५) इति विशेषणार्थः। दीर्घोच्चारणं कपो बाधनार्थम्। अयोपधादित्येतदत्रापेक्ष्यते। अध्वर्युर्ब्राह्मणी ॥ अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम्॥ अलाबूः। कर्कन्धूः। अप्राणिग्रहणं किम् ? कृकवाकुः। अरज्ज्वादीनामिति किम् ? रज्जुः। हनुः॥

बाह्वन्तात् संज्ञायाम् ॥ ६७ ॥

बाहुशब्दान्तात् प्रातिपदिकात् संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति। भद्रबाहूः। जालबाहूः। संज्ञायामिति किम् ? वृत्तौ बाहू अस्याः वृत्तबाहुः॥

पङ्गोश्च ॥ ६८ ॥

पङ्गुशब्दात् स्त्रियामूङ् प्रत्ययो भवति। पङ्गूः ॥ श्वशुरस्योकाराकारयोर्लोपश्च वक्तव्यः॥ श्वश्रूः॥

ऊरूत्तरपदादौपम्ये ॥ ६९ ॥

ऊरूत्तरपदात् प्रातिपदिकादौपम्ये गम्यमाने स्त्रियामूङ् प्रत्ययो भवति। कदलीस्तम्भोरूः। नागनासोरूः। करभोरूः। औपम्य इति किम् ? वृत्तोरुः स्त्री॥

संहितशफलक्षणवामादेश्च ॥ ७० ॥

संहित शफ लक्षण वाम इत्येवमादेः प्रातिपदिकादूरूत्तरपदात् स्त्रियामूङ् प्रत्ययो भवति। अनौपम्यार्थ आरम्भः। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः ॥ सहितसहाभ्यां चेति वक्तव्यम्॥ सहितोरूः। सहोरूः॥

कद्रुकमण्डल्वोश्छन्दसि ॥ ७१ ॥

कद्रुशब्दात् कमण्डलुशब्दात् च छन्दसि विषये स्त्रियामूङ् प्रत्ययो भवति। क॑द्रूश्च॑ वै सु॑प॑र्णी च (तै० सं० ६.१.६.१)। मा स्म कमण्डलूं शूद्राय दद्यात्। छन्दसीति किम्? कद्रुः। कमण्डलुः ॥ गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम्॥ गु॒ग्गु॒लूः (शौ० सं० ४.३७.३)। म॑धूः (शौ० सं० ७.५६.२)। ज॑तूः (मै० सं० ३.१४.६)। प॑त॑या॒लूः (शौ० सं० ७.११५.२)॥

संज्ञायाम् ॥ ७२ ॥

कद्रुकमण्डलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति। अच्छन्दोऽर्थं वचनम्। कद्रूः। कमण्डलूः। संज्ञायामिति किम् ? कद्रुः। कमण्डलुः॥

शार्ङ्गरवाद्यञो ङीन् ॥ ७३ ॥

शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति। शार्ङ्गरवी। कापटवी। अञन्तेभ्यः—बैदी। और्वी। जातिग्रहणं चेहानुवर्तते। तेन जातिलक्षणो ङीषनेन बाध्यते, न पुंयोगलक्षणः। बैदस्य स्त्री बैदी॥ शार्ङ्गरव। कापटव। गौगुलव। ब्राह्मण। गौतम। एतेऽणन्ताः। कामण्डलेय। ब्राह्मकृतेय। आनिचेय। आनिधेय। आशोकेय। एते ढगन्ताः। वात्स्यायन। मौञ्जायन। एतौ फगन्तौ जातिः। कैकसेयो ढगन्तः। काव्यशैव्यौ ञ्यङन्तौ। एहि, पर्येहि। कृदिकारान्तौ। आश्मरथ्यो यञन्तः। औदपानः। उदपानशब्दः शुण्डिकाद्यणन्तः (४.३.७६) प्रयोजयति। अराल। चण्डाल।

वतण्ड। जातिः। भोगवद्गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वार्थम् (ग० सू० ५२)। नृनरयोर्वृद्धिश्च (ग० सू० ५३)। अत्र यथायोगं ङीबादिषु प्राप्तेषु ङीन् विधीयते॥

यङश्चाप् ॥ ७४ ॥

यङन्तात् प्रातिपदिकात् स्त्रियां चाप् प्रत्ययो भवति। ञ्यङः ष्यङश्च सामान्यग्रहणमेतत्। आम्बष्ठ्या। सौवीर्या। कौसल्या। ष्यङ्—कारीषगन्ध्या। वाराह्या। बालाक्या ॥ षाच्च यञः॥ षात् परो यो यञ् तदन्तात् चाप् वक्तव्यः। शार्कराक्ष्या। पौतिमाष्या। गौकक्ष्या। उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन वा भविष्यति॥

आवट्याच्च ॥ ७५ ॥

अवटशब्दो गर्गादिः। तस्माद् यञि कृते ङीपि प्राप्ते वचनमेतत्। आवट्यात् च स्त्रियां चाप् प्रत्ययो भवति। आवट्या। प्राचां ष्फ एव, सर्वत्रग्रहणात्। आवट्यायनी॥

तद्धिताः ॥ ७६ ॥

अधिकारोऽयम्। आ पञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामः, तद्धितसंज्ञास्ते वेदितव्याः। वक्ष्यति—'यूनस्तिः' (४.१.७७)—युवतिः। बहुवचनमनुक्त-तद्धितपरिग्रहार्थम्। 'पृथिव्या ञाञौ' (वा० ४.१.८५)। 'अग्रादिपश्चाड्डिमच्' (वा० ४.३.२३) इत्येवमादि लब्धं भवति। तद्धितप्रदेशाः—'कृत्तद्धितसमासाश्च' (१.२.४६) इत्येवमादयः॥

यूनस्तिः ॥ ७७ ॥

युवन्शब्दात् प्रातिपदिकात् स्त्रियां तिः प्रत्ययो भवति, स च तद्धितसंज्ञो भवति। ङीपोऽपवादः। युवतिः॥

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ ७८ ॥

गोत्रे यावणिञौ विहितावनार्षौ, तदन्तयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशो भवति। 'निर्दिश्यमानस्यादेशा भवन्ति' (परि० १२) इत्यणिञोरेव विज्ञायते, न तु समुदायस्य। ङकारः सामान्यग्रहणार्थः। षकारस्तदविघातार्थः। 'यङश्चाप्' (४.१.७४) इति। उत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमक्षरमाह। उत्तमस्य समीपमुपोत्तमम्। गुरु उपोत्तमं यस्य तद् गुरूपोत्तमं प्रातिपदिकम्। करीषस्येव गन्धोऽस्य करीषगन्धिः। कुमुदगन्धिः। 'तस्यापत्यम्' (४.१.९२) इत्यण्। तस्य ष्यङादेशः। कारीषगन्ध्या।

कौमुदगन्ध्या। वराहस्यापत्यम्। 'अत इञ्' (४.१.९५)—वाराहिः। तस्य ष्यङादेशः। वाराह्या। बालाक्या। अणिञोरिति किम् ? ऋतभागस्यापत्यम्, बिदादित्वादञ्, आर्तभागी। गुरूपोत्तमादिकं सर्वमस्तीति, न त्वणिञौ। 'टिड्ढाणञ्०' (४.१.१५) इति ङीबेव भवति। अनार्षयोरिति किम् ? वासिष्ठी। वैश्वामित्री। गुरूपोत्तमयोरिति किम् ? औपगवी। कापटवी। गोत्र इति किम् ? 'तत्र जाताः' (४.३.२५)—आहिच्छत्री। कान्यकुब्जी॥

गोत्रावयवात् ॥ ७९ ॥

अणिञोरित्येव। गोत्रावयवा गोत्राभिमताः कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः, ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति। अगुरूपोत्तमार्थ आरम्भः। पौणिक्या। भौणिक्या। मौखर्या। येषां त्वनन्तरापत्येऽपीष्यते दैवदत्या याज्ञदत्येति, ते क्रौड्यादिषु द्रष्टव्याः॥

क्रौड्यादिभ्यश्च ॥ ८० ॥

क्रौडि इत्येवमादिभ्यश्च स्त्रियां ष्यङ् प्रत्ययो भवति। अगुरूपोत्तमार्थ आरम्भः, अनणिञर्थश्च। क्रौड्या। लाड्या॥ क्रौडि। लाडि। व्याडि। आपिशलि। आपक्षिति। चौपयत। चैटयत। शैकयत। बैल्वयत। वैकल्पयत। सौधातकि। सूत युवत्याम् (ग० सू० ५४)। भोज क्षत्रिये (ग० सू० ५५)। भौरिकि। भौलिकि। शाल्मलि। शालास्थलि। कापिष्ठलि। गौलक्ष्य। गौकक्ष्य॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् ॥ ८१ ॥

दैवयज्ञि शौचिवृक्षि सात्यमुग्रि काण्ठेविद्धि इत्येतेषामन्यतरस्यां ष्यङ् प्रत्ययो भवति। इञन्ता एते, गोत्रग्रहणं च नानुवर्तते। तेनोभयत्रविभाषेयम्। गोत्रे पूर्वेण नित्यः ष्यङादेशः प्राप्तो विकल्प्यते, अगोत्रे त्वनन्तरेऽपत्ये पक्षे विधीयते। तेन मुक्त 'इतो मनुष्यजातेः' (४.१.६५) इति ङीषेव भवति। दैवय•या, दैवयज्ञी। शौचिवृक्ष्या, शौचिवृक्षी। सात्यमुग्र्या, सात्यमुग्री। काण्ठेविद्ध्या, काण्ठेविद्धी॥

समर्थानां प्रथमाद् वा ॥ ८२ ॥

त्रयमप्यधिक्रियते समर्थानामिति च, प्रथमादिति च, वेति च। स्वार्थिकप्रत्यया-वधिश्चायमधिकारः, 'प्राग् दिशो विभक्तिः' (५.३.१) इति यावत्। स्वार्थिकेषु ह्यस्योपयोगो

---

१ - वस्तुतस्तु 'शार्ङ्गरवाद्यञो ङीन्' (४.१.७३) इति ङीन् भवति।

नास्ति, विकल्पोऽपि तत्रानवस्थितः। केचिन्नित्यमेव भवन्ति। लक्षणवाक्यानि 'तस्यापत्यम्' (४.१.९२) 'तेन रक्तं रागात्' (४.२.१) 'तत्र भवः' (४.३.५३) इत्येवमादीनि भविष्यन्ति। तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम्। समर्थानामिति निर्धारणे षष्ठी। समर्थानां मध्ये प्रथमः प्रत्ययप्रकृतित्वेन निर्धार्यते। तस्येति सामान्यं विशेषलक्षणार्थम् , तदीयं प्राथम्यं विशेषाणां विज्ञायते। उपगोरपत्यम्, औपगवः। समर्थानामिति किम् ? कम्बल उपगोः, अपत्यं देवदत्तस्य। प्रथमादिति किम् ? षष्ठ्यन्ताद् यथा स्यात् प्रथमान्ताद् मा भूत्। वेति किम् ? वाक्यमपि हि यथा स्यात्—उपगोरपत्यमिति। यद्येवं समासवृत्तिस्तद्धितवृत्त्या बाध्येत उपग्वपत्यमिति। नैष दोषः। पूर्वसूत्रादन्यतरस्यांग्रहणमनुवर्तते। तेनैतदपि भविष्यति॥

प्राग् दीव्यतोऽण् ॥ ८३ ॥

'तेन दीव्यति०' (४.४.२) इति वक्ष्यति। तदेकदेशो दीव्यच्छब्दोऽवधित्वेन गृह्यते। प्राग् दीव्यत्संशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, अण्प्रत्ययस्तत्र भवतीति वेदितव्यम्। अधिकारः, परिभाषा, विधिर्वेति त्रिष्वपि दर्शनेष्वपवादविषयं परिहृत्याण् प्रवर्तते। वक्ष्यति—'तस्यापत्यम्' (४.१.९२)। औपगवः। कापटवः॥

अश्वपत्यादिभ्यश्च ॥ ८४ ॥

अश्वपत्यादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेष्वर्थेष्वण् प्रत्ययो भवति। पत्युत्तरपदाद् ण्यं वक्ष्यति, तस्यापवादः। आश्वपतम्। शातपतम्॥ अश्वपति। शतपति। धनपति। गणपति। राष्ट्रपति। कुलपति। गृहपति। धान्यपति। पशुपति। धर्मपति। सभापति। प्राणपति। क्षेत्रपति॥

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥ ८५ ॥

प्राग्दीव्यत इत्येव। दिति अदिति आदित्य इत्येतेभ्यः, पत्युत्तरपदात् च प्रातिपदिकात् प्राग्दीव्यतीयेष्वर्थेषु ण्यः प्रत्ययो भवति। दैत्यः। आदित्यः। आदित्यम्। पत्युत्तरपदात्—प्राजापत्यम्। सैनापत्यम् ॥ यमाच्चेति वक्तव्यम्॥ याम्यम् ॥ वाङ्मतिपितृमतां छन्दस्युपसंख्यानम्॥ वा॒च्यः (मा० सं० १३.५८)। मा॑त्यां (मै० सं० २.७.१६)। पैतृम॑त्यम् (मा० सं० ७.४६) ॥ पृथिव्या ञाञौ॥ पार्थिवा (ऋ० १.६४.३)। पार्थिवी (पै० सं० १६.४६.३) ॥ देवाद् यञञौ॥ दैव्य॑म् (ऋ० १.३१.१७)। दैवम् (पै० सं० १.३१.४) ॥ बहिषष्टिलोपश्च ॥ बाह्याः (शौ० सं० १६.४४.६) ॥ ईकक् च॥ बा॒ही॒कः ॥ ईकञ् छन्दसि॥ बाहीकः। स्वरे विशेषः। टिलोपवचनमव्य-

यानां भमात्रे टिलोपस्य (वा० ६.४.१४४) अनित्यत्वज्ञापनार्थम् । आरातीयः ॥ स्थाम्नोऽकारः॥ अश्वत्थामः ॥ लोम्नोऽपत्येषु बहुषु॥ उडुलोमाः। शरलोमाः। बहुष्विति किम् ? औडुलोमिः। शारलोमिः ॥ सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्॥ गव्यम्। अजादिप्रत्ययप्रसङ्ग इति किम् ? गोभ्यो हेतुभ्य आगतं गोरूप्यम्। गोमयम् ॥ ण्यादयोऽर्थविशेषलक्षणादणपवादात् पूर्वविप्रतिषेधेन॥ दितेरपत्यं दैत्यः। वनस्पतीनां समूहो वानस्पत्यम्। कथं दैतेयः ? 'दितिशब्दात् कृदिकारादक्तिनः' (ग० सू० ४६), 'सर्वतोऽक्तिन्नर्थादित्येके' (ग० सू० ५०) इति ङीषं कृत्वा 'स्त्रीभ्यो ढक्' (४.१.१२०) क्रियते। लिङ्गविशिष्टपरिभाषा (परि० ७१) चानित्या॥

उत्सादिभ्योऽञ् ॥ ८६ ॥

प्राग्दीव्यत इत्येव। उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेष्वञ् प्रत्ययो भवति। अणस्तदपवादानां च बाधकः। औत्सः। औदपानः॥ उत्स। उदपान। विकर। विनोद। महानद। महानस। महाप्राण। तरुण। तलुन। वष्कयासे (ग० सू० ५६)। धेनु। पृथिवी। पङ्क्ति। जगती। त्रिष्टुप्। अनुष्टुप्। जनपद। भरत। उशीनर। ग्रीष्म। पीलु। कुल। उदस्थानाद् देशे (ग० सू० ५७)। पृषदंशे (ग० सू० ५८)। भल्लकीय। रथन्तर। मध्यन्दिन। बृहत्। महत्। सत्वन्तु। सदृशब्दो मतुबन्त आगतनुङ्को गृह्यते सत्वन्त्विति। कुरु। पञ्चाल। इन्द्रावसान। उष्णिक्। ककुभ्। सुवर्ण। देव। ग्रीष्मादच्छन्दसीति वक्तव्यम् (ग० सू० ५६)। इह मा भूत्—त्रिष्टुब् ग्रैष्मी (काठ० सं० १६.१६)। छन्दश्चेह वृत्तं गृह्यते न वेदः॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ८७ ॥

'धान्यानां भवने०' (५.२.१) इति वक्ष्यति। तस्य प्रागित्यनेनैव संबन्धः। प्राग् भवनसंशब्दनाद् येऽर्थास्तेषु स्त्रीशब्दात् पुंशब्दात् च यथाक्रमं नञ्स्नञौ प्रत्ययौ भवतः। स्त्रीषु भवं स्त्रैणम्। पौंस्नम्। स्त्रीणां समूहः स्त्रैणम्। पौंस्नम्। स्त्रीभ्य आगतं स्त्रैणम्। पौंस्नम्। स्त्रीभ्यो हितं स्त्रैणम्। पौंस्नम्। 'स्त्रियाः पुंवद्०' (६.३.३४) इति ज्ञापकाद् वत्यर्थे न भवति। योगापेक्षं च ज्ञापकमिति स्त्रीवदित्यपि सिद्धम्॥

द्विगोर्लुगनपत्ये ॥ ८८ ॥

प्राग् दीव्यत इति वर्तते, न भवनादिति। द्विगोरिति षष्ठी। द्विगोर्यः संबन्धी निमित्तत्वेन तद्धितः प्राग्दीव्यतीयोऽपत्यप्रत्ययं वर्जयित्वा, तस्य लुग् भवति। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः। दशकपालः। द्वौ वेदावधीते द्विवेदः। त्रिवेदः। अनपत्य इति किम् ? द्वैदेवदत्तिः। त्रैदेवदत्तिः। प्राग् दीव्यत इत्येव—द्वैपारायणिकः। द्विगुनिमित्तविज्ञानादिह

न भवति—पञ्चकपालस्येदं पाञ्चकपालम्। अथवा द्विगोरेवायं लुग् विधीयते, द्विगोरिति स्थानषष्ठी। ननु च प्रत्ययादर्शनस्यैषा संज्ञा ? सत्यमेतत्। उपचारेण तु लक्षणया द्विगुनिमित्तभूतः प्रत्यय एव द्विगुः, तस्य लुग् भवति। द्विगुनिमित्तकोऽपि तर्हि गुणकल्पनया कस्माद् न द्विगुरुच्यते पाञ्चकपालमिति ? न तस्य द्विगुत्वं निमित्तम्। इतरस्तु द्विगुत्वस्यैव निमित्तमित्यस्ति विशेषः। यद्येवमिह कथं पञ्चकपाल्यां संस्कृतः पञ्चकपाल इति ? नैवात्र तद्धित उत्पद्यते। वाक्यमेव भवति। त्रैशब्द्यं हि साध्यम्—पञ्चसु कपालेषु संस्कृतः, पञ्चकपाल्यां संस्कृतः, पञ्चकपाल इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः, अपरस्मादुत्पत्तिर्भविष्यति। अथेह कस्माद् न भवति—पञ्चभ्यो गर्गेभ्य आगतं पञ्चगर्गरूप्यम्, पञ्चगर्गमयमिति ? वेत्यनुवर्तते। सा च व्यवस्थितविभाषा विज्ञायते॥

गोत्रेऽलुगचि ॥ ८९ ॥

प्राग् दीव्यत इत्येव। 'यस्कादिभ्यो गोत्रे' (२.४.६३) इत्यादिना येषां गोत्रप्रत्ययानां लुगुक्तः, तेषामजादौ प्राग्दीव्यतीये विषयभूते प्रतिषिध्यते। गर्गाणां छात्रा गार्गीयाः। वात्सीयाः। आत्रेयीयाः। खारपायणीयाः। गोत्र इति किम् ? कौवलम्। बादरम्। अचीति किम् ? गर्गेभ्य आगतं गर्गरूप्यम्। गर्गमयम्। प्राग् दीव्यत इत्येव—गर्गेभ्यो हितं गर्गीयम् ॥ गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक्॥ बिदानामपत्यं युवा, युवानौ। बैदः। बैदौ। बैदशब्दादत इञि (४.१.९५) कृते तस्य च इञो 'ण्यक्षत्रियार्षञितः०' (२.४.५८) इति लुकि रूपम् ॥ एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि॥ बैदस्य बैदयोर्वापत्यं बहवो माणवका बिदाः। नह्यत्राञ् बहुषूत्पन्नः॥

यूनि लुक् ॥ ९० ॥

प्राग् दीव्यत इति वर्तते, अचीति च। प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते बुद्धिस्थेऽनुत्पन्न एव युवप्रत्ययस्य लुग् भवति। तस्मिन्निवृत्ते सति यो यतः प्राप्नोति, स ततो भवति। फाण्टाहतस्यापत्यं फाण्टाहतिः। तस्यापत्यं युवा, 'फाण्टाहतिमिमताभ्यां णफिञौ' (४.१.१५०) फाण्टाहतः। तस्य छात्रा इति विवक्षितेऽर्थे बुद्धिस्थे युवप्रत्ययस्य लुग् भवति। तस्मिन् निवृत्त इञन्तं प्रकृतिरूपं संपन्नम्। तस्माद् 'इञश्च' (४.२.११२) इत्यण् भवति। फाण्टाहताः। भागवित्तस्यापत्यम्, भागवित्तिः। तस्यापत्यं युवा 'वृद्धाट्ठक् सौवीरेषु बहुलम्' (४.१.१४८) इति ठक्, भागवित्तिकः। तस्य छात्राः, पूर्ववद् युवप्रत्यये निवृत्त 'इञश्च' (४.२.११२) इत्यण्, भागवित्ताः। तिकस्यापत्यं

---

१ - ' गार्गीयम् ' इत्यपपाठो है०। २ - ' भगवित्त० ' इति न्यासे (४.१.१४८)।

'तिकादिभ्यः फिञ्' (४.१.१५४) तैकायनिः। तस्यापत्यं युवा 'फेश्छ च' (४.१.१४६) इति छः, तैकायनीयः। तस्य छात्राः, युवप्रत्यये निवृत्ते 'वृद्धाच्छः' (४.२.११४) तैकायनीयाः। कपिञ्जलादस्यापत्यं कापिञ्जलादिः, तस्यापत्यं युवा 'कुर्वादिभ्यो ण्यः' (४.१.१५१) कापिञ्जलाद्यः। तस्य छात्राः, ण्ये निवृत्त 'इञश्च' (४.२.११२) इत्यण् कापिञ्जलादाः। ग्लुचुकस्यापत्यं 'प्राचामवृद्धात् फिन् बहुलम्' (४.१.१६०) इति ग्लुचुकायनिः। तस्यापत्यं युवा 'प्राग्दीव्यतोऽण्' (४.१.८३) ग्लौचुकायनः। तस्य छात्राः, युवप्रत्यये निवृत्ते स एवाण् ग्लौचुकायनाः। अचीत्येव—फाण्टाहृतरूप्यम्। फाण्टाहृतमयम्। प्राग्दीव्यत इत्येव—भागवित्तिकाय हितम् , भागवित्तिकीयम्॥

फक्फिञोरन्यतरस्याम् ॥ ६१ ॥

यूनीत्येव। पूर्वसूत्रेण नित्ये लुकि प्राप्ते विकल्प उच्यते। फक्फिञोर्युवप्रत्यययोः प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेऽन्यतरस्यां लुग् भवति। गर्गादिभ्यो यञि (४.१.१०५) कृते 'यञिञोश्च' (४.१.१०१) इति फक्, गार्ग्यायणः। तस्य छात्रा गार्गीयाः, गार्ग्यायणीयाः। वात्सीयाः, वात्स्यायनीयाः। फिञः खल्वपि। यस्कस्यापत्यम्, 'शिवादिभ्योऽण्' (४.१.११२)। यास्कः। तस्यापत्यं युवा, 'अणो द्व्यचः' (४.१.१५६) इति फिञ् यास्कायनिः। तस्य छात्रा यास्कीयाः, यास्कायनीयाः॥

तस्यापत्यम् ॥ ६२ ॥

अर्थनिर्देशोऽयम्, पूर्वैरुत्तरैश्च प्रत्ययैरभिसंबध्यते। तस्येति षष्ठीसमर्थादपत्यमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। प्रकृत्यर्थविशिष्टः षष्ठ्यर्थोऽपत्यमात्रञ्चेह गृह्यते। लिङ्गवचनादिकमन्यत् सर्वमविवक्षितम्। उपगोरपत्यमौपगवः। आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः।

तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत्।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम्॥

भानोरपत्यं भानवः। श्यामगवः॥

एको गोत्रे ॥ ६३ ॥

'अपत्यं पौत्रप्रभृति गोत्रम्' (४.१.१६२), तस्मिन् विवक्षिते भेदेन प्रत्यपत्यं प्रत्ययोत्पत्तिप्रसङ्गे नियमः क्रियते। गोत्र एक एव प्रत्ययो भवति, सर्वेऽपत्येन युज्यन्ते। अपतनादपत्यम्। योऽपि व्यवहितेन जनितः, सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव। गर्गस्यापत्यं गार्गिः। गार्गेरपत्यं गार्ग्यः। तत्पुत्रोऽपि गार्ग्यः। सर्वस्मिन् व्यवहितजनितेऽपि गोत्रापत्ये गर्गशब्दाद् यञेव भवतीति प्रत्ययो नियम्यते। अथ वा गोत्रापत्ये विवक्षित एक एव

शब्दः प्रथमा प्रकृतिः प्रत्ययमुत्पादयतीति प्रकृतिर्नियम्यते। गार्ग्यः। नाडायनः॥

गोत्राद् यून्यस्त्रियाम् ॥ ९४ ॥

अयमपि नियमः। यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति, न परमप्रकृत्यनन्तरयुवभ्यः। गार्ग्यस्यापत्यं युवा, गार्ग्यायणः। वात्स्यायनः। दाक्षायणः। प्लाक्षायणः। औपगविः। नाडायनिः। अस्त्रियामिति किम् ? दाक्षी। प्लाक्षी। किं पुनरत्र प्रतिषिध्यते ? यदि नियमः, स्त्रियामनियमः प्राप्नोति। अथ युवप्रत्ययः, स्त्रियां गोत्रप्रत्ययेनाभिधानं न प्राप्नोति, गोत्रसंज्ञाया युवसंज्ञया बाधितत्वात्। तस्माद् योगविभागः कर्तव्यः। गोत्राद् यूनि प्रत्ययो भवति। ततोऽस्त्रियाम्। यूनि यदुक्तं तत् स्त्रियां न भवति। युवसंज्ञैव प्रतिषिध्यते, तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते॥

अत इञ् ॥ ९५ ॥

तस्यापत्यमित्येव। अकारान्तात् प्रातिपदिकादिञ् प्रत्ययो भवति। अणोऽपवादः। दक्षस्यापत्यं दाक्षिः। तपरकरणं किम् ? शुभंयाः, कीलालपा इत्यतो मा भूत्। कथं 'प्रदीयतां दाशरथाय मैथिली' (वा० रा० युद्ध० ९.२२) ? शेषविवक्षया भविष्यति॥

बाह्वादिभ्यश्च ॥ ९६ ॥

बाहु इत्येवमादिभ्यः शब्देभ्योऽपत्य इञ् प्रत्ययो भवति। बाहविः। औपबाहविः। अनकारार्थ आरम्भः। क्वचिद् बाधकबाधनार्थः॥ बाहु। उपबाहु। विवाकु। शिवाकु। वटाकु। उपबिन्दु। वृक। चूडाला। मूषिका। बलाका। भगला। छगला। ध्रुवका। धुवका। सुमित्रा। दुर्मित्रा। पुष्करसत्। अनुहरत्। देवशर्मन्। अग्निशर्मन्। कुनामन्। सुनामन्। पञ्चन्। सप्तन्। अष्टन्। अमितौजसः सलोपश्च (ग० सू० ६०)। उदञ्चु। शिरस्। शराविन्। क्षेमवृद्धिन्। शृङ्खलातोदिन्। खरनादिन्। नगरमर्दिन्। प्राकारमर्दिन्। लोमन्। अजीगर्त्त। कृष्ण। सलक। युधिष्ठिर। अर्जुन। साम्ब। गद। प्रद्युम्न। राम। उदङ्कः संज्ञायाम् (ग० सू० ६१)। सम्भूयोऽम्भसोः सलोपश्च (ग० सू० ६२) ॥ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः॥ बाहुर्नाम कश्चित् , तस्यापत्यं बाहवः ॥ संबन्धिशब्दानां च तत्सदृशात् प्रतिषेधः॥ संज्ञाश्वशुरस्यापत्यं श्वाशुरिः। चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति। जाम्बिः। ऐन्द्रशर्मिः। आजधेनविः। आजबन्धविः। औडुलोमिः॥

सुधातुरकङ् च ॥ ९७ ॥

सुधातृशब्दादपत्य इञ् प्रत्ययो भवति, तत्सन्नियोगेन च तस्याकङादेशो भवति। सुधातुरपत्यं सौधातकिः ॥ व्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम्॥ वैयासकिः। वारुडकिः। नैषादकिः। चाण्डालकिः। बैम्बकिः॥

गोत्रे कुञ्जादिभ्यश्चफञ् ॥ ९८ ॥

तस्यापत्यमित्येव। गोत्रसंज्ञकेऽपत्ये वाच्ये कुञ्जादिभ्यश्चफञ् प्रत्ययो भवति। इञोऽपवादः। चकारो विशेषणार्थः, 'व्रातच्फञोरस्त्रियाम्' (५.३.११३) इति। ञकारो वृद्ध्यर्थः। कौञ्जायन्यः, कौञ्जायन्यौ, कौञ्जायनाः। ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः। गोत्र इति किम् ? कुञ्जस्यापत्यमनन्तरं कौञ्जिः। एकवचनद्विवचनयोः सतिशिष्टत्वाद् ञित्स्वरेणैव भवितव्यम्। बहुवचने तु कौञ्जायना इति परमपि ञित्स्वरं त्यक्त्वा चित्स्वर एवेष्यते। गोत्राधिकारश्च 'शिवादिभ्योऽण्' (४.१.११२) इति यावत्॥ कुञ्ज। ब्रध्न। शङ्ख। भस्मन्। गण। लोमन्। शठ। शाक। शाकट। शुण्डा। शुभ। विपाश। स्कन्द। स्तम्भ॥

नडादिभ्यः फक् ॥ ९९ ॥

नड इत्येवमादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति। नाडायनः। चारायणः। गोत्र इत्येव—नाडिः। शलङ्कु शलङ्कं च (ग० सू० ६३) इत्यत्र पठ्यते। शालङ्कायनः। पैलादिषु (२.४.५९) च शालङ्किशब्दः पठ्यते। शालङ्किः पिता। शालङ्किः पुत्रः। तत् कथम् ? गोत्रविशेषे कौशिके फकं स्मरन्ति। इञेवान्यत्र शालङ्किरिति। अथवा पैलादिपाठ एव ज्ञापक इञो भावस्य॥ नड। चर। बक। मुञ्ज। इतिक। इतिश। उपक। लमक। शलङ्कु शलङ्कं च (ग० सू० ६३)। सप्तल। वाजप्य। तिक। अग्निशर्मन् वृषगणे (ग० सू० ६४)। प्राण। नर। सायक। दास। मित्र। द्वीप। पिङ्गर। पिङ्गल। किङ्कर। किङ्कल। कातर। कातल। काश्य। काश्यप। काव्य। अज। अमुष्य। कृष्णरणौ ब्राह्मणवासिष्ठयोः (ग० सू० ६५)। अमित्र। लिगु। चित्र। कुमार। क्रोष्टु क्रोष्टञ्च (ग० सू० ६६)। लोह। दुर्ग। स्तम्भ। शिंशपा। अग्र। तृण। शकट। सुमनस्। सुमत। मिमत। ऋक्। जत्। युगन्धर। हंसक। दण्डिन्। हस्तिन्। पञ्चाल। चमसिन्। सुकृत्य। स्थिरक। ब्राह्मण। चटक। बदर। अश्वक। खरप। कामुक। ब्रह्मदत्त। उदुम्बर। शोण। अलोह। दण्ड॥

हरितादिभ्योऽञः ॥ १०० ॥

हरितादिर्बिदाद्यन्तर्गणः (४.१.१०४)। हरितादिभ्योऽञन्तेभ्योऽपत्ये फक् प्रत्ययो भवति। इञोऽपवादः। हरितस्यापत्यं हारितायनः। कैन्दासायनः। ननु च गोत्र इति

वर्तते। न च गोत्रादपरो गोत्रप्रत्ययो भवति, 'एको गोत्रे' (४.१.९३) इति वचनात्? सत्यमेतत्। इह तु गोत्राधिकारेऽपि सामर्थ्याद् यूनि प्रत्ययो विज्ञायते। गोत्राधिकारस्तूत्तरार्थः॥

यञिञोश्च ॥ १०१ ॥

यञन्ताद् इञन्तात् च प्रातिपदिकादपत्ये फक् प्रत्ययो भवति। गार्ग्यायणः। वात्स्या- यनः। इञन्तात् - दाक्षायणः। प्लाक्षायणः। 'द्वीपादनुसमुद्रं यञ्' (४.३.१०), सुतङ्गमादिभ्य इञ् (४.२.८०) इत्यतो न भवति। गोत्रग्रहणेन यञिञौ विशेष्येते। तदन्तात् तु यून्येवायं प्रत्ययः, गोत्राद् यूनीति वचनात्॥

शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ॥ १०२ ॥

गोत्र इत्येव। शरद्वत् शुनक दर्भ इत्येतेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति यथासंख्यं भृगुवत्साग्रायणेष्वर्थेष्वपत्यविशेषेषु। शारद्वतायनो भवति भार्गवश्चेत्। शारद्वतोऽन्यः। शौनकायनो भवति वात्स्यश्चेत्। शौनकोऽन्यः। दार्भायणो भवत्याग्रायणश्चेत्। दार्भिरन्यः। शरद्वच्छुनकशब्दौ बिदादी (४.१.१०४)। ताभ्यामञोऽपवादः फक्॥

द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥ १०३ ॥

गोत्र इत्येव। द्रोणादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्येऽन्यतरस्यां फक् प्रत्ययो भवति। इञोऽपवादः। द्रौणायनः, द्रौणिः। पार्वतायनः, पार्वतिः। जैवन्तायनः, जैवन्तिः। कथमनन्तरोऽश्वत्थामा द्रौणायन इत्युच्यते ? नैवात्र महाभारतद्रोणो गृह्यते। किं तर्हि ? अनादिः। तत इदं गोत्रे प्रत्ययविधानम्। इदानीन्तनात् तु श्रुतिसामान्यादध्यारोपेण तथाभिधानं भवति॥

अनृष्यानन्तर्ये बिदादिभ्योऽञ् ॥ १०४ ॥

गोत्र इत्येव। बिदादिभ्यो गोत्रापत्येऽञ् प्रत्ययो भवति। बैदः। और्वः। ये पुनरत्रानृषिशब्दाः पुत्रादयः, तेभ्योऽनन्तरापत्य एव भवति। पौत्रः। दौहित्रः। अनृष्यानन्तर्य इत्यस्यायमर्थः—अनृषिभ्योऽनन्तरे भवतीति। यद्ययमर्थः, ऋष्यपत्यनैरन्तर्ये प्रतिषेधो न कृतः स्यात् ? तत्रेदं न सिध्यति—इन्द्रभूः सप्तमः काश्यपानाम् (तु०—वं० ब्रा० २.२४)। अनन्तरापत्यरूपेणैव ऋष्यणाभिधानं भविष्यति। अवश्यं चैतदेवं विज्ञेयम्। ऋष्यपत्यनैरन्तर्यविषये प्रतिषेधे विज्ञायमाने कौशिको विश्वामित्र इति दुष्यति। गोत्र

---

१ - ' ऋष्यपत्ये नैरन्तर्य० ' इति बाल०, है० पाठः। ' ऋष्यपत्येषु नैरन्तर्य० ' इति तारा०।

इत्येव। बैदिः। ननु च ऋष्यणा भवितव्यम् ? बाह्वादिराकृतिगणः, तेनेञेव भवति॥ बिद। उर्व। कश्यप। कुशिक। भरद्वाज। उपमन्यु। किलालप। किदर्भ। विश्वानर। ऋष्टिषेण। ऋतभाग। हर्यश्व। प्रियक। आपस्तम्ब। कूचवार। शरद्वत्। शुनक। धेनु। गोपवन। शिग्रु। बिन्दु। भाजन। अश्वावतान। श्यामाक। श्यमाक। श्यापर्ण। हरित। किन्दास। वह्यस्क। अर्कलूष। वध्योष। विष्णुवृद्ध। प्रतिबोध। रथन्तर। रथीतर। गविष्ठिर। निषाद। मठर। मृद। पुनर्भू। पुत्र। दुहितृ। ननान्दृ। परस्त्री परशुं च (ग० सू० ६७)॥

गर्गादिभ्यो यञ् ॥ १०५ ॥

गोत्र इत्येव। गर्गादिभ्यो गोत्रापत्ये यञ् प्रत्ययो भवति। गार्ग्यः। वात्स्यः। मनुशब्दोऽत्र पठ्यते। तत्र कथं मानवी प्रजा ? गोत्र इत्युच्यते। अपत्यसामान्ये भविष्यति। कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्य इति ? गोत्ररूपाध्यारोपेण भविष्यति। अनन्तरापत्यविवक्षायां तु ऋष्यणैव भवितव्यं जामदग्नः, पाराशर इति॥ गर्ग। वत्स। वाजासे (ग० सू० ६८)। संकृति। अज। व्याघ्रपात्। विदभृत्। प्राचीनयोग। अगस्ति। पुलस्ति। रेभ। अग्निवेश। शङ्ख। शठ। धूम। अवट। चमस। धनंजय। मनस। वृक्ष। विश्वावसु। जनमान। लोहित। शंसित। बभ्रु। मण्डु। मक्षु। अलिगु। शङ्कु। लिगु। गुलु। मन्तु। जिगीषु। मनु। तन्तु। मनायी। भूत। कथक। कष। तण्ड। वतण्ड। कपि। कत। कुरुकत। अनडुह्। कण्व। शकल। गोकक्ष। अगस्त्य। कुण्डिनी। यज्ञवल्क। उभय। जात। विरोहित। वृषगण। रहूगण। शण्डिल। वण। कचुलुक। मुद्गल। मुसल। पराशर। जतूकर्ण। मन्त्रित। संहित। अश्मरथ। शर्कराक्ष। पूतिमाष। स्थूण। अररक। पिङ्गल। कृष्ण। गोलुन्द। उलूक। तितिक्ष। भिषज्। भडित। भण्डित। दल्भ। चिकित। देवहू। इन्द्रहू। एकलू। पिप्पलू। वृदग्नि। जमदग्नि। सुलोभिन्। उकत्थ। कुटीगु॥

मधुबभ्रूवोर्ब्राह्मणकौशिकयोः॥ १०६ ॥

मधुशब्दाद् बभ्रुशब्दात् च गोत्रापत्ये यञ् प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके वाच्ये। माधव्यो भवति ब्राह्मणश्चेत्। माधव एवान्यः। बाभ्रव्यो भवति कौशिकश्चेत्। बाभ्रव एवान्यः। बभ्रुशब्दो गर्गादिषु पठ्यते, ततः सिद्धे यञि कौशिके नियमार्थं वचनम्। गर्गादिषु पाठोऽप्यन्तर्गणकार्यार्थः। 'सर्वत्र लोहितादिकतन्तेभ्यः' (४.१.१८) इति। बाभ्रव्यायणी॥

---

१ - 'कुण्डिन' इति प्रायिकः पाठः।

कपिबोधादाङ्गिरसे ॥ १०७ ॥

कपिबोधशब्दाभ्यामाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति। काप्यः। बौध्यः। आङ्गिरस इति किम् ? कापेयः। बौधिः। कपिशब्दो गर्गादिषु पठ्यते। तस्य नियमार्थं वचनम्। आङ्गिरसे यथा स्यात्। लोहितादिकार्यार्थश्च गणे पाठः। काप्यायनी॥

वतण्डाच्च ॥ १०८ ॥

आङ्गिरस इत्येव। वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति। वातण्ड्यः। आङ्गिरस इति किम् ? वातण्डः। किमर्थमिदं यावता गर्गादिष्वयं पठ्यते? शिवादिष्वप्ययं पठ्यते। तत्राङ्गिरसे शिवाद्यणोऽपवादार्थं पुनर्वचनम्। अनाङ्गिरसे तूभयत्र पाठसामर्थ्यात् प्रत्ययद्वयमपि भवति। वातण्ड्यः। वातण्डः॥

लुक् स्त्रियाम् ॥ १०९ ॥

आङ्गिरस इत्येव। वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ्प्रत्ययस्य लुग् भवति। लुकि कृते शार्ङ्गरवादिपाठाद् ङीन् भवति। वतण्डी। आङ्गिरस इति किम् ? वातण्ड्यायनी। शिवाद्यणि तु वातण्डी॥

अश्वादिभ्यः फञ् ॥ ११० ॥

आङ्गिरस इति निवृत्तम्। अश्वादिभ्यो गोत्रापत्ये फञ् प्रत्ययो भवति। आश्वायनः। आश्मायनः। ये त्वत्र प्रत्ययान्ताः पठ्यन्ते, तेभ्यः सामर्थ्याद् यूनि प्रत्ययो विज्ञायते॥ अश्व। अश्मन्। शङ्ख। बिद। पुट। रोहिण। खर्जूर। खर्जूल। पिञ्जूर। भडिल। भण्डिल। भडित। भण्डित। भण्डिक। प्रहत। रामोद। क्षत्र। ग्रीवा। काश। गोलाङ्क्य। अर्क। स्वन। ध्वन। पाद। चक्र। कुल। पवित्र। गोमिन्। श्याम। धूम। धूम्र। वाग्मिन्। विश्वानर। कुट। वेश। शप आत्रेये (ग० सू० ६६)। नत्त। तड। नड। ग्रीष्म। अर्ह। विशम्य। विशाला। गिरि। चपल। चुनम। दासक। वैल्य। धर्म। आनडुह्य। पुंसिजात। अर्जुन। शूद्रक। सुमनस्। दुर्मनस्। क्षान्त। प्राच्य। कित। काण। चुम्प। श्रविष्ठा। वीक्ष्य। पविन्दा। आत्रेय भारद्वाजे (ग० सू० ७०)। कुत्स। आतव। कितव। शिव। खदिर। भारद्वाज आत्रेये (ग० सू० ७१)॥

भर्गात् त्रैगर्ते ॥ १११ ॥

भर्गशब्दादपत्ये विशेषे त्रैगर्ते गोत्रे फञ् प्रत्ययो भवति। भार्गायणो भवति त्रैगर्तश्चेत्। भार्गिरन्यः॥

शिवादिभ्योऽण् ॥ ११२ ॥

गोत्र इति निवृत्तम्। अतः प्रभृति सामान्येन प्रत्यया विज्ञायन्ते। शिवादिभ्योऽपत्येऽण् प्रत्ययो भवति। यथायथमित्रादीनामपवादः। शैवः। प्रौष्ठः। तक्षन्शब्दोऽत्र पठ्यते कारिलक्षणमुदीचामित्रं (४.१.१५३) बाधितुम्। ण्यप्रत्ययस्य (४.१.१५२) तु बाधो नेष्यते। ताक्ष्णः। ताक्षण्यः। गङ्गाशब्दः पठ्यते तिकादिफिञा शुभ्रादिढका च समावेशार्थम्। तेन त्रैरूप्यं भवति। गाङ्गः, गाङ्गायनिः, गाङ्गेयः। विपाशशब्दः पठ्यते कुञ्जादिलक्षणेन च्फञा समावेशार्थम्। वैपाशः, वैपाशायन्यः॥ शिव। प्रौष्ठ। प्रौष्ठिक। चण्ड। जम्भ। मुनि। सन्धि। भूरि। कुठार। अनभिम्लान। ककुत्स्थ। कहोड। लेख। रोध। खञ्जन। कोहड। पिष्ट। हेहय। खञ्जार। खञ्जाल। सुरोहिका । पर्ण। कहूष। परिल। वतण्ड। तृण। कर्ण। क्षीरह्रद। जलह्रद। परिषिक। जटिलिक। गोफिलिक। बधिरिका। मञ्जीरक। वृष्णिक। रेख। आलेखन। विश्रवण। रवण। वर्तनाक्ष। पिटक। पिटाक। तृक्षाक। नभाक। ऊर्णनाभ। जरत्कारु। उत्क्षिपा। रोहितिक। आर्यश्वेत। सुपिष्ट। खर्जूरकर्ण। मसूरकर्ण। तूणकर्ण। मयूरकर्ण। खडरक। तक्षन्। ऋष्टिषेण। गङ्गा। विपाश। यस्क। लह्य। द्रुघ। अयःस्थूण। भलन्दन। विरूपाक्ष। भूमि। इला। सपत्नी। द्व्यचो नद्याः (ग० सू० ७२)। त्रिवेणी त्रिवणं च (ग० सू० ७३)॥

अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥ ११३ ॥

'वृद्धिर्यस्याचामादिस्तद् वृद्धम्' (१.१.७३)। अवृद्धाभ्य इति शब्दधर्मः, नदीमानुषीभ्य इत्यर्थधर्मः, तेनाभेदात् प्रकृतयो निर्दिश्यन्ते। तन्नामिकाभ्य इति सर्वनाम्ना प्रत्ययप्रकृतेः परामर्शः। अवृद्धानि यानि नदीनां मानुषीणां च नामधेयानि, तेभ्योऽपत्येऽण् प्रत्ययो भवति। ढकोऽपवादः। यमुनाया अपत्यं यामुनः। इरावत्या अपत्यम् ऐरावतः। वैतस्तः। नार्मदः। मानुषीभ्यः खल्वपि—शिक्षिताया अपत्यं शैक्षितः। चिन्तिताया अपत्यं चैन्तितः। अवृद्धाभ्य इति किम् ? चान्द्रभागाया अपत्यं चान्द्रभागेयः। वासवदत्तेयः। नदीमानुषीभ्य इति किम् ? सौपर्णेयः। वैनतेयः। तन्नामिकाभ्य इति किम् ? शोभनायाः शौभनेयः॥

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥

ऋषयः प्रसिद्धा वसिष्ठादयः। अन्धका वृष्णयः कुरव इति वंशाख्याः। ऋष्यादिकुर्वन्तेभ्यः प्रातिपदिकेभ्योऽपत्येऽण् प्रत्ययो भवति। इञोऽपवादः। अत्र्यादिभ्यस्तु

---

१ - 'चन्द्रभागाया' इति है०। 'चान्द्रभाग्याया' इति बाल०।

परत्वाड् ढगादिभिरेव भवितव्यम्। ऋषिभ्यस्तावत्—वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः—श्वाफल्कः। रान्धसः। वृष्णिभ्यः—वासुदेवः। आनिरुद्धः। कुरुभ्यः—नाकुलः। साहदेवः। कथं पुनर्नित्यानां शब्दानामन्धकादिवंशसमाश्रयणेनान्वाख्यानं युज्यते ? केचिदाहुः—कथमपि काकतालीयन्यायेन कुर्वादिवंशेष्वसंकरेणैव नकुलसहदेवादयः शब्दास्सुबहवः संकलिताः, तानुपादाय पाणिनिना स्मृतिरुपनिबद्धेति। अथवान्धकवृष्णिकुरुवंशा अपि नित्या एव, तेषु ये शब्दाः प्रयुज्यन्ते नकुलसहदेवादयः, तत्रेदं प्रत्ययविधानमित्यदोषः॥

मातुरुत् संख्यासंभद्रपूर्वायाः ॥ ११५ ॥

मातृशब्दात् संख्यापूर्वात् संपूर्वाद् भद्रपूर्वात् चापत्येऽण् प्रत्ययो भवति, उकारश्चान्तादेशः। द्वयोर्मात्रोरपत्यं द्वैमातुरः। षाण्मातुरः। सांमातुरः। भाद्रमातुरः। उकारादेशार्थं वचनम्, प्रत्ययः पुनरुत्सर्गेणैव सिद्धः। स्त्रीलिङ्गनिर्देशोऽर्थापेक्षः, तेन धान्यमातुर्ग्रहणं न भवति। संख्यासंभद्रपूर्वाया इति किम् ? सौमात्रः॥

कन्यायाः कनीन च ॥ ११६ ॥

कन्याशब्दादपत्येऽण् प्रत्ययो भवति। ढकोऽपवादः। तत्सन्नियोगेन कनीनशब्द आदेशो भवति। कन्याया अपत्यं कानीनः कर्णः। कानीनो व्यासः॥

विकर्णशुङ्गच्छगलाद् वत्सभरद्वाजात्रिषु ॥ ११७ ॥

विकर्णशुङ्गच्छगलशब्देभ्यो यथासंख्यं वत्सभरद्वाजात्रिष्वपत्यविशेषेष्वण् प्रत्ययो भवति। वैकर्णो भवति वात्स्यश्चेत्। वैकर्णिरन्यः। शौङ्गो भवति भारद्वाजश्चेत्। शौङ्गिरन्यः। छागलो भवत्यात्रेयश्चेत्। छागलिरन्यः। शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति शौङ्गेय इति। द्वयमपि चैतत् प्रमाणमुभयथा सूत्रप्रणयनात्॥

पीलाया वा ॥ ११८ ॥

तन्नामिकाणो बाधके 'द्व्यचः' (४.१.१२१) इति ढकि प्राप्तेऽण् प्रत्ययः पक्षे विधीयते। पीलाया अपत्ये वाण् प्रत्ययो भवति। पीलाया अपत्यं पैलः, पैलेयः॥

ढक् च मण्डूकात् ॥ ११९ ॥

मण्डूकशब्दादपत्ये ढक् प्रत्ययो भवति। चकारादण् च वा। तेन त्रैरूप्यं भवति। माण्डूकेयः, माण्डूकः, माण्डूकिः॥

---

१ - 'शुभ्रादिषु पाठात् तु वैमात्रेयः' इति बाल० अधिकम्।

स्त्रीभ्यो ढक् ॥ १२० ॥

इह स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते। स्त्रीभ्योऽपत्ये ढक् प्रत्ययो भवति। सौपर्णेयः। वैनतेयः। स्त्रीप्रत्ययविज्ञापनादसत्यर्थग्रहण इह न भवति—इडबिडोऽपत्यं दरदोऽपत्यम्, ऐडबिडः, दारद इति ॥ वडवाया वृषे वाच्ये॥ वाडवेयो वृषः स्मृतः। अपत्ये प्राप्तस्ततोऽपकृष्य विधीयते, तेनापत्ये वाडव इति भवति ॥ अण् क्रुञ्चाकोकिलात् स्मृतः॥ क्रुञ्चाया अपत्यं क्रौञ्चः। कौकिलः॥

द्व्यचः ॥ १२१ ॥

स्त्रीभ्य इत्येव। द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक् प्रत्ययो भवति। तन्नामिकाणोऽपवादः। दत्ताया अपत्यं दात्तेयः। गौपेयः। द्व्यच इति किम् ? यामुनः॥

इतश्चानिञः ॥ १२२ ॥

स्त्रीग्रहणं निवृत्तम्। चकारो द्व्यच इत्यस्यानुकर्षणार्थः। इकारान्तात् प्रातिपदिकादनिञन्तादपत्ये ढक् प्रत्ययो भवति। आत्रेयः। नैधेयः। इत इति किम् ? दाक्षिः। प्लाक्षिः। अनिञ इति किम् ? दाक्षायणः। प्लाक्षायणः। द्व्यच इत्येव—मरीचेरपत्यं मारीचः॥

शुभ्रादिभ्यश्च ॥ १२३ ॥

शुभ्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो ढक् प्रत्ययो भवति। यथायोगमिञादीनामपवादः। शौभ्रेयः। वैष्टपुरेयः। चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति। तेन गाङ्गेयः पाण्डवेय इत्येवमादि सिद्धं भवति॥ शुभ्र। विष्टपुर। ब्रह्मकृत। शतद्वार। शतावर। शलाका। शालाचल। शलाकाभ्रू। लेखाभ्रू। विमातृ। विधवा। किंकसा। रोहिणी। रुक्मिणी। दिशा। शालूक। अजबस्ति। शकन्धि। लक्षणश्यामयोर्वासिष्ठे (ग० सू० ७४)। गोधा। कृकलास। अणीव। प्रवाहण। भरत। भारम। मृकण्डु। मघष्टु। मकष्टु। कर्पूर। इतर। अन्यतर। आलीढ। सुदत्त। सुचक्षस्। सुनामन्। कद्रु। तुद। अकशाप। कुमारिका। किशोरिका। कुवेणिका। जिह्माशिन्। परिधि। वायुदत्त। ककल। खट्वा। अम्बिका। अशोका। शुद्धपिङ्गला। खडोन्मत्ता। अनुदृष्टि। जरतिन्। बलिवर्दिन्। विग्रज। बीज। श्वन्। अश्मन्। अश्व। अजिर॥

विकर्णकुषीतकात् काश्यपे ॥ १२४ ॥

विकर्णशब्दात् कुषीतकशब्दात् च काश्यपेऽपत्यविशेषे ढक् प्रत्ययो भवति।

वैकर्णेयः। कौषीतकेयः। काश्यप इति किम् ? वैकर्णिः। कौषीतकिः॥

भ्रुवो वुक् च ॥ १२५ ॥

भ्रूशब्दादपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वुगागमः। भ्रौवेयः॥

कल्याण्यादीनामिनङ् ॥ १२६ ॥

कल्याणी इत्येवमादीनां शब्दानामपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन चेनङादेशः। स्त्रीप्रत्ययान्तानामादेशार्थं ग्रहणम्, प्रत्ययस्य सिद्धत्वाद्, अन्येषामुभयार्थम्। काल्याणिनेयः। सौभागिनेयः। दौर्भागिनेयः। 'हृद्भगसिन्ध्वन्ते०' (७.३.१६) इत्युभयपदवृद्धिः॥ कल्याणी। सुभगा। दुर्भगा। बन्धकी। अनुदृष्टि। अनुसृष्टि। जरती। बलीवर्दी। ज्येष्ठा। कनिष्ठा। मध्यमा। परस्त्री॥

कुलटाया वा ॥ १२७ ॥

कुलान्यटतीति, कुलटा। पररूपं निपातनात्। कुलटाया अपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वेनङादेशो भवति। आदेशार्थं वचनम्, प्रत्ययश्च पूर्वेणैव सिद्धः। कौलटिनेयः, कौलटेयः। या तु कुलान्यटन्ती शीलं भिनत्ति, ततः 'क्षुद्राभ्यो वा' (४.१.१३१) इति परत्वाड् ढ्रका भवितव्यम्। कौलटेरः॥

चटकाया ऐरक् ॥ १२८ ॥

चटकाया अपत्य ऐरक् प्रत्ययो भवति। चाटकैरः ॥ चटकाच्चेति वक्तव्यम्॥ चटकस्यापत्यं चाटकैरः ॥ स्त्रियामपत्ये लुगू वक्तव्यः॥ चटकाया अपत्यं स्त्री चटका॥

गोधाया ढ्रक् ॥ १२९ ॥

गोधाया अपत्ये ढ्रक् प्रत्ययो भवति। गौधेरः। शुभ्रादिष्वयं पठ्यते। तेन गौधेयोऽपि भवति॥

आरगुदीचाम् ॥ १३० ॥

गोधाया अपत्य उदीचामाचार्याणां मतेनारक् प्रत्ययो भवति। गौधारः। आचार्यग्रहणं पूजार्थम्, वचनसामर्थ्यादेव पूर्वेण समावेशो भविष्यति। आरग्वचनमनर्थकम्, रका सिद्धत्वात् ? ज्ञापकं त्वयमन्येभ्योऽपि भवतीति। जाडारः। पाण्डारः॥

क्षुद्राभ्यो वा ॥ १३१ ॥

द्रगनुवर्तते, न आरक्। क्षुद्रा अङ्गहीनाः शीलहीनाश्च। अर्थधर्मेण तदभिधायिन्यः स्त्रीलिङ्गाः प्रकृतयो निर्दिश्यन्ते। क्षुद्राभ्यो वापत्ये द्रक् प्रत्ययो भवति। ढकोऽपवादः। काणेरः, काणेयः। दासेरः, दासेयः॥

पितृष्वसुश्छण् ॥ १३२ ॥

पितृष्वसृशब्दादपत्ये छण् प्रत्ययो भवति। अणोऽपवादः। पैतृष्वस्रीयः॥

ढकि लोपः ॥ १३३ ॥

पितृष्वसुरपत्यप्रत्यये ढकि परतो लोपो भवति। पैतृष्वसेयः। कथं पुनरिह ढक् प्रत्ययः ? एतदेव ज्ञापकं ढको भावस्य॥

मातृष्वसुश्च ॥ १३४ ॥

पितृष्वसुरित्येतदपेक्षते, पितृष्वसुर्यदुक्तं तद् मातृष्वसुरपि भवति। छण्प्रत्ययो ढकि लोपश्च। मातृष्वस्रीयः, मातृष्वसेयः॥

चतुष्पाद्भ्यो ढञ् ॥ १३५ ॥

चतुष्पादभिधायिनीभ्यः प्रकृतिभ्योऽपत्ये ढञ् प्रत्ययो भवति। अणादीनामपवादः। कामण्डलेयः। शौन्तिबाहेयः। जाम्बेयः॥

गृष्ट्यादिभ्यश्च ॥ १३६ ॥

गृष्ट्यादिभ्यः शब्देभ्योऽपत्ये ढञ् प्रत्ययो भवति। अणादीनामपवादः। गार्ष्टेयः। हार्ष्टेयः। गृष्टिशब्दो यश्चतुष्पाद्वचनः, ततः पूर्वेणैव सिद्धः। अचतुष्पादर्थं वचनम्॥ गृष्टि। हृष्टि। हलि। बलि। विश्रि। कुद्रि। अजबस्ति। मित्रयु॥

राजश्वशुराद् यत् ॥ १३७ ॥

राजन्श्वशुरशब्दाभ्यामपत्ये यत् प्रत्ययो भवति। यथाक्रममणिञोरपवादः। राजन्यः। श्वशुर्यः ॥ राज्ञोऽपत्ये जातिग्रहणम्॥ राजन्यो भवति क्षत्रियजातिश्चेत्। राजनोऽन्यः॥

---

१ - ' धर्महीनाश्च ' इति बाल०।

क्षत्राद् घः ॥ १३८ ॥

क्षत्रशब्दादपत्ये घः प्रत्ययो भवति। क्षत्रियः। अयमपि जातिशब्द एव। क्षात्रिरन्यः॥

कुलात् खः ॥ १३९ ॥

उत्तरसूत्रे पूर्वपदप्रतिषेधादिह तदन्तः केवलश्च दृश्यते। कुलशब्दान्तात् प्रातिपदिकात् केवलाच्चापत्ये खः प्रत्ययो भवति। आढ्यकुलीनः। श्रोत्रियकुलीनः। कुलीनः॥

अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥ १४० ॥

कुलादित्येव। अविद्यमानं पूर्वपदं यस्य तदपूर्वपदम्। समाससंबन्धिपूर्वपदस्याभावेन कुलशब्दो विशेष्यते। अपूर्वपदात् कुलशब्दादन्यतरस्यां यत् ढकञ् इत्येतौ प्रत्ययौ भवतः। ताभ्यां मुक्ते खोऽपि भवति। कुल्यः, कौलेयकः, कुलीनः। पदग्रहणं किम् ? बहुच्पूर्वादपि यथा स्यात्। बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः॥

महाकुलादञ्खञौ ॥ १४१ ॥

अन्यतरस्यामित्यनुवर्तते। महाकुलशब्दाद् अञ्खञौ प्रत्ययौ भवतः। पक्षे खः। माहाकुलः। माहाकुलीनः। महाकुलीनः॥

दुष्कुलाड् ढक् ॥ १४२ ॥

दुष्कुलशब्दादपत्ये ढक् प्रत्ययो भवति। अन्यतरस्यामित्यनुवृत्तेः खश्च। दौष्कुलेयः। दुष्कुलीनः॥

स्वसुश्छः ॥ १४३ ॥

स्वसृशब्दादपत्ये छः प्रत्ययो भवति। अणोऽपवादः। स्वसुरपत्यं स्वस्रीयः॥

भ्रातुर्व्यच्च ॥ १४४ ॥

भ्रातृशब्दादपत्ये व्यत् प्रत्ययो भवति। चकाराच्छश्च। अणोऽपवादः। भ्रातृव्यः। भ्रात्रीयः। तकारः स्वरार्थः॥

व्यन् सपत्ने ॥ १४५ ॥

सपत्नशब्दः शत्रुपर्यायः शब्दान्तरमव्युत्पन्नमेव। सपत्नीशब्दादपरेऽकारमिवार्थे निपातयन्ति। सपत्नीव सपत्नः। भ्रातृशब्दाद् व्यन् प्रत्ययो भवति, समुदायेन चेदमित्रः

सपत्न उच्यते। अपत्यार्थोऽत्र नास्त्येव। पाप्मना भ्रातृव्येण (तै० सं० २.२.१.२)। भ्रातृव्यः कण्टकः॥

रेवत्यादिभ्यष्ठक् ॥ १४६ ॥

रेवतीत्येवमादिभ्योऽपत्ये ठक् प्रत्ययो भवति। यथायोगं ढगादीनामपवादः। रैवतिकः। आश्वपालिकः॥ रेवती। अश्वपाली। मणिपाली। द्वारपाली। वृकवञ्चिन्। वृकग्राह। कर्णग्राह। दण्डग्राह। कुक्कुटाक्ष॥

गोत्रस्त्रियाः कुत्सने ण च ॥ १४७ ॥

'अपत्यं पौत्रप्रभृति गोत्रम्' (४.१.१६२) गृह्यते। गोत्रं या स्त्री तदभिधायिनः शब्दादपत्ये णः प्रत्ययो भवति, चकारात् ठक् च, कुत्सने गम्यमाने। पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा। गार्ग्या अपत्यं गार्गो जाल्मः। गार्गिकः। ग्लुचुकायन्या अपत्यं ग्लौचुकायनः। ग्लौचुकायनिकः। 'गोत्राद् यूनि०' (४.१.६४) इति यूनि प्रत्ययो भवति। गोत्रमिति किम् ? कारिकेयो जाल्मः। स्त्रिया इति किम् ? औपगविर्जाल्मः। कुत्सन इति किम् ? गार्गेयो माणवकः॥

वृद्धाट् ठक् सौवीरेषु बहुलम् ॥ १४८ ॥

कुत्सन इत्येव। सौवीरेष्विति प्रकृतिविशेषणम्। वृद्धात् सौवीरगोत्रादपत्ये बहुलं ठक् प्रत्ययो भवति कुत्सने गम्यमाने। भागवित्तेर्भागवित्तिकः। तार्णबिन्दवस्य तार्णबिन्द- विकः। पक्षे यथाप्राप्तं फक्। भागवित्तायनः। पक्षे तार्णबिन्दविः। अकशापः शुभ्रादिः—आकशापेयः। तस्यापत्यम् आकशापेयिकः। पक्ष आकशापेयिः।

भागपूर्वपदो वित्तिर्द्वितीयस्तार्णबिन्दवः।
तृतीयस्त्वाकशापेयो गोत्राट् ठग् बहुलं ततः॥

वृद्धग्रहणं स्त्रीनिवृत्त्यर्थम्। सौवीरेष्विति किम् ? औपगविर्जाल्मः। कुत्सन इत्येव—भागवित्तायनो माणवकः। बहुलग्रहणमुपाधिवैचित्र्यार्थम्। गोत्रस्त्रिया इत्यारभ्य चत्वारो योगास्तेषु प्रथमः कुत्सन एव, अन्त्यः सौवीरगोत्र एव, मध्यमौ द्वयोरपि। तदेतद् बहुलग्रहणात् लभ्यते॥

फेश्छ च ॥ १४९ ॥

कुत्सन इत्येव, सौवीरेष्विति च। फेरिति फिञो ग्रहणं न फिनः, वृद्धाधिकारात्। फिञन्तात् प्रातिपदिकात् सौवीरगोत्रादपत्ये छः प्रत्ययो भवति, चकाराट् ठक्, कुत्सने गम्यमाने। यमुन्दस्यापत्यम्, 'तिकादिभ्यः फिञ्' (४.१.१५४)। तस्यापत्यं यामुन्दायनीयः,

यामुन्दायनिकः। कुत्सन इत्येव—यामुन्दायनिः। फिञन्तादौत्सर्गिकस्याण आगतस्य 'ण्यक्षत्रियार्षञित०' (२.४.५८) इति लुक्। सौवीरेष्वित्येव—तैकायनिः।

यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृताः।
सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत्॥

फाण्टाहृतिमिमताभ्यां णफिञौ ॥ १५० ॥

सौवीरेष्वित्येव। कुत्सन इति निवृत्तम्। फाण्टाहृतिमिमतशब्दाभ्यां सौवीरविषयाभ्यामपत्ये णफिञौ प्रत्ययौ भवतः। फकोऽपवादः। अल्पाच्तरस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नम्, तेन यथासंख्यमिह न भवतीति। फाण्टाहृतः, फाण्टाहृतायनिः। मैमतः, मैमतायनिः। सौवीरेष्वित्येव—फाण्टाहृतायनः। मैमतायनः। फाण्टाहृतेः 'यञिञोश्च' (४.१.१०१) इति फक्। मिमतशब्दोऽपि नडादिषु पठ्यते॥

कुर्वादिभ्यो ण्यः ॥ १५१ ॥

सौवीरेषु बहुलमिति निवृत्तम्। कुरु इत्येवमादिभ्यः शब्देभ्योऽपत्ये ण्यः प्रत्ययो भवति। कौरव्यः। गार्ग्यः। 'कुरुनादिभ्यो ण्यः' (४.१.१७२) इति कुरुशब्दादपरो ण्यप्रत्ययो भविष्यति। स तु क्षत्रियात् तद्राजसंज्ञकः तस्य बहुषु लुका भवितव्यम्, अयं तु श्रूयत एव। कौरव्याः। कौरव्यशब्दस्य क्षत्रियवचनस्य तिकादिषु पाठात् फिञपि भवति। कौरव्यायणिः। रथकारशब्दोऽत्र पठ्यते, स जातिवचनः। त्रैवर्णिकेभ्यः किंचिन्न्यूना रथकारजातिः। कारिणस्तु रथकारशब्दादुत्तरसूत्रेणैव ण्यः सिद्धः। केशिनीशब्दः पठ्यते, तस्य कैशिन्यः। पुंवद्भावो न भवति, स्त्रीप्रत्ययनिर्देशसामर्थ्यात्। 'वेनाच्छन्दसि' (ग० सू० ७६) इति पठ्यते। कथं भाषायां वैन्यो राजेति ? छान्दस एवायं प्रमादात् कविभिः प्रयुक्तः। वामरथशब्दः पठ्यते, तस्य कण्वादिवत् कार्यमिष्यते, स्वरं वर्जयित्वा लुगादिक- मतिदिश्यते। बहुषु वामरथाः। स्त्री वामरथी। वामरथ्यायनी। युवा वामरथ्यायनः। वामरथ्यस्य छात्रा वामरथाः। वामरथानि सङ्गाङ्कलक्षणानि। स्वरस्तु ण्यप्रत्ययस्यैव भवति, नातिदेशिकमाद्युदात्तत्वम्॥ कुरु। गर्ग। मङ्गुष। अजमारक। रथकार। वावदूक। सम्राजः क्षत्रिये (ग० सू० ७५)। कवि। मति। वाक्। पितृमत्। इन्द्रजालि। दामोष्णीषि। गणकारि। कैशोरि। कापिञ्जलादि। कुट। शलाका। मुर। एरक। अभ्र। दर्भ। केशिनी। वेनाच्छन्दसि (ग० सू० ७६) । शूर्पणाय। श्यावनाय। श्यावरथ। श्यावपुत्र। सत्यंकार। वडभीकार। शङ्कु। शाक। पथिकारिन्। मूढ। शकन्धु। कर्तृ। हर्तृ। शाकिन्। इनपिण्डी। वामरथस्य कण्वादिवत् स्वरवर्जम् (ग० सू० ७७)॥

सेनान्तलक्षणकारिभ्यश्च ॥ १५२ ॥

सेनान्तात् प्रातिपदिकात् लक्षणशब्दात् कारिवचनेभ्यश्चापत्ये ण्यः प्रत्ययो भवति। कारिशब्दः कारूणां तन्तुवायादीनां वाचकः। कारिषेण्यः। हारिषेण्यः। लाक्षण्यः। कारिभ्यः—तान्तुवाय्यः। कौम्भकार्यः। नापित्यः॥

उदीचामिञ् ॥ १५३ ॥

ण्ये प्राप्त इञपरो विधीयते। सेनान्तलक्षणकारिभ्योऽपत्य इञ् प्रत्ययो भवत्युदीचां मतेन। कारिषेणिः। हारिषेणिः। लाक्षणिः। तान्तुवायिः। कौम्भकारिः।वचनसामर्थ्यादेव प्रत्ययसमावेशे लब्ध आचार्यग्रहणं वैचित्र्यार्थम्। तक्षन्शब्दः शिवादिः, तेनाणायमिञ् बाध्यते, न तु ण्यः। तक्ष्णोऽपत्यं ताक्ष्णः। ताक्षण्यः॥

तिकादिभ्यः फिञ् ॥ १५४ ॥

तिक इत्येवमादिभ्यः शब्देभ्योऽपत्ये फिञ् प्रत्ययो भवति। तैकायनिः। कैतवायनिः। वृषशब्दोऽत्र पठ्यते, तस्य प्रत्ययसन्नियोगेन यकारान्तत्वमिष्यते। वार्ष्यायणिः। कौरव्यशब्दः पठ्यते, स च क्षत्रियवचनः, औरसशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात्। यस्तु 'कुर्वादिभ्यो ण्यः' (४.१.१५१), तदन्तादू इञैव भवितव्यम्। तथा च 'ण्यक्षत्रियार्षञितः०' (२.४.५८) इत्यत्रोदाहृतं कौरव्यः पिता, कौरव्यः पुत्र इति॥ तिक। कितव। संज्ञा। बाल। शिखा। उरस्। शाट्य। सैन्धव। यमुन्द। रूप्य। ग्राम्य। नील। अमित्र। गौकक्ष्य। कुरु। देवरथ। तैतिल। औरस। कौरव्य। भौरिकि। भौलिकि। चौपयत। चैतयत। चैटयत। शैकयत। क्षैतयत। ध्वाजवत। चन्द्रमस्। शुभ। गङ्गा। वरेण्य। सुयामन्। आरद। वह्यका। खल्या। वृष। लोमका। उदन्य। यज्ञ॥

कौसल्यकार्मार्याभ्यां च ॥ १५५ ॥

कौसल्यकार्मार्यशब्दाभ्यामपत्ये फिञ् प्रत्ययो भवति। इञोऽपवादः। कौसल्यायनिः। कार्मार्यायणिः। परमप्रकृतेरेवायं प्रत्यय इष्यते—कोसलस्यापत्यं कर्मारस्यापत्यमिति। प्रत्ययसन्नियोगेन तु प्रकृतिरूपं निपात्यते। तथा च स्मृत्यन्तरम्—दगुकोसलकर्मारच्छागवृषाणां युट् वादिष्टस्येति। दागव्यायनिः। कौसल्यायनिः। कार्मार्यायणिः। छाग्यायनिः। वार्ष्यायणिः॥

अणो द्व्यचः ॥ १५६ ॥

अणन्तादू द्व्यचः प्रातिपदिकादपत्ये फिञ् प्रत्ययो भवति। इञोऽपवादः। कात्र्यायणिः।

हार्त्रायणिः। अण इति किम् ? दाक्षायणः। द्व्यच इति किम् ? औपगविः ॥ त्यदादीनां वा फिञ् वक्तव्यः॥ त्यादायनिः, त्यादः। यादायनिः, यादः। तादायनिः, तादः। अणत्र प्राप्तः॥

उदीचां वृद्धादगोत्रात् ॥ १५७ ॥

वृद्धं यच्छब्दरूपमगोत्रम्, तस्मादपत्ये फिञ् प्रत्ययो भवत्युदीचामाचार्याणां मतेन। आम्रगुप्तायनिः। ग्रामरक्षायणिः। कारिशब्दादपि वृद्धादगोत्रात् परत्वादनेनैव भवितव्यम्। नापितायनिः। उदीचामिति किम् ? आम्रगुप्तिः। वृद्धादिति किम् ? याज्ञदत्तिः। अगोत्रादिति किम् ? औपगविः॥

वाकिनादीनां कुक् च ॥ १५८ ॥

वाकिन इत्येवमादिभ्यः शब्देभ्योऽपत्ये फिञ् प्रत्ययो भवति, तत्सन्नियोगेन चैषां कुगागमः। यदिह वृद्धमगोत्रं शब्दरूपं तस्यागमार्थमेव ग्रहणम्, अन्येषामुभयार्थम्। वाकिनकायनिः। गारेधकायनिः। इञाद्यपवादो योगः। उदीचामित्यधिकारात् पक्षे तेऽपि भवन्ति। वाकिनिः। गारेधिः॥ वाकिन। गारेध। कार्कट्य। काक। लङ्का। चर्मिवर्मिणोर्नलोपश्च (ग० सू० ७८)॥

पुत्रान्तादन्यतरस्याम् ॥ १५९ ॥

उदीचां वृद्धादिति वर्तते। पुत्रान्तमगोत्रमिति पूर्वेणैव प्रत्ययः सिद्धः, तस्मिन्ननेन कुगागमोऽन्यतरस्यां विधीयते। पुत्रान्तात् प्रातिपदिकाद् यः फिञ् प्रत्ययः, तस्मिन् परभूतेऽन्यतरस्यां कुगागमो भवति पुत्रान्तस्य। तेन त्रैरूप्यं संपद्यते। गार्गीपुत्रकायणिः, गार्गीपुत्रायणिः, गार्गीपुत्रिः। वात्सीपुत्रकायणिः, वात्सीपुत्रायणिः, वात्सीपुत्रिः॥

प्राचामवृद्धात् फिन् बहुलम् ॥ १६० ॥

अवृद्धाच्छब्दरूपादपत्ये फिन् प्रत्ययो भवति बहुलं प्राचां मतेन। ग्लुचुकायनिः। अहिचुम्बकायनिः। प्राचामिति किम्? ग्लौचुकिः। अवृद्धादिति किम् ? राजदन्तिः। उदीचां प्राचामन्यतरस्यां बहुलमिति सर्व एते विकल्पार्थास्तेषामेकेनैव सिध्यति। तत्राचार्य-ग्रहणं पूजार्थम्। बहुलग्रहणं वैचित्र्यार्थम्। क्वचिन्न भवत्येव — दाक्षिः। प्लाक्षिः॥

मनोर्जातावञ्यतौ षुक् च ॥ १६१ ॥

मनुशब्दादञ् यत् इत्येतौ प्रत्ययौ भवतः, तत्सन्नियोगेन षुगागमः, समुदायेन

चेजू जातिर्गम्यते। मानुषः, मनुष्यः। जातिशब्दावेतौ। अपत्यार्थोऽत्र नास्त्येव। तथा च मानुषा इति बहुषु न लुग् भवति। अपत्यविवक्षायां त्वणैव भवितव्यम्। मानवी प्रजा।

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः॥

अपत्यं पौत्रप्रभृति गोत्रम् ॥ १६२ ॥

पौत्रप्रभृति यदपत्यं तद् गोत्रसंज्ञं भवति। संबन्धिशब्दत्वादपत्यशब्दस्य यस्य यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसंज्ञा विधीयते। गर्गस्यापत्यं पौत्रप्रभृति गार्ग्यः। वात्स्यः। अपत्यमिति व्यपदेशाय पौत्रप्रभृतेः। पौत्रप्रभृतीति किम् ? अन्यस्य मा भूत्—कौञ्जिः। गार्गिः। गोत्रप्रदेशाः—'एको गोत्रे' (४.१.९३) इत्येवमादयः॥

जीवति तु वंश्ये युवा ॥ १६३ ॥

अभिजनप्रबन्धो वंशः। तत्र भवो वंश्यः पित्रादिः। तस्मिन् जीवति सति पौत्रप्रभृत्यपत्यं युवसंज्ञं भवति। पौत्रप्रभृतीति च न सामानाधिकरण्येनापत्यं विशेषयति। किं तर्हि ? षष्ठ्या विपरिणम्यते पौत्रप्रभृतेर्यदपत्यमिति। तेन चतुर्थादारभ्य युवसंज्ञा विधीयते। गार्ग्यायणः। वात्स्यायनः। तुशब्दोऽवधारणार्थः—युवैव न गोत्रमिति॥

भ्रातरि च ज्यायसि ॥ १६४ ॥

भ्रातरि ज्यायसि जीवति कनीयान् भ्राता युवसंज्ञो भवति पौत्रप्रभृतेरपत्यम्। गार्ग्यस्य द्वौ पुत्रौ, तयोः कनीयान् मृते पित्रादौ वंश्ये भ्रातरि ज्यायसि जीवति युवसंज्ञो भवति। अवंश्यार्थोऽयमारम्भः। पूर्वजाः पित्रादयो वंश्या इत्युच्यन्ते। भ्राता तु न वंश्यः, अकारणत्वात्। गार्ग्ये जीवति गार्ग्यायणोऽस्य कनीयान् भ्राता। वात्स्यायनः। दाक्षायणः। प्लाक्षायणः॥

वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥ १६५ ॥

सप्तमपुरुषावधयः सपिण्डाः स्मर्यन्ते। येषाम् ' उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ' (द्र० - मनु० ५.६१) इत्येवमादिकायां क्रियायामनधिकारः। भ्रातुरन्यस्मिन् सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा भवति। प्रकृतं जीवतिग्रहणं सपिण्डस्य विशेषणम्, इदं तु संज्ञिनः। तरब्निर्देश उभयोत्कर्षार्थः। स्थानेन वयसा चोत्कृष्टे सपिण्डे यथा स्यात्, पितृव्ये पितामहे भ्रातरि च वयसाधिके जीवति, गर्गस्यापत्यं गार्ग्यायणो गार्ग्यो वा। वात्स्यायनो वात्स्यो वा। दाक्षायणो दाक्षिर्वा। स्थविरतर इति

---

१ - ' अनन्तरस्य ' इति बाल०।

किम् ? स्थानवयोन्यूने गार्ग्य एव भवति। जीवतीति किम् ? मृते मृतो वा गार्ग्य एव भवति॥

वृद्धस्य च पूजायाम् ॥ १६६ ॥

अपत्यमन्तर्हितं वृद्धमिति शास्त्रान्तरे परिभाषणाद् गोत्रं वृद्धमित्युच्यते। वृद्धस्य युवसंज्ञा वा भवति पूजायां गम्यमानायाम्। संज्ञासामर्थ्याद् गोत्रं युवप्रत्ययेन पुनरुच्यते। वृद्धस्येति षष्ठीनिर्देशो विचित्रा सूत्रस्य कृतिरिति। तत्र भवान् गार्ग्यायणः, गार्ग्यो वा। तत्र भवान् वात्स्यायनः, वात्स्यो वा। तत्र भवान् दाक्षायणः, दाक्षिर्वा। पूजायामिति किम्? गार्ग्यः। वात्स्यः॥

यूनश्च कुत्सायाम् ॥ १६७ ॥

कुत्सायां गम्यमानायां यूनो वा युवसंज्ञा भवति। निवृत्तिप्रधानो विकल्पः। युवसंज्ञायां प्रतिषिद्धायां पक्षे गोत्रसंज्ञैव भवति, प्रतिपक्षाभावात्। गार्ग्यो जाल्मः, गार्ग्यायणो वा। वात्स्यो जाल्मः, वात्स्यायनो वा। दाक्षिर्जाल्मः, दाक्षायणो वा। कुत्सायामिति किम्? गार्ग्यायणः॥

जनपदशब्दात् क्षत्रियादञ् ॥ १६८ ॥

जनपदशब्दो यः क्षत्रियवाची, तस्मादपत्येऽञ् प्रत्ययो भवति। पाञ्चालः। ऐक्ष्वाकः। वैदेहः। जनपदशब्दादिति किम् ? द्रुह्योरपत्यं द्रौह्यवः। पौरवः। क्षत्रियादिति किम् ? ब्राह्मणस्य पञ्चालस्यापत्यं पाञ्चालिः। वैदेहिः॥ क्षत्रियसमानशब्दाज्जनपदशब्दात्तस्य राजन्यपत्यवत्॥ पञ्चालानां राजा पाञ्चालः। वैदेहः। मागधः॥

साल्वेयगान्धारिभ्यां च ॥ १६९ ॥

साल्वेयगान्धारिशब्दाभ्यामपत्येऽञ् प्रत्ययो भवति। जनपदशब्दावेतौ क्षत्रियाभिधायिनौ ताभ्यामञपवादे वृद्धादिति ञ्यङि प्राप्ते पुनरञ् विधीयते। साल्वेयः। गान्धारः। तस्य राजनीत्येव—साल्वेयो राजा। गान्धारो राजा॥

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ १७० ॥

जनपदशब्दात् क्षत्रियाभिधायिनो द्व्यचो मगध कलिङ्ग सूरमस इत्येतेभ्यश्चापत्येऽण् प्रत्ययो भवति। अञोऽपवादः। आङ्गः। वाङ्गः। पौण्ड्रः। सौह्मः। मागधः। कालिङ्गः।

---

१ – ‘ अवृद्धादपीति प्राप्तस्य वुञोऽपवादः ’ इत्यधिकं बाल०।

सौरमसः। तस्य राजनीत्येव-आङ्गो राजा॥

वृद्धेत्कोसलाजादाञ्ञ्यङ् ॥ १७१ ॥

जनपदशब्दात् क्षत्रियादित्येव। वृद्धात् प्रातिपदिकादिकारान्ताच्च कोसलाजाद-शब्दाभ्यां चापत्ये ञ्यङ् प्रत्ययो भवति। अञोऽपवादः। वृद्धात्तावत्—आम्बष्ठ्यः। सौवीर्यः। इकारान्तात्—आवन्त्यः। कौन्त्यः। कोसलाजादयोरवृद्धार्थं वचनम्। कौसल्यः। आजाद्यः। तपरकरणं किम् ? कुमारी नाम जनपदसमानशब्दः क्षत्रियः, तस्यापत्यं कौमारः ॥ पाण्डोर्जनपदशब्दात् क्षत्रियाड् ड्यण् वक्तव्यः॥ पाण्ड्यः। अन्यस्मात् पाण्डव एव। तस्य राजनीत्येव—आम्बष्ठ्यो राजा। आवन्त्यः। कौन्त्यः। कौसल्यः। आजाद्यः॥

कुरुनादिभ्यो ण्यः ॥ १७२ ॥

जनपदशब्दात् क्षत्रियादित्येव। कुरुशब्दाद् नादिभ्यश्च प्रातिपदिकेभ्यो ण्यः प्रत्ययो भवति। अणञोरपवादः। कौरव्यः। नकारादिभ्यः—नैषध्यः। नैपथ्यः। तस्य राजनीत्येव—कौरव्यो राजा॥

साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥ १७३ ॥

जनपदशब्दात् क्षत्रियादित्येव। सल्वा नाम क्षत्रिया तन्नामिका तस्या अपत्यम्, 'द्व्यचः' (४.१.१२१) इति ढक्। साल्वेयः। अणपीष्यते—साल्वः। तस्य निवासः साल्वो जनपदः। तदवयवा उदुम्बरादयः, तेभ्यः क्षत्रियवृत्तिभ्य इदं प्रत्ययविधानम्। साल्वावयवेभ्यः प्रत्यग्रथकलकूटाश्मकशब्देभ्यश्चापत्य इञ् प्रत्ययो भवति। अञोऽपवादः। औदुम्बरिः। तैलखलिः। माद्रकारिः। यौगन्धरिः। भौलिङ्गिः। शारदण्डिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। तस्य राजनीत्येव—औदुम्बरी राजा।

उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ॥

ते तद्राजाः ॥ १७४ ॥

'जनपदशब्दात् क्षत्रियादञ्' (४.१.१६८) इत्येवमादयः प्रत्ययाः सर्वनाम्ना प्रत्यव-मृश्यन्ते न तु पूर्वे, गोत्रयुवसंज्ञाकाण्डेन व्यवहितत्वात्। तेऽञादयस्तद्राजसंज्ञा भवन्ति। तथा चैवोदाहृतम्। तद्राजप्रदेशाः—'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (२.४.६२) इत्येव-मादयः॥

कम्बोजाल्लुक् ॥ १७५ ॥

'जनपदशब्दात् क्षत्रियाद्०' (४.१.१६८) इत्यनेन विहितस्याञो लुगुच्यते। कम्बो- जात् प्रत्ययस्य लुग् भवति। कम्बोजः ॥ कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम्॥ चोलः। केरलः। शकः। यवनः। तस्य राजनीत्येव—कम्बोजो राजा॥

स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ॥ १७६ ॥

अवन्तिकुन्तिकुरुशब्देभ्य उत्पन्नस्य तद्राजस्य स्त्रियामभिधेयायां लुग् भवति। अवन्तिकुन्तिभ्यां ञ्यङः, कुरोर्ण्यस्य। अवन्ती। कुन्ती। कुरूः। स्त्रियामिति किम् ? आवन्त्यः। कौन्त्यः। कौरव्यः॥

अतश्च ॥ १७७ ॥

स्त्रियामित्येव। अकारप्रत्ययस्य तद्राजस्य स्त्रियामभिधेयायां लुग् भवति। तकारो विस्पष्टार्थः। शूरसेनी। मद्री। दरत्। अवन्त्यादिभ्यो लुग्वचनात् तदन्तविधिरत्र नास्ति, तेनेह न भवति—आम्बष्ठ्या। सौवीर्या॥

न प्राच्यभर्गादियौधेयादिभ्यः ॥ १७८ ॥

प्राच्येभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य लुग् न भवति। 'अतश्च' (४.१.१७७) इत्यनेन स्त्रियां लुक् प्राप्तः प्रतिषिध्यते। प्राच्येभ्यः क्षत्रियेभ्यस्तावत्—पाञ्चाली। वैदेही। आङ्गी। वाङ्गी। मागधी। भर्गादिभ्यः—भार्गी। कारूषी। कैकेयी। यौधेयादिभ्यः—यौधेयी। शौभ्रेयी। शौक्रेयी। कस्य पुनरकारस्य प्रत्ययस्य यौधेयादिभ्यो लुक् प्राप्तः प्रतिषिध्यते ? पाञ्चमिकस्याञः 'पश्वादियौधेयादिभ्यामणञौ' (५.३.११७) इत्येतस्य। कथं पुनस्तस्य भिन्नप्रकरणस्थस्यानेन लुक् प्राप्नोति? एतदेव विज्ञापयति पाञ्चमिक- स्यापि तद्राजस्य 'अतश्च' (४.१.१७७) इत्यनेन लुग् भवतीति। किमेतस्य ज्ञापनेन प्रयोजनम्? पश्वाद्यणः स्त्रियां लुक् सिद्धो भवति। पर्शुः। रक्षाः। असुरी। तथा चोक्तम्—यौधेयादिप्रतिषेधो ज्ञापकः पश्वाद्यणो लुगिति॥ भर्ग। करूष। केकय। कश्मीर। साल्व। सुस्थाल। उरश। कौरव्य। भर्गादिः॥ यौधेय। शौभ्रेय। शौक्रेय। ज्याबाणेय। वार्तेय। धार्तेय। त्रिगर्त। भरत। उशीनर। यौधेयादिः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः ॥

---

१ - द्र० — महाभाष्य २.२७० ।

॥ चतुर्थाध्यायस्य द्वितीयः पादः ॥

तेन रक्तं रागात् ॥ १ ॥

शुक्लस्य वर्णान्तरापादानमिह रञ्जेरर्थः। रज्यतेऽनेनेति रागः। तेनेति तृतीयासमर्थाद् रागविशेषवाचिनः प्रातिपदिकाद् रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। कषायेण रक्तं वस्त्रं काषायम्। माञ्जिष्ठम्। कौसुम्भम्। रागादिति किम् ? देवदत्तेन रक्तं वस्त्रम्। कथं काषायौ गर्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य पादाविति ? उपमानाद् भविष्यति, काषायाविव काषायौ, हारिद्राविव हारिद्रौ। 'द्वैपवैयाघ्रादञ्' (४.२.१२) इति यावत् तृतीयासमर्थविभक्तिरनुवर्तते॥

लाक्षारोचनाशकलकर्दमाट् ठक् ॥ २ ॥

लाक्षादिभ्यो रागवचनेभ्यस्तृतीयासमर्थेभ्यो रक्तमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अणोऽपवादः। लाक्षया रक्तं वस्त्रं लाक्षिकम्। रौचनिकम्। शाकलिकम्। कार्दमिकम् ॥ शकलकर्दमाभ्यामणपीष्यते॥ शाकलम्। कार्दमम् ॥ नील्या अन् वक्तव्यः॥ नील्या रक्तं नीलं वस्त्रम् ॥ पीतात् कन् वक्तव्यः॥ पीतेन रक्तं पीतकम् ॥ हरिद्रामहारजनाभ्यामञ् वक्तव्यः॥ हारिद्रम्। माहारजनम्॥

नक्षत्रेण युक्तः कालः ॥ ३ ॥

तृतीया समर्थविभक्तिरनुवर्तते। तेनेति तृतीयासमर्थाद् नक्षत्रविशेषवाचिनः शब्दाद् युक्त इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ युक्तः, कालश्चेत् स भवति। कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते ? पुष्यादिसमीपस्थे चन्द्रमसि वर्तमानाः पुष्यादिशब्दाः प्रत्ययमुत्पादयन्ति। पुष्येण युक्तः कालः। पुष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः। पौषी रात्रिः। पौषमहः। माघी रात्रिः। माघमहः। नक्षत्रेणेति किम् ? चन्द्रमसा युक्ता रात्रिः। काल इति किम् ? पुष्येण युक्तश्चन्द्रमाः॥

लुबविशेषे ॥ ४ ॥

पूर्वेण विहितस्य प्रत्ययस्य लुब् भवत्यविशेषे। न चेद् नक्षत्रयुक्तस्य कालस्य रात्र्यादिविशेषोऽभिधीयते। यावान् कालो नक्षत्रेण युज्यतेऽहोरात्रः, तस्याविशेषे लुब् भवति। अद्य पुष्यः। अद्य कृत्तिकाः। अविशेष इति किम् ? पौषी रात्रिः। पौषमहः॥

संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ५ ॥

अविशेषे लुब् विहितः पूर्वेण, विशेषार्थोऽयमारम्भः। श्रवणशब्दादश्वत्थशब्दात् चोत्पन्नस्य प्रत्ययस्य लुब् भवति संज्ञायां विषये। श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। लुपि युक्तवद्भावः कस्माद् न भवति ? निपातनाद् 'विभाषा फाल्गुनीश्रवणाकार्तिकी०' (४.२.२३) इति। संज्ञायामिति किम् ? श्रावणी, आश्वत्थी रात्रिः॥

द्वन्द्वाच्छः ॥ ६ ॥

नक्षत्रद्वन्द्वात् तृतीयासमर्थाद् युक्ते काले छः प्रत्ययो भवति, विशेषे चाविशेषे च। राधानुराधीया रात्रिः। तिष्यपुनर्वसवीयमहः। अविशेषे—अद्य राधानुराधीयम्। अद्य तिष्यपुनर्वसवीयम्। लुपं परत्वाद् बाधते॥

दृष्टं साम ॥ ७ ॥

तेनेति तृतीयासमर्थाद् दृष्टम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति,यद् दृष्टं साम चेत् तद् भवति। क्रुञ्चेन दृष्टं क्रौञ्चं साम। वासिष्ठम्। वैश्वामित्रम्॥

कलेर्ढक् ॥ ८ ॥

कलिशब्दात् तृतीयासमर्थाद् दृष्टं सामेत्येतस्मिन्नर्थे ढक् प्रत्ययो भवति। अणोऽपवादः। कलिना दृष्टं साम कालेयम् ॥ सर्वत्राग्निकलिभ्यां ढग् वक्तव्यः॥ अग्निना दृष्टमाग्नेयम्। एवमग्नौ भवमग्नेरागतमग्नेः स्वमिति सर्वत्र ढगेव भवति। आग्नेयम्। तथा कालेयमपि प्रतिपत्तव्यम् ॥ दृष्टे सामनि अण् वा डिद् भवतीति वक्तव्यम्॥ उशनसा दृष्टं साम औशनसम्, औशनम् ॥ जाते चार्थे योऽन्येन बाधितः पुनरण् विधीयते स वा डिद् भवतीति वक्तव्यम्॥ 'प्राग् दीव्यतोऽण्' (४.१.८३) प्राप्तः कालठञा (४.३.११) बाधितः 'सन्धिवेलाद्यृतुनक्षत्रेभ्यः०' (४.३.१६) इति पुनर्विधीयते, स वा डिद् भवतीति वक्तव्यम्। शतभिषजि जातः शातभिषः, शातभिषजः ॥ तीयादीकक् स्वार्थे वा वक्तव्यः॥ द्वैतीयीकम्। तार्तीयीकम्। द्वितीयकम्। तृतीयकम् ॥ न विद्यायाः॥ द्वितीया, तृतीया विद्या ॥ गोत्रादङ्कवदिष्यते॥ दृष्टं सामेत्यस्मिन्नर्थे। औपगवेन दृष्टं साम औपगवकम्। कापटवकम्। 'गोत्रचरणाद् वुञ्' (४.३.१२६) भवति।

दृष्टे सामनि जाते च द्विरण् डिद् वा विधीयते।
तीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते॥

वामदेवाड् ड्यड्ड्यौ ॥ ९ ॥

वामदेवशब्दात् तृतीयासमर्थाद् दृष्टं सामेत्येतस्मिन्नर्थे ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः। अणोऽपवादः। वामदेवेन दृष्टं साम वामदेव्यं साम। तित्करणं स्वरार्थम्। डित्करणं किमर्थम् ? 'ययतोश्चातदर्थे' (६.२.१५६) इति नञ उत्तरस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणं मा भूत्। अननुबन्धकग्रहणपरिभाषया (परि० ८१) एकानुबन्धक-ग्रहणपरिभाषया (सीर० प० ५१) चानयोर्निवृत्तिः क्रियते। अवामदेव्यम्।

सिद्धे यस्येतिलोपेन किमर्थं ययतौ डितौ।
ग्रहणं मातदर्थे भूद् वामदेव्यस्य नञ्स्वरे॥

परिवृतो रथः ॥ १० ॥

तेनेति तृतीयासमर्थात् परिवृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ परिवृतो रथश्चेत् स भवति। वस्त्रेण परिवृतो रथो वास्त्रो रथः। काम्बलः। चार्मणः। रथ इति किम् ? वस्त्रेण परिवृतः कायः। समन्ताद् वेष्टितः परिवृत उच्यते, यस्य न कश्चिदवयवो वस्त्रादिभिरवेष्टितः। तेनेह न भवति—छात्रैः परिवृतो रथः॥

पाण्डुकम्बलादिनिः ॥ ११ ॥

पाण्डुकम्बलशब्दात् तृतीयासमर्थात् परिवृतो रथ इत्येतस्मिन्नर्थ इनिः प्रत्ययो भवति। अणोऽपवादः। पाण्डुकम्बली, पाण्डुकम्बलिनौ, पाण्डुकम्बलिनः। पाण्डुकम्बलशब्दो राजास्तरणस्य वर्णकम्बलस्य वाचकः। मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम्॥

द्वैपवैयाघ्रादञ् ॥ १२ ॥

द्वीपिव्याघ्रयोर्विकारभूते चर्मणी द्वैपवैयाघ्रे, ताभ्यां तृतीयासमर्थाभ्यां परिवृतो रथ इत्येतस्मिन्नर्थेऽञ् प्रत्ययो भवति। अणोऽपवादः। स्वरे विशेषः। द्वैपेन परिवृतो रथो द्वैपः। वैयाघ्रः॥

कौमारापूर्ववचने ॥ १३ ॥

कौमार इत्येतदण्प्रत्ययान्तं निपात्यतेऽपूर्ववचने। पाणिग्रहणस्यापूर्ववचनम्। उभयतः स्त्रिया अपूर्वत्वे निपातनमेतत्। अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः। कुमारीशब्दाद् द्वितीयासमर्थादुपयन्तरि प्रत्ययः। अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या। प्रथमान्तादेव स्वार्थे प्रत्ययोऽपूर्वत्वे द्योत्ये।

---

१ - ' यस्य कश्चिदवयवो वस्त्रादिभिरवेष्टितः, तत्र न भवति ' इति है०।

कौमारापूर्ववचने कुमार्या अण् विधीयते।
अपूर्वत्वं यदा तस्याः कुमार्यां भवतीति वा॥
कुमार्यां भवः कौमारः पतिः, तस्य स्त्री कौमारी भार्येति सिद्धम्॥

तत्रोद्धृतममत्रेभ्यः ॥ १४ ॥

तत्रेति सप्तमीसमर्थादमत्रवाचिनः शब्दादुद्धृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। भुक्तोच्छिष्टमुद्धृतमुच्यते, यस्योद्धरणमिति प्रसिद्धिः। अमत्रं भाजनं पात्रमुच्यते। शरावेषूद्धृतः शाराव ओदनः। माल्लिकः। कार्परः। अमत्रेभ्य इति किम् ? पाणावुद्धृत ओदनः। तत्रेति सप्तमी समर्थविभक्तिः 'क्षीराड् ढञ्' (४.२.२०) इति यावदनुवर्तते॥

स्थण्डिलाच्छयितरि व्रते ॥ १५ ॥

स्थण्डिलशब्दात् सप्तमीसमर्थात् शयितर्यभिधेये यथाविहितं प्रत्ययो भवति, समुदायेन चेद् व्रतं गम्यते। व्रतमिति शास्त्रितो नियम उच्यते। स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो भिक्षुः। स्थाण्डिलो ब्रह्मचारी। व्रत इति किम् ? स्थण्डिले शेते ब्रह्मदत्तः॥

संस्कृतं भक्षाः ॥ १६ ॥

तत्रेति सप्तमीसमर्थात् संस्कृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् संस्कृतं भक्षाश्चेत् ते भवन्ति। खरविशदमभ्यवहार्यं भक्षमित्युच्यते। सत उत्कर्षाधानं संस्कारः। भ्राष्ट्रे संस्कृता भक्षा भ्राष्ट्रा अपूपाः। कालशाः। कौम्भाः। भक्षा इति किम्? पुष्पपुटे संस्कृतो मालागुणः॥

शूलोखाद् यत् ॥ १७ ॥

शूलशब्दादुखाशब्दाच्च सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। अणोऽपवादः। शूले संस्कृतं शूल्यं मांसम्। उख्यम्॥

दध्नष्ठक् ॥ १८ ॥

दधिशब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दधनि संस्कृतं दाधिकम्। ननु च संस्कृतार्थे प्राग् वहतेष्ठकं (४.४.१) वक्ष्यति, तेनैव सिद्धम् ? न सिध्यति। दध्ना हि तत् संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानम् , इह तु दधि केवलमाधारभूतम्, द्रव्यान्तरेण लवणादिना संस्कारः क्रियते॥

---

१ - ' पतिः ' इति नास्ति बाल०। २ - ' अभ्यवहारार्थम् ' इति मुद्रितः पाठः।

उदश्वितोऽन्यतरस्याम् ॥ १९ ॥

उदश्विच्छब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थेऽन्यतरस्यां ठक् प्रत्ययो भवति, पक्षे यथाप्राप्तमण् भवति। औदश्वित्कम्, औदश्वितम्॥

क्षीराड् ढञ् ॥ २० ॥

क्षीरशब्दात् सप्तमीसमर्थात् संस्कृतं भक्षा इत्येतस्मिन्नर्थे ढञ् प्रत्ययो भवति। अणोऽपवादः। क्षीरे संस्कृता क्षैरेयी यवागूः॥

सास्मिन् पौर्णमासीति सञ्ज्ञायाम् ॥ २१ ॥

सेति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् तत् प्रथमासमर्थं पौर्णमासी चेत् सा भवति। इतिकरणस्ततश्चेद् विवक्षा भवति। संज्ञायामिति समुदायोपाधिः, प्रत्ययान्तेन चेत् संज्ञा गम्यत इति। मासार्धमाससंवत्सराणामेषा संज्ञा। पौषी पौर्णमासी अस्मिन् पौषो मासः। पौषोऽर्धमासः। पौषः संवत्सरः। इह न भवति —पौषी पौर्णमासी अस्मिन् दशरात्र इति। भृतकमासे च न भवति। इतिकरणस्य संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणम् , तत्र किमर्थं द्वयमुपादीयते ? संज्ञाशब्देन तुल्यतामितिकरणस्य ज्ञापयितुम् , न ह्ययं लोके तथा प्रसिद्धः। संज्ञार्थत्वे तु संप्रति ज्ञापिते यत् तत्रतत्रोच्यत इतिकरणस्ततश्चेद् विवक्षेति, तदुपपन्नं भवति। अथ पौर्णमासीति कोऽयं शब्दः? 'पूर्णमासादण्' (वा० ४.२.३५) पौर्णमासी। अथवा पूर्णो माः पूर्णमाः, पूर्णमास इयं पौर्णमासी। मा इति चन्द्र उच्यते॥

आग्रहायण्यश्वत्थाट् ठक् ॥ २२ ॥

सास्मिन् पौर्णमासीति सर्वमनुवर्तते। आग्रहायणीशब्दादश्वत्थशब्दात् च प्रथमा-समर्थात् पौर्णमास्युपाधिकाद् अस्मिन्निति सप्तम्यर्थे ठक् प्रत्ययो भवति। अणोऽपवादः। आग्रहायणिको मासः, अर्धमासः, संवत्सरः। एवमाश्वत्थिकः॥

विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः ॥ २३ ॥

फाल्गुन्यादयः पौर्णमासीशब्दाः, तेभ्यो विभाषा ठक् प्रत्ययो भवति, सास्मिन् पौर्णमासीति संज्ञायामित्येतस्मिन् विषये। नित्यमणि प्राप्ते पक्षे ठग् विधीयते। फाल्गुनो मासः, फाल्गुनिकः। श्रावणः, श्रावणिकः। कार्तिकः, कार्तिकिकः। चैत्रः, चैत्रिकः॥

सास्य देवता ॥ २४ ॥

सेति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं देवता चेत् सा भवति। यागसंप्रदानं देवता, देयस्य पुरोडाशादेः स्वामिनी, तस्मिन्नभिधेये प्रत्ययः। इन्द्रो देवतास्य ऐन्द्रं हविः। आदित्यम्। बार्हस्पत्यम्। प्राजापत्यम्। देवतेति किम्? कन्या देवदत्तस्य। कथमैन्द्रो मन्त्रः? मन्त्रस्तुत्यमपि देवतेत्युपचरन्ति। कथमाग्नेयो वै ब्राह्मणो देवतयेति? उपमानाद् भविष्यति। 'महाराजप्रोष्ठपदाट् ठञ्' (४.२.३५) इति यावत् सास्य देवतेत्यधिकारः। सेति प्रकृते पुनः समर्थविभक्तिनिर्देशः संज्ञानिवृत्त्यर्थः॥

कस्येत् ॥ २५ ॥

कशब्दो देवतायां प्रजापतेर्वाचकः, ततः पूर्वेणैवाण्प्रत्ययः सिद्धः, इकारादेशार्थं वचनम्। कस्येकारादेशो भवति प्रत्ययसन्नियोगेन। कायं हविः। कायमेकपालं निर्वपेत् (मै० सं० ३.१५.१०)॥

शुक्राद् घन् ॥ २६ ॥

शुक्रशब्दात् सास्य देवतेत्यस्मिन्नर्थे घन् प्रत्ययो भवति। अणोऽपवादः। शुक्रियं हविः। शुक्रियोऽध्यायः॥

अपोनप्त्रपांनप्तृभ्यां घः ॥ २७ ॥

अपोनप्तृ अपान्नप्तृ इत्येताभ्यां घः प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। अणोऽपवादः। अपोनप्त्रियं हविः (का० श्रौ० २३.४.१४)। अपांनप्त्रियम्। अपोनपाद्, अपांनपादिति देवताया नामधेये एते। तयोस्तु प्रत्ययसन्नियोगेन रूपमिदं निपात्यते॥

छ च ॥ २८ ॥

अपोनप्तृ अपान्नप्तृ इत्येताभ्यां छकारः प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। अणोऽपवादः। अपोनप्त्रीयं (ऐ० ब्रा० २.१६) हविः। अपान्नप्त्रीयम् (काठ० सं० १२.६)। योगविभागः संख्यातानुदेशपरिहारार्थः॥ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्॥ पैङ्गाक्षीपुत्रीयम्। तार्णबिन्दवीयम्॥ शतरुद्राच्छश्च घश्च॥ शतरुद्रीयम् (तै० सं० ५.४.३.१)। शतरुद्रियम् (मै० सं० ३.३.४)॥

महेन्द्राद् घाणौ च ॥ २९ ॥

---

१ - 'देवतास्य' इत्यपपाठो मुद्रितेषु। २ - 'देवतेति' इति है०।

महेन्द्रशब्दाद् घाणौ प्रत्ययौ भवतः, चकाराच्छश्च, सास्य देवतेत्यस्मिन् विषये। महेन्द्रो देवतास्य महेन्द्रियं हविः। माहेऽ्न्द्रम् (तै० सं० ६.५.५.४)। महेन्द्रीयम् (काठ० सं० १५.१)॥

सोमाट् ट्यण् ॥ ३० ॥

सोमशब्दाट् ट्यण् प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। अणोऽपवादः। णकारो वृद्ध्यर्थः। टकारो ङीबर्थः। सोमो देवतास्य सौम्यं हविः। सौम्यं सूक्तम्। सौमीं (मै० सं० १.७.४) ऋक्॥

वाय्वृतुपित्रुषसो यत् ॥ ३१ ॥

वाय्वादिभ्यः शब्देभ्यो यत् प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। अणोऽपवादः। वायुर्देवतास्य वायव्यम्। ऋतव्यम्। पित्र्यम् (ऋ० ८.२०.१३)। उषस्यम्॥

द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ॥ ३२॥

द्यावापृथिव्यादिभ्यश्छः प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये चकारादु यत् च। अणो ण्यस्य चापवादः। द्यौश्च पृथिवी च द्यावापृथिव्यौ देवते अस्य द्यावा-पृथिवीयम् (मै० सं० १.८.१०), द्यावापृथिव्यम् (तै० सं० १.८.२.१)। शुनश्च सीरश्च तौ देवते अस्येति शुनासीरीयम् (मा० सं० २४.१६), शुनासीर्यम् (मै० सं० ४.३.३)। शुनो वायुः। सीर आदित्यः। मरुत्वान् देवतास्य मरुत्वतीयम् (तै० सं० ४.४.२.२)। मरुत्वत्यम्। अग्नीषोमीयम् (तै० सं० १.८.१.१)। अग्नीषोम्यम्। वास्तोष्पतीयम् (तै० सं० ३.४.१०. ३)। वास्तोष्पत्यम् (मै० सं० १.५.१३)। गृहमेधीयम् (ऋ० ७.५६.१४)। गृहमेध्यम् (काठ० सं० ३६.६)॥

अग्नेर्ढक् ॥ ३३ ॥

अग्निशब्दाद् ढक् प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। अणोऽपवादः। अग्निर्देवतास्य आग्नेयोऽष्टाकपालः (तै० सं० १.८.२.१)। प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग् वक्तव्यः (वा० ४.२.८)॥

कालेभ्यो भववत् ॥ ३४॥

कालविशेषवाचिभ्यो शब्देभ्यो भववत् प्रत्यया भवन्ति सास्य देवतेत्यस्मिन् विषये। 'कालाट् ठञ्' (४.३.११) इति प्रकरणे भवे प्रत्यया विधास्यन्ते, ते सास्य देवतेत्यस्मिन्नर्थे तथैवेष्यन्ते, तदर्थमिदमुच्यते। वत्करणं सर्वसादृश्यपरिग्रहार्थम्। मासे

भवं मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। वासन्तम्। प्रावृषेण्यम्। तथा मासो देवतास्य मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। वासन्तम्। प्रावृषेण्यम्॥

महाराजप्रोष्ठपदाट् ठञ् ॥ ३५ ॥

महाराजशब्दात् प्रोष्ठपदशब्दात् च ठञ् प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये। महाराजो देवतास्य माहाराजिकम्। प्रौष्ठपदिकम्॥ ठञ्प्रकरणे तदस्मिन् वर्तत इति नवयज्ञादिभ्य उपसंख्यानम्॥ नवयज्ञोऽस्मिन् वर्तते नावयज्ञिकः कालः। पाकयज्ञिकः ॥ पूर्णमासादण्॥ पूर्णमासोऽस्यां वर्तते पौर्णमासी (मै० सं० १.६.६) तिथिः॥

पितृव्यमातुलमातामहपितामहाः ॥ ३६ ॥

पितृव्यादयो निपात्यन्ते। समर्थविभक्तिः प्रत्ययः प्रत्ययार्थोऽनुबन्ध इति सर्वं निपातनाद् विज्ञेयम्। पितृमातृभ्यां भ्रातर्यभिधेये व्यत् डुलच् इत्येतौ प्रत्ययौ निपात्येते। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। ताभ्यां पितरि डामहच्, मातरि षित् च। ताभ्यामेव पितरि डामहच् प्रत्ययो भवति। पितुः पिता पितामहः। मातुः पिता मातामहः। मातरि षित् च। पितामही। मातामही ॥ अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः॥ अवेर्दुग्धम् अविसोढम्। अविदूसम्। अविमरीसम् ॥ तिलान्निष्फलात् पिञ्जपेजौ प्रत्ययौ वक्तव्यौ॥ निष्फलस्तिलः तिलपिञ्जः। तिलपेजः ॥ पिञ्जश्छन्दसि डिच्च॥ तिल्पिञ्जं दण्डनं नडम् (शौ० सं० १२.२.५४)॥

तस्य समूहः ॥ ३७ ॥

तस्येति षष्ठीसमर्थात् समूह इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। किमिहोदाहरणम् ? चित्तवदाद्युदात्तमगोत्रम्, यस्य च नान्यत् प्रतिपदं ग्रहणम्। अचित्ताट् ठकं (४.२.४७) वक्ष्यति, 'अनुदात्तादेरञ्' (४.२.४४) गोत्राद् वुञ् (४.२.३९) प्रतिपदं च 'केदाराद् यञ् च' (४.२.४०) इत्येवमादि, तत्परिहारेणात्रोदाहरणं द्रष्टव्यम्। काकानां समूहः काकम्। बाकम्। 'इनित्रकट्यचश्च' (४.२.५१) इति यावत् समूहाधिकारः ॥ गुणादिभ्यो ग्रामज् वक्तव्यः ॥ गुणग्रामः। करणग्रामः॥ गुण। करण। तत्त्व। शब्द। इन्द्रिय। आकृतिगणः॥

भिक्षादिभ्योऽण् ॥ ३८ ॥

भिक्षेत्येवमादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। अण्ग्रहणं बाधकबाधनार्थम्। भिक्षाणां समूहो भैक्षम्। गार्भिणम्। युवतिशब्दोऽत्र

पठ्यते, तस्य ग्रहणसामर्थ्यात् पुंवद्भावो न भवति 'भस्याढे तद्धिते०' (वा० ६.३.३५) इति। युवतीनां समूहो यौवतम्॥ भिक्षा। गर्भिणी। क्षेत्र। करीष। अङ्गार। चर्मिन्। धर्मिन्। सहस्र। युवति। पदाति। पद्धति। अथर्वन्। दक्षिणा। भूत॥

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ् ॥ ३९ ॥

गोत्रादिभ्यो वुञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यतेऽपत्यमात्रम्, न तु पौत्रप्रभृत्येव। औपगवानां समूह औपगवकम्। कापटवकम्। उक्षन्—औक्षकम्। उष्ट्र—औष्ट्रकम्। उरभ्र—औरभ्रकम्। राजन्—राजकम्। राजन्य—राजन्यकम्। राजपुत्र—राजपुत्रकम्। वत्स—वात्सकम्। मनुष्य—मानुष्यकम्। अज—आजकम्। 'प्रकृत्याके राजन्यमनुष्ययुवानः' (वा० ६.४.१६३) इति यलोपो न भवति 'आपत्यस्य च तद्धितेऽनाति' (६.४.१५१) इति ॥ वृद्धाच्चेति वक्तव्यम्॥ वृद्धानां समूहो वार्धकम्॥

केदाराद् यञ् च ॥ ४० ॥

केदारशब्दाद् यञ् प्रत्ययो भवति, चकाराद् वुञ् च, तस्य समूह इत्येतस्मिन् विषये। अचित्तलक्षणस्य ठकोऽपवादः। केदाराणां समूहः कैदार्यम्, कैदारकम् ॥ गणिकायाश्च यञ् वक्तव्यः॥ गणिकानां समूहो गाणिक्यम्॥

ठञ् कवचिनश्च ॥ ४१ ॥

कवचिन्शब्दाद् ठञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। कवचिनां समूहः कावचिकम्। चकारः केदारादित्यस्यानुकर्षणार्थः। केदाराणां समूहः कैदारिकम्॥

ब्राह्मणमाणववाडवाद् यन् ॥ ४२ ॥

ब्राह्मणादिभ्यः शब्देभ्यो यन् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। नकारः स्वरार्थः। ब्राह्मणानां समूहो ब्राह्मण्यम्। माणव्यम्। वाडव्यम् ॥यन्प्रकरणे पृष्ठादुपसंख्यानम्॥ पृष्ठानां समूहः पृष्ट्यः षडहः॥अह्नः खः क्रतौ॥अह्नां समूहः अहीनः क्रतुः। क्रताविति किम्? आह्नः। खण्डिकादिषु दर्शनादञ् भवति॥पर्श्वा णस् वक्तव्यः॥ पर्शूनां समूहः पार्श्वम्। पदसंज्ञकत्वाद् गुणो न भवति॥ वातादूलः॥ वातानां समूहो वातूलः॥

ग्रामजनबन्धुसहायेभ्यस्तल् ॥ ४३ ॥

ग्रामादिभ्यस्तल् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। ग्रामाणां समूहो

ग्रामता। जनता। बन्धुता। सहायता ॥ गजाच्चेति वक्तव्यम्॥ गजानां समूहो गजता॥

अनुदात्तादेरञ् ॥ ४४ ॥

अनुदात्तादेः शब्दादञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। कपोतानां समूहः कापोतम्। मायूरम्। तैत्तिरम्॥

खण्डिकादिभ्यश्च ॥ ४५ ॥

खण्डिका इत्येवमादिभ्यः शब्देभ्योऽञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। आद्युदात्तार्थमचित्तार्थं च वचनम्। खण्डिकानां समूहः खाण्डिकम्। वाडवम्। क्षुद्रकमालव- शब्दोऽत्र पठ्यते। क्षुद्रकाश्च मालवाश्चेति क्षत्रियद्वन्द्वः। ततः पूर्वेणैवाञि सिद्धे वचनं गोत्रवुञ्बाधनार्थम् (४.२.३६)। ननु च परत्वादञा वुञ् बाधिष्यते। न च गोत्रसमुदायो गोत्रम्, न च तदन्तविधिरत्रास्ति ? एवं तर्ह्येतञ् ज्ञापयति—वुञि पूर्वविप्रतिषेधः, सामूहिकेषु च तदन्तविधिरस्तीति। प्रयोजनमौपगवकं कापटवकमिति वुञ् भवति। वानहस्तिकं गौधेनुकमिति च तदन्तविधिः। क्षुद्रकमालवादित्येतावता योगविभागेन पूर्वविप्रतिषेधस्तदन्तविधिश्च ज्ञापितः, पुनरस्यैव नियमार्थमुच्यते सेनासंज्ञायामिति। क्षुद्र- कमालवात् सेनासंज्ञायामेवाञ् भवति। क्षौद्रकमालवी सेना। क्षौद्रकमालवकमन्यत्।

अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात् ।
गोत्राद् वुञ् न च तद्गोत्रं तदन्तान्न स सर्वतः॥ १॥
ज्ञापकं स्यात्तदन्तत्वे तथा चापिशलेर्विधिः।
सेनायां नियमार्थं च यथा बाध्येत चाञ् वुञा॥ २॥

खण्डिका। वडवा। क्षुद्रकमालवात् सेनासंज्ञायाम् (ग० सू० ७६)। भिक्षुक। शुक। उलूक। श्वन्। युग। अहन्। वरत्रा। हलबन्ध॥

चरणेभ्यो धर्मवत् ॥ ४६ ॥

चरणशब्दाः कठकलापादयः , तेभ्यः षष्ठीसमर्थेभ्यः समूहे धर्मवत् प्रत्यया भवन्ति। 'गोत्रचरणाद् वुञ्' (४.३.१२६) इत्यारभ्य प्रत्यया वक्ष्यन्ते, तत्रेदमुच्यते 'चरणाद् धर्माम्नाययोः०' (वा० ४.३.१२६) इति, तेन धर्मवदित्यतिदेशः क्रियते। वतिः सर्वसादृश्यार्थः। कठानां धर्मः काठकम्। कालापकम्। छान्दोग्यम्। औक्थिक्यम्। आथर्वणम्। तथा समूहेऽपि। काठकम्। कालापकम्। छान्दोग्यम्। औक्थिक्यम्। आथर्वणम्॥

अचित्तहस्तिधेनोष्ठक् ॥ ४७ ॥

अचित्तार्थेभ्यो हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। अणञोरपवादः। अपूपानां समूह आपूपिकम्। शाष्कुलिकम्। हास्तिकम्। धैनुकम् ॥ धेनोरनञ इति वक्तव्यम्॥ आधेनवम्॥

केशाश्वाभ्यां यञ्छावन्यतरस्याम् ॥ ४८ ॥

केश अश्व इत्येताभ्यां यथासंख्यं यञ् छ इत्येतौ प्रत्ययौ भवतोऽन्यतरस्यां तस्य समूह इत्येतस्मिन् विषये। केशानां समूहः कैश्यम्। कैशिकम्। अश्वानां समूहः अश्वीयम्। आश्वम्॥

पाशादिभ्यो यः ॥ ४९ ॥

पाशादिभ्यो यः प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। पाशानां समूहः पाश्या। तृण्या॥ पाश। तृण। धूम। वात। अङ्गार। पोत। बालक। पिटक। पिटाक। शकट। हल। नड। वन॥

खलगोरथात् ॥ ५० ॥

खलगोरथशब्देभ्यो यः प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये। खलानां समूहः खल्या। गव्या। रथ्या। पाशादिष्वपाठ उत्तरार्थः॥

इनित्रकट्यचश्च ॥ ५१ ॥

खलगोरथशब्देभ्यो यथासंख्यम् इनि त्र कट्यच् इत्येते प्रत्यया भवन्ति तस्य समूह इत्येतस्मिन् विषये। खलिनी। गोत्रा। रथकट्या ॥ खलादिभ्य इनिर्वक्तव्यः॥ डाकिनी। कुण्डलिनी। कुटुम्बिनी ॥ कमलादिभ्यः खण्डच् प्रत्ययो भवति॥ कमलखण्डम्। अम्भोजखण्डम्॥ कमल। अम्भोज। पद्मिनी। कुमुद। सरोज। पद्म। नलिनी। कैरविणी। कमलादिराकृतिगणः ॥ नरकरितुरङ्गाणां स्कन्धच् प्रत्ययः॥ नरस्कन्धः। करिस्कन्धः। तुरङ्गस्कन्धः ॥ पूर्वादिभ्यः काण्डः प्रत्ययो भवति॥ पूर्वकाण्डम्। तृणकाण्डम्। कर्मकाण्डम्॥

विषयो देशे ॥ ५२ ॥

समूह इति निवृत्तम्। षष्ठी समर्थविभक्तिरनुवर्तते। तस्येति षष्ठीसमर्थाद्

विषय इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ विषयो देशश्चेत् स भवति। विषय- शब्दोऽयं बह्वर्थः। क्वचिद् ग्रामसमुदाये वर्तते, विषयो लब्ध इति। क्वचिदिन्द्रियग्राह्ये, चक्षुर्विषयो रूपमिति। क्वचिदत्यन्तशीलिते ज्ञेये, देवदत्तस्य विषयोऽनुवाक इति। क्वचिद-न्यत्राभावे, मत्स्यानां विषयो जलमिति। तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थम्। शिबीनां विषयो देशः शैबः। औष्ट्रः। देश इति किम् ? देवदत्तस्य विषयोऽनुवाकः॥

राजन्यादिभ्यो वुञ् ॥ ५३ ॥

राजन्यादिभ्यः शब्देभ्यो वुञ् प्रत्ययो भवति विषयो देश इत्येतस्मिन्नर्थे। अणोऽपवादः। राजन्यानां विषयो देशो राजन्यकः। दैवयानकः। आकृतिगणश्चायम्। मालवानां विषयो देशो मालवकः। वैराटकः। त्रैगर्तकः॥ राजन्य। देवयान। शालङ्कायन। जालन्धरायण। आत्मकामेय। अम्बरीषपुत्र। वसाति। बैल्ववन। शैलूष। उदुम्बर। बैल्वत। आर्जुनायन। संप्रिय। दाक्षि। ऊर्णनाभ॥

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥ ५४ ॥

भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च यथासंख्यं विधल् भक्तल् इत्येतौ प्रत्ययौ भवतो विषयो देश इत्येतस्मिन् विषये। अणोऽपवादः। भौरिकिविधः। वैपेयविधः। ऐषु-कार्यादिभ्यः—ऐषुकारिभक्तः। सारस्यायनभक्तः॥ भौरिकि। वैपेय। भौलिकि। चैटयत। काणेय। वाणिजक। वालिज। वालिज्यक। शैकयत। वैकयत। भौरिक्यादिः॥ ऐषुकारि। सारस्यायन। चान्द्रायण। द्व्याक्षायण। त्र्याक्षायण। औडायन। जौलायन। खाडायन। सौवीर। दासमित्रि। दासमित्रायण। शौद्रायण। दाक्षायण। शयण्ड। ताक्ष्यायण। शौभ्रायण। सायण्डि। शौण्डि। वैश्वमाणव। वैश्वधेनव। नद। तुण्डदेव। विशदेव॥

सोऽस्यादिरितिच्छन्दसः प्रगाथेषु ॥ ५५ ॥

स इति समर्थविभक्तिः। अस्येति प्रत्ययार्थः। आदिरिति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। छन्दस इति प्रकृतिनिर्देशः। प्रगाथेष्विति प्रत्ययार्थविशेषणम्। स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं छन्दश्चेत् तदादिर्भवति, यत् तदस्येति निर्दिष्टं प्रगाथाश्चेत् ते भवन्ति। इतिकरणस्ततश्चेद् विवक्षा। पङ्क्तिरादिरस्य पाङ्क्तः प्रगाथः। आनुष्टुभः। जागतः। आदिरिति किम् ? अनुष्टुब् मध्यम् अस्य प्रगाथस्य। छन्दस इति किम् ? उदुत्यशब्द आदिरस्य प्रगाथस्य। प्रगाथेष्विति किम् ? पङ्क्तिरादिरस्यानुवाकस्य। प्रगाथशब्दः क्रियानिमित्तकः क्वचिदेव मन्त्रविशेषे वर्तते। यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते, स प्रग्रथनात् प्रकर्षगानाद् वा

प्रगाथ इत्युच्यते ॥ छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसंख्यानम्॥ त्रिष्टुबेव त्रैष्टुभम्। जागतम्॥

संग्रामे प्रयोजनयोद्धृभ्यः ॥ ५६ ॥

सोऽस्येति समर्थविभक्तिः, प्रत्ययार्थश्चानुवर्तते। प्रथमासमर्थविशेषणं प्रयोजनं योद्धारश्च। प्रत्ययार्थविशेषणं संग्रामः। प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च शब्देभ्यः प्रथमासमर्थेभ्योऽस्येति षष्ठ्यर्थे संग्रामेऽभिधेये यथाविहितं प्रत्ययो भवति। भद्रा प्रयोजनमस्य संग्रामस्य भाद्रः संग्रामः। सौभद्रः। गौरिमित्रः। योद्धृभ्यः—अहिमाला योद्धारोऽस्य संग्रामस्य आहिमालः। स्यान्दनाश्वः। भारतः। संग्राम इति किम् ? सुभद्रा प्रयोजनमस्य दानस्य। प्रयोजनयोद्धृभ्य इति किम् ? सुभद्रा प्रेक्षिकास्य संग्रामस्य॥

तदस्यां प्रहरणमिति क्रीडायां णः ॥ ५७ ॥

तदिति प्रथमासमर्थादस्यामिति सप्तम्यर्थे णः प्रत्ययो भवति, यत् तदिति निर्दिष्टं प्रहरणं चेत् तद् भवति। यदस्यामिति निर्दिष्टं क्रीडा चेत् सा भवति। इतिकरणस्तत्श्चेद् विवक्षा। दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। प्रहरणमिति किम् ? माला भूषणमस्यां क्रीडायाम्। क्रीडायामिति किम् ? खड्गः प्रहरणमस्यां सेनायाम्॥

घञः सास्यां क्रियेति ञः ॥ ५८ ॥

सेति समर्थविभक्तिः। अस्यामिति प्रत्ययार्थः स्त्रीलिङ्गः। क्रियेति प्रकृत्यर्थविशेषणम्। घञ इति प्रकृतिनिर्देशः। इतिकरणो विवक्षार्थः। घञन्तात् क्रियावाचिनः प्रथमासमर्थादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञः प्रत्ययो भवति। घञ इति कृद्ग्रहणम्, तत्र गतिकारकपूर्वमपि गृह्यते (परि० २८)। श्येनपातोऽस्यां वर्तते श्यैनंपाता। तैलंपाता। घञ इति किम् ? श्येनपतनमस्यां वर्तते। क्रियेति किम् ? प्राकारोऽस्यां वर्तते। अथ समर्थविभक्तिः प्रत्ययार्थश्च कस्मात् पुनरुपादीयते, यावता द्वयमपि प्रकृतमेव ? क्रीडायामित्यनेन तत् संबद्धम्, अतस्तदनुवृत्तौ क्रीडानुवृत्तिरपि संभाव्येत। सामान्येन चेदं विधानम्। दण्डपातोऽस्यां तिथौ वर्तते दाण्डपाता तिथिः। मौसलपाता तिथिः॥

तदधीते तद्वेद ॥ ५९ ॥

तदिति द्वितीयासमर्थादधीते वेद इत्येतयोरर्थयोर्यथाविहितं प्रत्ययो भवति। छन्दोऽधीते छान्दसः। वैयाकरणः। नैरुक्तः। निमित्तानि वेद नैमित्तः। मौहूर्तः। औत्पातः। द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थम्॥

क्रतूक्थादिसूत्रान्ताट् ठक् ॥ ६० ॥

क्रतुविशेषवाचिभ्य उक्थादिभ्यश्च सूत्रान्तात् च ठक् प्रत्ययो भवति तदधीते तद्वेदे- त्यस्मिन् विषये। अणोऽपवादः। अग्निष्टोममधीते वेद वा आग्निष्टोमिकः। वाजपेयिकः। उक्थादिभ्यः—औक्थिकः। लौकायतिकः। सूत्रान्तात्—वार्तिकसूत्रिकः। सांग्रहसूत्रिकः। सूत्रान्तादकल्पादेरिष्यते। कल्पसूत्रमधीते काल्पसूत्रः। अणेव भवति। उक्थशब्दः केषुचिदेव सामसु रूढः। यज्ञायज्ञीयात् (कौ० सं० उत्तरा० १.६.१,२) परेण यानि गीयन्ते। न च तान्यधीयाने प्रत्यय इष्यते। किं तर्हि ? सामलक्षण औक्थिक्ये वर्तमान उक्थशब्दः प्रत्ययमुत्पादयति। उक्थमधीत औक्थिकः। औक्थिक्यमधीत इत्यर्थः। औक्थिक्य- शब्दाच्च प्रत्ययो न भवत्येव, अनभिधानात्। विद्यालक्षणकल्पान्तादिति वक्तव्यम्। वायसविद्यिकः। सार्पविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। मातृकल्पिकः। पाराशरकल्पिकः। विद्या च नाङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा। अङ्गविद्यामधीते, आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। सांसर्गविद्यः। त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग् वक्तव्यः। आख्यानाख्यायिकयोरर्थग्रहणम्, इतिहासपुराणयोः स्वरूपग्रहणम्। यावक्रीतिकः। प्रैयङ्गविकः। वासवदत्तिकः। सौमनोत्तरिकः। ऐतिहासिकः। पौराणिकः। सर्वसादेर्द्विगोश्च लः। सर्ववेदः। सर्वतन्त्रः। सादेः—सवार्तिकः। ससंग्रहः। द्विगोः—द्विवेदः। पञ्चव्याकरणः। अनुसूर्लक्ष्यलक्षणे च। अनुसूर्नाम ग्रन्थः, तमधीत आनुसुकः। लाक्ष्यिकः। लाक्षणिकः। इकन् बहुलं पदोत्तरपदात्। पूर्वपदिकः। शतषष्टेः षिकन् पथो बहुलम्। शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी। बहुलग्रहणादणपि भवति। शातपथः। षाष्टिपथः॥ उक्थ। लोकायत। न्याय। न्यास। निमित्त। पुनरुक्त। निरुक्त। यज्ञ। चर्चा। धर्म। क्रमेतर। श्लक्ष्ण। संहिता। पद। क्रम। संघात। वृत्ति। संग्रह। गुणागुण। आयुर्वेद। सूत्रान्तादकल्पादेः (ग० सू० ८०)। विद्यालक्षणकल्पान्तात् (ग० सू० ८१)। विद्या चानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा (ग० सू० ८२)। आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठक् (ग० सू० ८३)। सर्वसादेर्द्विगोश्च लः (ग० सू० ८४)। अनुसूर्लक्ष्यलक्षणे च (ग० सू० ८५)। द्विपदी ज्योतिषि (ग० सू० ८६)। अनुपद। अनुकल्प। अनुगुण। इकन् बहुलं पदोत्तरपदात् (ग० सू० ८७)। शतषष्टेः षिकन् पथो बहुलम् (ग० सू० ८८)॥

क्रमादिभ्यो वुन् ॥ ६१ ॥

क्रम इत्येवमादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन् विषये। अणोऽपवादः। क्रमकः। पदकः॥ क्रम। पद। शिक्षा। मीमांसा। सामन्॥

---

१ - ' कल्पसूत्रान्तादिति ' इति है०। २ - ' लाक्षिकः ' इति मुद्रितेष्वपपाठः।

अनुब्राह्मणादिनिः ॥ ६२ ॥

अनुब्राह्मणशब्दादिनिः प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन् विषये। अणोऽपवादः। ब्राह्मणसदृशोऽयं ग्रन्थोऽनुब्राह्मणम्। तदधीते अनुब्राह्मणी, अनुब्राह्मणिनौ, अनुब्राह्मणिनः। मत्वर्थेन 'अत इनिठनौ' (५.२.११५) इतीनिना सिद्धम् ? तत्रैतस्माट् ठन्नपि प्राप्नोति। अनभिधानान्न भविष्यति ? अणो निवृत्त्यर्थं तर्हि वचनम्॥

वसन्तादिभ्यष्ठक् ॥ ६३ ॥

वसन्त इत्येवमादिभ्यष्ठक् प्रत्ययो भवति तदधीते तद्वेदेत्येतस्मिन् विषये। अणोऽपवादः। वसन्तसहचरितोऽयं ग्रन्थो वसन्तः , तमधीते वासन्तिकः। वार्षिकः॥ वसन्त। वर्षाशरदम्। हेमन्त। शिशिर। प्रथम। गुण। चरम। अनुगुण। अपर्वन्। अथर्वन्॥

प्रोक्ताल्लुक् ॥ ६४ ॥

प्रोक्तसहचरितः प्रत्ययः प्रोक्तः। प्रोक्तप्रत्ययान्तादध्येतृवेदित्रोरुत्पन्नस्य लुग् भवति। पाणिनिना प्रोक्तं पाणिनीयम्, तदधीते पाणिनीयः। आपिशलः। स्त्रियां स्वरे च विशेषः। पाणिनीया ब्राह्मणी॥

सूत्राच्च कोपधात् ॥ ६५ ॥

सूत्रवाचिनः ककारोपधादुत्पन्नस्य प्रत्ययस्य लुग् भवति। अप्रोक्तार्थ आरम्भः। पाणिनीयमष्टकं सूत्रम् , तदधीयते अष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः। त्रिकाः काशकृत्स्नाः ॥ संख्याप्रकृतेरिति वक्तव्यम्॥ इह मा भूत्—महावार्तिकं सूत्रमधीते माहावार्तिकः। कालापकमधीते कालापकः। कोपधादिति किम् ? चतुष्टयमधीते चातुष्टयः॥

छन्दोब्राह्मणानि च तद्विषयाणि ॥ ६६ ॥

प्रोक्तग्रहणमनुवर्तते। छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवन्ति। अध्येतृवेदितृप्रत्ययविषयाणि। अनन्यभावो विषयार्थः। तेन स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यं च निवर्तते। कठेन प्रोक्तमधीयते कठाः। मौदाः। पैप्पलादाः। आर्चाभिनः। वाजसनेयिनः। ब्राह्मणानि खल्वपि—ताण्डिनः। भाल्लविनः। शाट्यायनिनः। ऐतरेयिणः। ब्राह्मणग्रहणं किम्, यावता छन्द एव तद् ? ब्राह्मणविशेषप्रतिपत्त्यर्थम्, इह तद्विषयता मा भूत्—याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्कानि। सौलभानि। चकारोऽनुक्त-

१ - ' याज्ञवल्क्यानि ' इत्यपपाठो मुद्रितेषु।

समुच्चयार्थः। कल्पे—काश्यपिनः। कौशिकिनः। सूत्रे—पाराशरिणो भिक्षवः। शैलालिनो नटाः। कर्मन्दिनः। कृशाश्विनः। छन्दोब्राह्मणानीति किम् ? पाणिनीयं व्याकरणम्। पैङ्गी कल्पः॥

तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ ६७ ॥

तदिति प्रथमासमर्थविभक्तिः। अस्मिन्निति प्रत्ययार्थः। अस्तीति प्रकृत्यर्थविशेषणम्। इतिकरणो विवक्षार्थः। देशे तन्नाम्नीति प्रत्ययार्थविशेषणम्। तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थमस्ति चेत् तद् भवति, यदस्मिन्निति निर्दिष्टं देशश्चेत् स तन्नामा भवति, प्रत्ययान्तनामा। इतिकरणस्ततश्चेद् विवक्षा। उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरः। बाल्बजः। पार्वतः। मत्वर्थीयापवादो योगः॥

तेन निर्वृत्तम् ॥ ६८ ॥

तेनेति तृतीयासमर्थाद् निर्वृत्तमित्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने। देशे तन्नाम्नीति चतुर्ष्वपि योगेषु संबध्यते। सहस्रेण निर्वृत्ता साहस्री परिखा। कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी। हेतौ कर्तरि च यथायोगं तृतीया समर्थविभक्तिः॥

तस्य निवासः ॥ ६९ ॥

तस्येति षष्ठीसमर्थाद् निवास इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने। निवसन्त्यस्मिन्निति निवासः। ऋजुनावां निवासो देश आर्जुनावो देशः। शैबः। औदिष्ठः॥

अदूरभवश्च ॥ ७० ॥

पूर्वा समर्थविभक्तिरनुवर्तते। तस्येति षष्ठीसमर्थाददूरभव इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। विदिशाया अदूरभवं नगरं वैदिशम्। हैमवतम्। चकारः पूर्वेषां त्रयाणामर्थानामिह सन्निधानार्थः। तेनोत्तरेषु चत्वारोऽप्यर्थाः संबध्यन्ते॥

ओरञ् ॥ ७१ ॥

चत्वारोऽर्थाः (४.२.६७—७०) अनुवर्तन्ते। उवर्णान्तात् प्रातिपदिकाद् यथाविहितं समर्थविभक्तियुक्तादञ् प्रत्ययो भवति तदस्मिन्नस्तीत्येवमादिष्वर्थेषु। अणोऽपवादः। अरडु—आरडवम्। कक्षतु—काक्षतवम्। कर्कटेलु—कार्कटेलवम्। नद्यां तु परत्वाद् मतुब् भवति। इक्षुमती। अञधिकारः प्राक् सुवास्त्वादिभ्योऽणः (४.२.७७)॥

मतोश्च बह्वजङ्गात् ॥ ७२ ॥

बह्वज् अङ्गं यस्यासौ बह्वजङ्गो मतुप्, तदन्तात् प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः। अणोऽपवादः। ऐषुकावतम्। सैध्रकावतम्। बह्वजङ्गादिति किम् ? आहिमतम्। यावमतम्। अङ्गग्रहणं किम् ? बह्वजिति तद्विशेषणं यथा विज्ञायेत, मत्वन्तविशेषणं मा विज्ञायीति। मालावतां निवासो मालावतम्॥

बह्वचः कूपेषु ॥ ७३ ॥

बह्वचः प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः कूपेष्वभिधेयेषु। अणोऽपवादः। यथासंभवमर्थाः संबध्यन्ते। दीर्घवरत्रेण निर्वृत्तः कूपो दैर्घवरत्रः। कापिलवरत्रः॥

उदक् च विपाशः ॥ ७४ ॥

विपाश उत्तरे कूले ये कूपाः, तेष्वभिधेयेष्वञ् प्रत्ययो भवति चातुरर्थिकः। अणोऽ- पवादः। अबह्वजर्थ आरम्भः। दत्तेन निर्वृत्तः कूपो दात्तः। गौप्तः। उदगिति किम् ? दक्षिणतो विपाशः कूपेष्वणेव। दात्तः। गौप्तः। स्वरे विशेषः। महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य॥

संकलादिभ्यश्च ॥ ७५ ॥

कूपेष्विति निवृत्तम्। संकल इत्येवमादिभ्योऽञ् प्रत्ययो भवति चातुरर्थिकः। अणोऽ- पवादः। यथासंभवमर्थसंबन्धः। संगतः कलः संकलः। संकलेन निर्वृत्तः सांकलः। पौष्कलः॥ संकल। पुष्कल। उद्वप। उड्डप। उत्पुट। कुम्भ। विधान। सुदक्ष। सुदत्त। सुभूत। सुनेत्र। सुपिङ्गल। सिकता। पूतीकी। पूलास। कूलास। पलाश। निवेश। गवेष। गम्भीर। इतर। शर्मन्। अहन्। लोमन्। वेमन्। वरुण। बहुल। सद्योज। अभिषिक्त। गोभृत्। राजभृत्। गृह। भृत। भल्ल। माल। वृत्॥

स्त्रीषु सौवीरसाल्वप्राक्षु ॥ ७६ ॥

देशे तन्नाम्नीत्यस्य विशेषणं सौवीरादयः, स्त्रीत्वं च। ङ्याप्प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः, अणोऽपवादः, सौवीरे स्त्रीलिङ्गे देशे वाच्ये साल्वे प्राचि। सौवीरे तावत्—दत्तामित्रेण निर्वृत्ता नगरी दात्तामित्री। साल्वे—विधूमाग्निना निर्वृत्ता वैधूमाग्नी। प्राचि खल्वपि—ककन्देन निर्वृत्ता काकन्दी। माकन्दी। माणिचरी। जारुषी॥

---

१ - ' किम् ' इति मुद्रितेषु नास्ति। २ - ' विज्ञायते' इति मुद्रितपाठः।

सुवास्त्वादिभ्योऽण् ॥ ७७ ॥

सुवास्तु इत्येवमादिभ्योऽण् प्रत्ययो भवति चातुरर्थिकः। अत्र उवर्णान्तलक्षणस्य कूपलक्षणस्य चापवादः। सुवास्तोरदूरभवं नगरं सौवास्तवम्। वार्णवम्। अण्ग्रहणं नद्यां मतुपो बाधनार्थम्। सौवास्तवी नदी॥ सुवास्तु। वर्णु। भण्डु। खण्डु। सेचालिन्। कर्पूरिन्। शिखण्डिन्। गर्त। कर्कश। शटीकर्ण। कृष्ण। कर्क। कर्कन्धूमती। गोह्य। अहिसक्थ। वृत्॥

रोणी ॥ ७८ ॥

रोणीशब्दादण् प्रत्ययो भवति चातुरर्थिकः। यथासंभवमर्थसंबन्धः। कूपलक्षणस्याञोऽपवादः। रोणीति कोऽयं निर्देशः, यावता प्रत्ययविधौ पञ्चमी युक्ता ? सर्वावस्थप्रतिपत्त्यर्थमेवमुच्यते। रोणीशब्दः सर्वावस्थोऽण्प्रत्ययमुत्पादयति, केवलस्तदन्तश्च। रौणः। आजकरोणः। सैंहिकरोणः॥

कोपधाच्च ॥ ७९ ॥

ककारोपधात् च प्रातिपदिकादण् प्रत्ययो भवति चातुरर्थिकः। यथासंभवमर्थसंबन्धः। कूपलक्षणस्योवर्णलक्षणस्य चाञोऽपवादः। कार्णच्छिद्रिकः कूपः। कार्णवेष्टकः। कृकवाकुना निर्वृत्तं कार्कवाकवम्। त्रैशङ्कवम्॥

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ण्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ॥ ८० ॥

वुञादयः सप्तदश प्रत्ययाः, अरीहणादयोऽपि सप्तदशैव प्रातिपदिकगणाः। आदिशब्दः प्रत्येकमभिसंबध्यते। तत्र यथासंख्यं सप्तदशभ्यः प्रातिपदिकगणेभ्यः सप्तदश प्रत्यया भवन्ति चातुरर्थिकाः। अणोऽपवादः। यथासंभवमर्थसंबन्धः। अरीहणादिभ्यो वुञ् प्रत्ययो भवति। आरीहणकम्। द्रौघणकम्॥ अरीहण। द्रुघण। खदिर। सार। भगल। उलन्द। साम्परायण। क्रौष्ट्रायण। भास्त्रायण। मैत्रायण। त्रैगर्तायन। रायस्पोष। विपथ। उद्दण्ड। उदञ्चन। खाडायन। खण्ड। वीरण। काशकृत्स्न। जाम्बवन्त। शिंशपा। किरण। रैवत। बैल्व। वैमतायन। सौसायन। शाण्डिल्यायन। शिरीष। बधिर। अरीहणादिः॥ कृशाश्वादिभ्यश्छण् प्रत्ययो भवति। कार्शाश्वीयः। आरिष्टीयः॥ कृशाश्व। अरिष्ट। अरीश्व। वेश्मन्। विशाल। रोमक। शबल। कूट। रोमन्। वर्वर। सुकर। सूकर। प्रतर। सदृश। पुरग। सुख। धूम। अजिन। विनता।

अवनत। विकुघास। अरुस्। अवयास। मौद्गल्य। कृशाश्वादिः॥ ऋश्यादिभ्यः कः प्रत्ययो भवति। ऋश्यकः। न्यग्रोधकः॥ ऋश्य। न्यग्रोध। शिरा। निलीन। निवास। निधान। निवात। निबद्ध। विबद्ध। परिगूढ। उपगूढ। उत्तराश्मन्। स्थूलबाहु। खदिर। शर्करा। अनडुह्। परिवंश। वेणु। वीरण। ऋश्यादिः॥ कुमुदादिभ्यष्ठच् प्रत्ययो भवति। कुमुदिकम्। शर्करिकम्॥ कुमुद। शर्करा। न्यग्रोध। इत्कट। गर्त। बीज। अश्वत्थ। बल्बज। परिवाप। शिरीष। यवाष। कूप। विकङ्कत। कुमुदादिः॥ काशादिभ्य इलः प्रत्ययो भवति। काशिलम्। वाशिलम्॥ काश। वाश। अश्वत्थ। पलाश। पीयूष। विश। तृण। नर। चरण। कर्दम। कर्पूर। कण्टक। गृह। काशादिः॥ तृणादिभ्यः सः प्रत्ययो भवति। तृणसः। नडसः॥ तृण। नड। बुस। पर्ण। वर्ण। चरण। अर्ण। जन। बल। लव। वन। तृणादिः॥ प्रेक्षादिभ्य इनिप्रत्ययो भवति। प्रेक्षी। हलकी॥ प्रेक्षा। हलका। बन्धुका। ध्रुवका। क्षिपका। न्यग्रोध। इर्कुट। प्रेक्षादिः॥ अश्मादिभ्यो रप्रत्ययो भवति। अश्मरः॥ अश्मन्। यूष। रूष। मीन। दर्भ। वृन्द। गुड। खण्ड। नग। शिखा। अश्मादिः॥ सख्यादिभ्यो ढञ् प्रत्ययो भवति। साखेयम्। साखिदत्तेयम्॥ सखि। सखिदत्त। वायुदत्त। गोहित। भल्ल। पाल। चक्रपाल। चक्रवाल। छगल। अशोक। करवीर। सीकर। सकर। सरस। समल। सख्यादिः॥ संकाशादिभ्यो ण्यप्रत्ययो भवति। सांकाश्यम्। काम्पिल्यम्॥ संकाश। काम्पिल्य। समीर। कश्मर। शूरसेन। सुपथिन्। सक्थच। यूप। अंश। एग। अश्मन्। कूट। मलिन। तीर्थ। अगस्ति। विरत। चिकार। विरह। नासिका। संकाशादिः॥ बलादिभ्यो यः प्रत्ययो भवति। बल्यः। कुल्यम्॥ बल। वुल। तुल। उल। डुल। कवल। वन। कुल। बलादिः॥ पक्षादिभ्यः फक् प्रत्ययो भवति। पाक्षायणः। तौषायणः॥ पक्ष। तुष। अण्ड। कम्बलिक। चित्र। अश्मन्। अतिस्वन्। पथिन् पन्थ च (ग० सू० ८६)। पक्षादिः॥ कर्णादिभ्यः फिञ् प्रत्ययो भवति। कार्णायनिः। वासिष्ठायनिः॥ कर्ण। वसिष्ठ। अलुश। शल। डुपद। अनडुह्य। पाञ्चजन्य। स्थिरा। कुलिश। कुम्भी। जीवन्ती। जित्व। आण्डीवत्। कर्णादिः॥ सुतङ्गमादिभ्य इञ् प्रत्ययो भवति। सौतङ्गमिः। मौनिचित्तिः॥ सुतङ्गम। मुनिचित्त। विप्रचित्त। महापुत्र। श्वेत। गडिक। शुक्र। विग्र। बीजवापिन्। श्वन्। अर्जुन। अजिर। जीव। सुतङ्गमादिः॥ प्रगदिन्नादिभ्यो ञ्यः प्रत्ययो भवति। प्रागद्यम्॥ प्रगदिन्। मगदिन्। शरदिन्। कलिव। खडिव। गडिव। चूडार। मार्जार। कोविदार। प्रगद्यादिः॥ वराहादिभ्यः कक् प्रत्ययो भवति। वाराहकम्। पालाशकम्॥ वराह। पलाश। शिरीष। पिनद्ध। स्थूण। विदग्ध। विजग्ध। विभग्न। बाहु। खदिर। शर्करा। वराहादिः॥ कुमुदादिभ्यष्ठक् प्रत्ययो भवति। कौमुदिकम्॥ कुमुद। गोमथ।

---

१ – ' शः ' इत्यपपाठो मुद्रितेषु । ' तृणशः, नडशः ' इत्युदाहरणे अपि तथैव ।

रथकार। दशग्राम। अश्वत्थ। शाल्मली। कुण्डल। मुनिस्थूल। कूट। मुचुकर्ण। कुमुदादिः॥ शिरीषशब्दोऽरीहणादिषु, कुमुदादिषु, वराहादिषु च पठ्यते, औत्सर्गिकोऽपि तत इष्यते, तस्य च वरणादिषु दर्शनाल् लुब् भवति। तथा चोक्तम्—शिरीषाणामदूरभवो ग्रामः शिरीषाः, तस्य वनं शिरीषवनम् (का० १.२.५१) इति॥

जनपदे लुप् ॥ ८१ ॥

देशे तन्नाम्नीति यश्चातुरर्थिकः प्रत्ययो भवति, तस्य देशविशेषे जनपदेऽभिधेये लुब् भवति। ग्रामसमुदायो जनपदः। पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः। मत्स्याः। अङ्गाः। वङ्गाः। मगधाः। सुह्माः। पुण्ड्राः। इह कस्माद् न भवति—उदुम्बरा अस्मिन् सन्ति, औदुम्बरो जनपदः, वैदिशो जनपद इति ? तन्नाम्नीति वर्तते। न चात्र लुबन्तं तन्नामधेयं भवति॥

वरणादिभ्यश्च ॥ ८२ ॥

वरण इत्येवमादिभ्य उत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य लुब् भवति। अजनपदार्थ आरम्भः। वरणानामदूरभवं नगरं वरणाः। शृङ्गी। शाल्मलयः। चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति। कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी। शिरीषाः। काञ्ची॥ वरणाः, पूर्वौ गोदौ। आलिङ्ग्यायन। पर्णी। शृङ्गी। शाल्मलयः। सदाण्वी। वणिकि। वणिक। जालपद। मथुरा। उज्जयिनी। गया। तक्षशिला। उरशा। आकृत्या॥

शर्कराया वा ॥ ८३ ॥

शर्कराशब्दादुत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य वा लुब् भवति। वाग्रहणं किम्, यावता शर्कराशब्दः कुमुदादिषु वराहादिषु च पठ्यते, तत्र पाठसामर्थ्यात् प्रत्ययस्य पक्षे श्रवणं भविष्यति ? एवं तर्ह्येतज् ज्ञापयति—शर्कराशब्दादौत्सर्गिको भवति, तस्यायं विकल्पितो लुबिति। शर्करा। शार्करम्। गणपाठात् च श्रवणमुत्तरसूत्रे विहितौ च द्वौ प्रत्ययौ, तदेवं षड् रूपाणि भवन्ति। शर्करा। शार्करम्। शर्करिकम्। शार्करकम्। शार्करिकम्। शर्करीयमिति॥

ठक्छौ च ॥ ८४ ॥

शर्कराशब्दाट् ठक् छ इत्येतौ प्रत्ययौ भवतश्चातुरर्थिकौ। यथासंभवमर्थसंबन्धः। शार्करिकम्। शर्करीयम्॥

नद्यां मतुप् ॥ ८५ ॥

नद्यामभिधेयायां मतुप् प्रत्ययो भवति चातुरर्थिकः। तन्नाम्नो देशस्य विशेषणं नदी। उदुम्बरा यस्यां सन्ति उदुम्बरावती। मशकावती। वीरणावती। पुष्करावती। इक्षुमती। द्रुमती। इह कस्माद् न भवति—भागीरथी। भैमरथी ? मतुबन्तस्यातन्नामधेयत्वात्॥

मध्वादिभ्यश्च ॥ ८६ ॥

मधु इत्येवमादिभ्यः शब्देभ्यो मतुप् प्रत्ययो भवति चातुरर्थिकः। अनद्यर्थ आरम्भः। मधुमान्। बिसवान्॥ मधु। बिस। स्थाणु। मुष्टि। इक्षु। वेणु। रम्य। ऋक्ष। कर्कन्धु। शमी। किरीर। हिम। किशरा। शर्पणा। मरुत्। मरुव। दार्वाघाट। शर। इष्टका। तक्षशिला। शक्ति। आसन्दी। आसुति। शलाका। आमिधी। खडा। वेटा। मध्वादिः॥

कुमुदनडवेतसेभ्यो ड्मतुप्॥ ८७ ॥

कुमुद नड वेतस इत्येतेभ्यः शब्देभ्यो ड्मतुप् प्रत्ययो भवति चातुरर्थिकः। कुमुद्वान्। नड्वान्। वेतस्वान् ॥ महिषाच्चेति वक्तव्यम्॥ महिष्मान् नाम देशः॥

नडशादाड् ड्वलच् ॥ ८८ ॥

नडशादशब्दाभ्यां ड्वलच् प्रत्ययो भवति चातुरर्थिकः। यथासंभवमर्थसंबन्धः। नड्वलम्। शाद्वलम्॥

शिखाया वलच् ॥ ८९ ॥

शिखाशब्दाद् वलच् प्रत्ययो भवति चातुरर्थिकः। यथासंभवमर्थसंबन्धः। शिखावलं नाम नगरम्। मतुप्प्रकरणेऽपि शिखाया वलचं (५.२.११३) वक्ष्यति, तददेशार्थं वचनम्॥

उत्करादिभ्यश्छः ॥ ९० ॥

उत्कर इत्येवमादिभ्यश्छः प्रत्ययो भवति चातुरर्थिकः। यथासंभवमर्थसंबन्धः। उत्करीयम्। शफरीयम्॥ उत्कर। संफल। शफर। पिप्पल। पिप्पलीमूल। अश्मन्। अर्क। पर्ण। सुपर्ण। खलाजिन। इडा। अग्नि। तिक। कितव। आतप। अनेक। पलाश। तृणव। पिचुक। अश्वत्थ। शकाक्षुद्र। भस्त्रा। विशाला। अवरोहित। गर्त। शाल। अन्य। जन्या। अजिन। मञ्च। चर्मन्। उत्क्रोश। शान्त। खदिर। शूर्पणाय।

श्यावनाय। नैव। बक। नितान्त। वृक्ष। इन्द्रवृक्ष। आर्द्रवृक्ष। अर्जुनवृक्ष। उत्करादिः॥

नडादीनां कुक् च ॥ ९१ ॥

नड इत्येवमादीनां कुगागमो भवति, छश्च प्रत्ययश्चातुरर्थिकः। यथासंभवमर्थ-संबन्धः। नडकीयम्। प्लक्षकीयम्॥ नड। प्लक्ष। बिल्व। वेणु। वेत्र। वेतस। तृण। इक्षु। काष्ठ। कपोत। क्रुञ्चाया ह्रस्वत्वं च (ग० सू० ९०)। तक्षन् नलोपश्च (ग० सू० ९१)॥

शेषे ॥ ९२ ॥

शेष इत्यधिकारोऽयम्। यानित ऊर्ध्वं प्रत्ययाननुक्रमिष्यामः, शेषेऽर्थे ते वेदितव्याः। उपयुक्तादन्यः शेषः। अपत्यादिभ्यश्चतुरर्थपर्यन्तेभ्योऽन्योऽर्थः शेषः। तस्येदंविशेषा ह्यपत्य- समूहादयः, तेषु घादयो मा भूवन्निति शेषाधिकारः क्रियते। किं च, सर्वेषु जातादिषु घादयो यथा स्युः, अनन्तरेणैवार्थादेशेन संबन्धित्वेन कृतार्थता मा विज्ञायीति[1] साकल्यार्थं शेषवचनम्। वक्ष्यति—'राष्ट्रावारपाराद् घखौ' (४.२.९३)—राष्ट्रियः। अवारपारीणः। शेष इति लक्षणं चाधिकारश्च। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्णः औलूखलो यावकः। अश्वैरुह्यत आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्यां दृश्यते चातुर्दशं रक्ष इति॥

राष्ट्रावारपाराद् घखौ ॥ ९३ ॥

राष्ट्र अवारपार इत्येताभ्यां यथासंख्यं घखावित्येतौ प्रत्ययौ भवतः। राष्ट्रियः। अवारपारीणः॥ विगृहीतादपीष्यते॥ अवारीणः। पारीणः॥ विपरीताच्च॥ पारावारीणः। प्रकृतिविशेषोपादानमात्रेण तावत् प्रत्यया विधीयन्ते। तेषां तु जातादयोऽर्थाः समर्थविभक्तयश्च पुरस्ताद् वक्ष्यन्ते॥

ग्रामाद् यखञौ ॥ ९४ ॥

ग्रामशब्दाद् य खञ् इत्येतौ प्रत्ययौ भवतः। ग्राम्यः। ग्रामीणः॥

कत्र्यादिभ्यो ढकञ् ॥ ९५ ॥

कत्रि इत्येवमादिभ्यो ढकञ् प्रत्ययो भवति। कात्रेयकः। औम्भेयकः॥ कत्रि। उम्भि। पुष्कर। पुष्कल[2]। मोदन। कुम्भी। कुण्डिन। नगर। वञ्जी। भक्ति।

---

१ - ' ज्ञायीति ' इति मुद्रितेषु। २ - ' पुष्कल ' इति नास्ति है०।

माहिष्मती। चर्मण्वती। ग्राम। उख्या। कुड्याया यलोपश्च (ग० सू० ९२)। कत्र्यादिः॥

कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु ॥ ९६ ॥

कुलकुक्षिग्रीवाशब्देभ्यो यथासंख्यं श्वन् असि अलंकार इत्येतेषु जातादिष्वर्थेषु ढकञ् प्रत्ययो भवति। कौलेयको भवति श्वा चेत्। कौलोऽन्यः। कौक्षेयको भवत्यसिश्चेत्। कौक्षोऽन्यः। ग्रैवेयको भवत्यलंकारश्चेत्। ग्रैवोऽन्यः॥

नद्यादिभ्यो ढक् ॥ ९७ ॥

नदी इत्येवमादिभ्यो ढक् प्रत्ययो भवति। नादेयम्। माहेयम्। पूर्वनगरीशब्दोऽत्र पठ्यते। पौर्वनगरेयम्। केचित् तु पूर्वनगिरीति पठन्ति, विच्छिद्य च प्रत्ययं कुर्वन्ति। पौरेयम्। वानेयम्। गैरेयमिति। तदुभयमपि दर्शनं प्रमाणम्॥ नदी। मही। वाराणसी। श्रावस्ती। कौशाम्बी। नवकौशाम्बी। काशफरी। खादिरी। पूर्वनगरी। पावा। मावा। साल्वा। दार्वा। दाल्वा। वासेनकी। वडवाया वृषे (ग० सू० ९३)॥

दक्षिणापश्चात्पुरसस्त्यक् ॥ ९८ ॥

दक्षिणा पश्चात् पुरस् इत्येतेभ्यस्त्यक् प्रत्ययो भवति शैषिकः। दाक्षिणात्यः। पाश्चात्त्यः। पौरस्त्यः॥

कापिश्याः ष्फक् ॥ ९९ ॥

कापिशीशब्दात् ष्फक् प्रत्ययो भवति शैषिकः। षकारो ङीषर्थः। कापिशायनं मधु। कापिशायनी द्राक्षा ॥ बाह्लीप्रदीपदीभ्यश्चेति वक्तव्यम्॥ बाह्लायनी। औदायनी। पादायनी॥

रङ्कोरमनुष्येऽण् च ॥ १०० ॥

रङ्कुशब्दादण् प्रत्ययो भवति, चकारात् ष्फक् च शैषिकोऽमनुष्येऽभिधेये। राङ्कवो गौः। राङ्कवायणो गौः। अमनुष्य इति किम्? राङ्कवको मनुष्यः। ननु च रङ्कुशब्दः कच्छादिषु (४.२.१३३) पठ्यते, तत्र च 'मनुष्यतत्स्थयोर्वुञ्' (४.२.१३४) इति मनुष्ये परत्वाद् वुञैव भवितव्यम् , कच्छादिपाठादमनुष्येऽणपि सिद्धः, किमिह मनुष्य-प्रतिषेधेनाण्ग्रहणेन च ? तदुच्यते, नैवायं मनुष्यप्रतिषेधः। किं तर्हि ? नञिवयुक्तन्यायेन

---

१ - 'कुल्याया' इति बाल०।

(परि० ७४) मनुष्यसदृशे प्राणिनि प्रतिपत्तिः क्रियते। तेन राङ्कवः कम्बल इति ष्फग् न भवति। विशेषविहितेन च ष्फकाणो बाधा मा भूदित्यण्ग्रहणमपि क्रियते॥

द्युप्रागपागुदक्प्रतीचो यत् ॥ १०१ ॥

दिव् प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यो यत् प्रत्ययो भवति शैषिकः। दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्। अव्ययात् तु कालवाचिनः परत्वात् ट्युट्युलौ भवतः। प्राक्तनम्॥

कन्थायाष्ठक् ॥ १०२ ॥

कन्थाशब्दाट् ठक् प्रत्ययो भवति शैषिकः। कान्थिकः॥

वर्णो वुक् ॥ १०३ ॥

कन्थाया इत्येव। वर्णो या कन्था तस्या वुक् प्रत्ययो भवति शैषिकः। ठकोऽपवादः। वर्णुर्नाम नदः, तत्समीपो देशो वर्णुः। तद्विषयार्थवाचिनः कन्थाशब्दादयं प्रत्ययः। तथाहि— जातं हिमवत्सु कान्थकम्॥

अव्ययात् त्यप् ॥ १०४ ॥

अव्ययात् त्यप् प्रत्ययो भवति शैषिकः।

अमेहक्वतसित्रेभ्यस्त्यबूविधिर्योऽव्ययात् स्मृतः।
निनिर्भ्यां ध्रुवगत्योश्च प्रवेशो नियमे तथा॥

अमात्यः। इहत्यः। क्वत्यः। इतस्त्यः। तत्रत्यः। यत्रत्यः। परिगणनं किम्? औपरिष्टः। पौरस्तः। पारस्तः। वृद्धात् तु छो भवति। आरातीयः ॥ त्यबू नेर्ध्रुवे॥ नियतं ध्रुवं नित्यम् ॥ निसो गते॥ निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः ॥ आविस- श्छन्दसि॥ आविस्शब्दाच् छन्दसि त्यप् प्रत्ययो भवति। आविष्ट्यो वर्धते (ऋ० १.६५.५) ॥ अरण्याण् णो वक्तव्यः॥ आरण्याः सुमनसः ॥ दूरादेत्यः॥ दूरेत्यः पथिकः ॥ उत्तरादाहञ्॥ औत्तराहम्॥

ऐषमोह्यःश्वसोऽन्यतरस्याम् ॥ १०५ ॥

ऐषमस् ह्यस् श्वस् इत्येतेभ्योऽन्यतरस्यां त्यप् प्रत्ययो भवति शैषिकः। ऐषमस्त्यम्, ऐषमस्तनम्। ह्यस्त्यम्, ह्यस्तनम्। श्वस्त्यम्, श्वस्तनम्। 'श्वसस्तुट् च' (४.३.१५) इति ठञपि तृतीयो भवति। शौवस्तिकम्॥

तीररूप्योत्तरपदादञ्ञौ ॥ १०६ ॥

तीरोत्तरपदाद् रूप्योत्तरपदात् च प्रातिपदिकाद् यथासंख्यमञ् ञ इत्येतौ प्रत्ययौ भवतः शैषिकौ। अणोऽपवादौ। काकतीरम्। पाल्वलतीरम्। रूप्योत्तरपदात्—वार्करूप्यम्। शैवरूप्यम्। तीररूप्यान्तादिति नोक्तम्, बहुच्प्रत्ययपूर्वाद् मा भूदिति। बाहुतीरम्। अणेव भवति॥

दिक्पूर्वपदादसंज्ञायां ञः ॥ १०७ ॥

असंज्ञायामिति प्रकृतिविशेषणम्। दिक्पूर्वपदात् प्रातिपदिकादसंज्ञाविषयाद् ञः प्रत्ययो भवति शैषिकः। अणोऽपवादः। पौर्वशालः। दाक्षिणशालः। आपरशालः। असंज्ञायामिति किम् ? पूर्वैषुकामशमः। अपरैषुकामशमः। 'दिक्संख्ये संज्ञायाम्' (२. १.५०) इति समासः। 'प्राचां ग्रामनगराणाम्' (७.३.१४) इत्युत्तरपदवृद्धिः। पदग्रहणं स्वरूपविधिनिरासार्थम्॥

मद्रेभ्योऽञ् ॥ १०८ ॥

दिक्पूर्वपदादित्येव। दिक्पूर्वपदाद् मद्रशब्दादञ् प्रत्ययो भवति शैषिकः। पौर्वमद्रः। आपरमद्रः। 'दिशोऽमद्राणाम्' (७.३.१३) इति पर्युदासादादिवृद्धिरेव॥

उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ॥ १०९ ॥

दिग्ग्रहणं निवृत्तम्। उदीच्यग्रामवाचिनः प्रातिपदिकाद् बह्वचोऽन्तोदात्ताद् अञ् प्रत्ययो भवति शैषिकः। अणोऽपवादः। शैवपुरम्। माण्डवपुरम्। उदीच्यग्रामादिति किम् ? माथुरम्। बह्वच इति किम्? ध्वजी—ध्वाजम्। अन्तोदात्तादिति किम् ? शार्करीधानम्। शर्करीधानशब्दे लित्स्वरेण धाशब्द उदात्तः॥

प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥ ११० ॥

प्रस्थोत्तरपदात् पलद्यादिभ्यः ककारोपधात् च प्रातिपदिकादण् प्रत्ययो भवति शैषिकः। उदीच्यग्रामलक्षणस्याजोऽपवादः। माद्रीप्रस्थः। माहकीप्रस्थः। पलद्यादिभ्यः—पालदः। पारिषदः। ककारोपधात्—नैलीनकः। चैयातकः। पलद्यादिषु यो वाहीकग्रामः, ततष्ठञ्ञिठयोः (४.२.११७) अपवादः। यथा—गौष्ठी, नैतकीति। गोमतीशब्दः पठ्यते, ततो 'रोपधेतोः प्राचाम्' (४.२.१२३) इति वुञोऽपवादः। वाहीकशब्दः कोपधोऽपि पुनः पठ्यते परं छं (४.२.११४) बाधितुम्। अण्ग्रहणं बाधकबाधनार्थम्॥ पलदी। परिषत्। यकृल्लोमन्।

---

१ - 'बाहुरूप्यम्' इति मुद्रितेषु। २ - 'धानशब्द' इति है०।

रोमक। कालकूट। पटच्चर। वाहीक। कलकीट। मलकीट। कमलकीट। कमलभिदा। गोष्ठी। कमलकीर। बाहुकीट। नैतकी। परिखा। शूरसेन। गोमती। उदयान। पलद्यादिः॥

कण्वादिभ्यो गोत्रे ॥ १११ ॥

गोत्रमिह न प्रत्ययार्थो न च प्रकृतिविशेषणम्। तर्ह्येवं संबध्यते—कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितः, तदन्तेभ्य एवाण् प्रत्ययो भवति शैषिकः। छस्यापवादः। काण्वाश्छात्राः। गौकक्षाः॥

इञश्च ॥ ११२ ॥

गोत्र इत्येव। गोत्रे य इञ् विहितः, तदन्तात् प्रातिपदिकादण् प्रत्ययो भवति शैषिकः। छस्यापवादः। दाक्षाः। प्लाक्षाः। माहकाः। गोत्र इत्येव—सौतङ्गमेरिदं सौतङ्गमीयम्॥

न द्व्यचः प्राच्यभरतेषु ॥ ११३ ॥

द्व्यचः प्रातिपदिकात् प्राच्यभरतगोत्रादिञन्तादण् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। पैङ्गीयाः। प्रौष्ठीयाः। चैदीयाः। पौष्कीयाः। काशीयाः। पाशीयाः। द्व्यच इति किम् ? पान्नागाराः। प्राच्यभरतेष्विति किम् ? दाक्षाः। काशीया इति कथमुदाहृतम् , यावता काश्यादिभ्यष्ठञ्ञिठाभ्यां (४.२.११६) भवितव्यम् ? नैतदस्ति। देशवाचिनः काशिशब्दस्य तत्र ग्रहणम् , चेदिशब्देन[1] साहचर्यात्। गोत्रात् तु 'वृद्धाच्छः' (४.२.११४) एव भवति। ज्ञापकाद् (२.४.६६) अन्यत्र प्राच्यग्रहणेन भरतग्रहणं न भवतीति स्वशब्देन भरतानामुपादानं कृतम्॥

वृद्धाच्छः ॥ ११४ ॥

गोत्र इति नानुवर्तते। सामान्येन विधानम्। वृद्धात् प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः। अणोऽपवादः। गार्गीयः। वात्सीयः। शालीयः। मालीयः। अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधीन् (४.२.१०४, १०६, १०९, ११०) तु परत्वाद् बाधते॥

भवतष्ठक्छसौ ॥ ११५ ॥

---

१ - 'चैदिशब्देन' इति मुद्रितपाठः। 'बैदि०' इति पाठान्तरम्।

वृद्धादित्येव। भवच्छब्दाद् वृद्धात् ठक्छसित्येतौ प्रत्ययौ भवतः शैषिकौ। छस्यापवादौ। सकारः पदसंज्ञार्थः। भवतस्त्यदादित्वाद् वृद्धसंज्ञा। भावत्कः। भवदीयः। अवृद्धात् तु भवतः शतुरणेव भवति। भावतः॥

काश्यादिभ्यष्ठञ्ञिठौ ॥ ११६ ॥

काशि इत्येवमादिभ्यष्ठञ् ञिठ इत्येतौ प्रत्ययौ भवतः शैषिकौ। इकार उच्चारणार्थः। ञकार एवोभयत्र विपर्यस्तदेशोऽनुबन्धः। स्त्रीप्रत्यये विशेषः। काशिकी, काशिका। चैदिकी, चैदिका। वृद्धादित्यत्रानुवर्तते। ये त्ववृद्धाः पठ्यन्ते वचनप्रामाण्यात् तेभ्यः प्रत्ययविधिः। देवदत्तशब्दः पठ्यते, तस्य 'एङ् प्राचां देशे' (१.१.७५) इति वृद्धसंज्ञा। दैवदत्तिकः। वाहीकग्रामस्य तु नास्ति वृद्धसंज्ञा। दैवदत्तः। कथं भाष्य उदाहृतम्—वा नामधेयस्य वृद्धसंज्ञा वेदितव्या—देवदत्तीयाः, दैवदत्ताः (महाभाष्य १.१८६) इति, यावता वृद्धसंज्ञापक्षे काश्यादित्वाट् ठञ्ञिठाभ्यां भवितव्यम् ? तत्रैवं वर्णयन्ति—वा नामधेयस्येति व्यवस्थितविभाषेयम्, सा छे कर्तव्ये भवति, ठञ्ञिठयोर्न भवतीति॥ काशि। चेदि। संज्ञा। संवाह। अच्युत। मोहमान। शकुलाद। हस्तिकर्षू। कुदामन्। हिरण्य। करण। गोधाशन। भौरिकि। भौलिङ्गि। अरिन्दम। सर्वमित्र। देवदत्त। साधुमित्र। दासमित्र। दासग्राम। सौधावतान। युवराज। उपराज। सिन्धुमित्र। देवराज। आपदादिपूर्वपदात् कालात् (ग० सू० ६४)। आपत्कालिकी, आपत्कालिका। और्ध्वकालिकी, और्ध्वकालिका। तात्कालिकी, तात्कालिका॥

वाहीकग्रामेभ्यश्च ॥ ११७ ॥

वृद्धादित्येव। वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ प्रत्ययौ भवतः शैषिकौ। छस्यापवादौ। शाकलिकी, शाकलिका। मान्थविकी, मान्थविका॥

विभाषोशीनरेषु ॥ ११८ ॥

वृद्धादिति वर्तते, वाहीकग्रामेभ्य इति च। उशीनरेषु ये वाहीकग्रामाः, तद्वाचिभ्यो वृद्धेभ्यः प्रातिपदिकेभ्यो विभाषा ठञ्ञिठौ प्रत्ययौ भवतः। आह्वजालिकी, आह्वजालिका, आह्वजालीया। सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया॥

ओर्देशे ठञ् ॥ ११९ ॥

वृद्धादिति नानुवर्तते, उत्तरसूत्रे पुनर्वृद्धग्रहणात्। उवर्णान्ताद् देशवाचिनः प्रातिपदिकाट् ठञ् प्रत्ययो भवति शैषिकः। नैषादकर्षुकः। शाबरजम्बुकः। देश इति किम् ? पटोश्छात्राः

---

१ - 'बैदिकी, बैदिका' इति मुद्रितः पाठः। २ - 'बेदि' इति पाठान्तरम्।

पाटवाः। ठञ्ञिठयोः प्रकरणे ठञः केवलस्यानुवृत्तिर्न लभ्यत इति ठञ्ग्रहणं कृतम्॥

वृद्धात् प्राचाम् ॥ १२० ॥

ओर्देश इत्येव। उवर्णान्ताद् वृद्धात् प्राग्देशवाचिनः प्रातिपदिकाट् ठञ् प्रत्ययो भवति शैषिकः। आढकजम्बुकः। शाकजम्बुकः। नापितवास्तुकः। पूर्वेणैव ठञि सिद्धे नियमार्थं वचनम्—वृद्धादेव प्राचाम् , अवृद्धाद् न भवतीति। मल्लवास्तु—माल्लवास्तवः॥

धन्वयोपधाद् वुञ् ॥ १२१ ॥

वृद्धादिति वर्तते, देश इति च। धन्ववाचिनो यकारोपधात् च देशाभिधायिनो वृद्धात् प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। धन्वशब्दो मरुदेशवचनः। पारेधन्वकः। ऐरावतकः। योपधात्—सांकाश्यकः। काम्पिल्यकः॥

प्रस्थपुरवहान्ताच्च ॥ १२२ ॥

वृद्धादित्येव, देश इति च। अन्तशब्दः प्रत्येकमभिसंबध्यते। प्रस्थ पुर वह इत्येवमन्ताद् देशवाचिनः प्रातिपदिकाद् वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः। छस्यापवादः। मालाप्रस्थकः। नान्दीपुरकः। कान्तीपुरकः। पैलुवहकः। फाल्गुनीवहकः। पुरान्तो रोपधः, तत उत्तरसूत्रेणैव सिद्धम् , अप्रागर्थमिह ग्रहणम्॥

रोपधेतोः प्राचाम् ॥ १२३ ॥

वृद्धादित्येव, देश इति च। तद्विशेषणं प्राग्ग्रहणम्। रोपधादीकारान्तात् च प्राग्देश- वाचिनो वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः। छस्यापवादः। पाटलिपुत्रकाः। ऐकचक्रकाः। ईतः खल्वपि—काकन्दी—काकन्दकः। माकन्दी—माकन्दकः। प्राचामिति किम् ? दात्तामित्रीयः। तपरकरणं विस्पष्टार्थम्॥

जनपदतदवध्योश्च ॥ १२४ ॥

वृद्धादित्येव, देश इति च। तद्विशेषणं जनपदतदवधी। वृद्धात् जनपदवाचिन- स्तदवधिवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। छस्यापवादः। आभिसारकः। आदर्शकः। जनपदावधेः खल्वपि—औपुष्टकः। श्यामायनकः। तदवधिरपि जनपद एव गृह्यते न ग्रामः। किमर्थं तर्हि अवधिग्रहणम् ? बाधकबाधनार्थम्। गर्तोत्तरपदाच्छं बाधित्वा वुञ्येव जनपदावधेर्भवति। त्रैगर्तकः॥

अवृद्धादपि बहुवचनविषयात् ॥ १२५ ॥

जनपदतदवध्योरित्येव। अवृद्धाद् वृद्धात् च जनपदात् तदवधिवाचिनश्च बहुवचन- विषयात् प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। अण्छयोरपवादः। अवृद्धाद् जनपदात् तावत्—अङ्गाः। वङ्गाः। कलिङ्गाः। आङ्गकः। वाङ्गकः। कालिङ्गकः। अवृद्धाज्जनपदावधेः—अजमीढाः। अजक्रन्दाः। आजमीढकः। आजक्रन्दकः। वृद्धात् जनपदात्—दार्वाः। जाम्ब्वाः। दार्वकः। जाम्ब्वकः। वृद्धाद् जनपदावधेः—कालञ्जराः। वैकुलिशाः। कालञ्जरकः। वैकुलिशकः। विषयग्रहणमनन्यत्रभावार्थम्। जनपदैकशेषबहुत्वे मा भूत्। वर्तन्यः—वार्तनः। अपिग्रहणं किम्, यावता वृद्धात् पूर्वेणैव सिद्धम् ? तक्रकौण्डिन्य- न्यायेन बाधा मा विज्ञायीति समुच्चीयते॥

कच्छाग्निवक्त्रगर्तोत्तरपदात् ॥ १२६ ॥

देश इत्येव। उत्तरपदशब्दः प्रत्येकमभिसंबध्यते। कच्छाद्युत्तरपदाद् देशवाचिनः प्रातिपदिकात् चावृद्धाद् वृद्धात् च वुञ् प्रत्ययो भवति शैषिकः। छाणोरपवादः। दारुकच्छकः। पैप्पलीकच्छकः। काण्डाग्नकः। वैभुजाग्नकः। ऐन्द्रवक्त्रकः। सैन्धुवक्त्रकः। बाहुगर्त्तकः। चाक्रगर्त्तकः॥

धूमादिभ्यश्च ॥ १२७ ॥

धूमादिभ्यो देशवाचिभ्यः प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति शैषिकः। अणादेरपवादः। धौमकः। खाण्डकः। पाथेयशब्दः पठ्यते, तस्य योपधत्वादेव वुञि सिद्धे सामर्थ्याददेशार्थं ग्रहणम्। तथा विदेहानर्तशब्दयोर्जनपदलक्षणे वुञि सिद्धेऽदेशार्थः पाठः। विदेहानां क्षत्रियाणां स्वं वैदेहकम्। आनर्तकम्। समुद्रशब्दः पठ्यते, तस्य नावि मनुष्ये च वुञिष्यते। सामुद्रिका नौः। सामुद्रको मनुष्यः। अन्यत्र न भवति—सामुद्रं जलमिति॥ धूम। खण्ड। शशादन। आर्जुनाद। दाण्डायनस्थली। माहकस्थली। घोषस्थली। माषस्थली। राजस्थली। राजगृह। सत्रासाह। भक्षास्थली। मद्रकूल। गर्तकूल। आञ्जीकूल। द्व्याहाव। त्र्याहाव। संहीय। वर्वर। वर्चगर्त। विदेह। आनर्त। माठर। पाथेय। घोष। शिष्य। मित्र। वल। आराज्ञी। धार्तराज्ञी। अवयात। तीर्थ। कूलात् सौवीरेषु (ग० सू० ६५)। समुद्रान्नावि मनुष्ये च (ग० सू० ६६)। कुक्षि। अन्तरीप। द्वीप। अरुण। उज्जयिनी। दक्षिणापथ। साकेत॥

नगरात् कुत्सनप्रावीण्ययोः ॥ १२८ ॥

नगरशब्दाद् वुञ् प्रत्ययो भवति शैषिकः कुत्सने प्रावीण्ये च गम्यमाने। प्रत्ययार्थ-विशेषणं चैतत्, कुत्सने प्रावीण्ये च जातादौ प्रत्ययार्थ इति। कुत्सनं निन्दनम्। प्रावीण्यं नैपुण्यम्।

केनायं मुषितः पन्था गात्रे पक्ष्मालिधूसरः।
इह नगरे मनुष्येण संभाव्यत एतन्नागरकेण। चोरा हि नागरका भवन्ति।
केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत्।
इह नगरे मनुष्येण संभाव्यत एतन्नागरकेण। प्रवीणा हि नागरका भवन्ति। कुत्सनप्रावीण्ययोरिति किम् ? नागरा ब्राह्मणाः। कन्यादिषु तु संज्ञाशब्देन साहचर्यात् संज्ञानगरं पठ्यते, तस्मिन् नागरेयकमिति प्रत्युदाहार्यम्॥

अरण्यान् मनुष्ये ॥ १२९ ॥

अरण्यशब्दाद् वुञ् प्रत्ययो भवति शैषिको मनुष्येऽभिधेये। औपसंख्यानिकस्य णस्यापवादः। आरण्यको मनुष्यः ॥ पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्॥ आरण्यकः पन्थाः। आरण्यकोऽध्यायः। आरण्यको न्यायः। आरण्यको विहारः। आरण्यको मनुष्यः। आरण्यको हस्ती ॥ वा गोमयेषु॥ आरण्याः, आरण्यका गोमयाः। एतेष्विति किम् ? आरण्याः पशवः॥

विभाषा कुरुयुगन्धराभ्याम् ॥ १३० ॥

कुरु युगन्धर इत्येताभ्यां विभाषा वुञ् प्रत्ययो भवति शैषिकः। कौरवकः, कौरवः। यौगन्धरकः, यौगन्धरः। जनपदशब्दावेतौ, ताभ्याम् 'अवृद्धादपि०' (४.२.१२५) इति नित्ये वुञि प्राप्ते विकल्प उच्यते। कुरुशब्दः कच्छादिषु (४.२.१३३) अपि पठ्यते, तत्र वचनादणपि भविष्यति। सैषा युगन्धरार्था विभाषा। 'मनुष्यतत्स्थयोः०' (४.२.१३४) तु कुरुशब्दाद् नित्य एव वुञ् प्रत्ययो भवति। कौरवको मनुष्यः, कौरवकमस्य हसितमिति॥

मद्रवृज्योः कन् ॥ १३१ ॥

मद्रवृजिशब्दाभ्यां कन् प्रत्ययो भवति शैषिकः। जनपदवुञोऽपवादः। मद्रेषु जातो मद्रकः। वृजिकः॥

कोपधादण् ॥ १३२ ॥

देश इत्येव। ककारोपधात् प्रातिपदिकादण् प्रत्ययो भवति शैषिकः। जनपदवुञोऽपवादः। अन्यत्र जनपदं मुक्त्वा पूर्वेण (४.२.११०) एव कोपधादणि सिद्धम्। ऋषिकेषु जातः, आर्षिकः। माहिषिकः। अण्ग्रहणमुवर्णान्तादपि यथा स्यात्। इक्ष्वाकुषु जात ऐक्ष्वाकः॥

---

१ - ' पारिशेष्यात् ' इति बाल०।

कच्छादिभ्यश्च ॥ १३३ ॥

देश इत्येव। कच्छ इत्येवमादिभ्यो देशवाचिभ्योऽण् प्रत्ययो भवति शैषिकः। वुञादेरपवादः। काच्छः। सैन्धवः। वार्णवः। कच्छशब्दो न बहुवचनविषयः, तस्य मनुष्यतत्स्थयोर्वुञर्थः (४.२.१३४) पाठः। विजापकशब्दः पठ्यते। तस्य कोपधत्वाद् (४.२.१३२) एवाणि सिद्ध इह ग्रहणमुत्तरार्थम्॥ कच्छ। सिन्धु। वर्णु। गन्धार। मधुमत्। कम्बोज। कश्मीर। साल्व। कुरु। रङ्कु। अणु। खण्ड। द्वीप। अनूप। अजवाह। विजापक। कुलून। कच्छादिः॥

मनुष्यतत्स्थयोर्वुञ् ॥ १३४ ॥

कच्छादिभ्य इत्येव। मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे कच्छादिभ्यो वुञ् प्रत्ययो भवति। अणोऽपवादः। काच्छको मनुष्यः। काच्छकमस्य हसितम् , जल्पितम्। काच्छिका चूडा। सैन्धवको मनुष्यः। सैन्धवकमस्य हसितम् , जल्पितम्। सैन्धविका चूडा। मनुष्यतत्स्थयोरिति किम् ? काच्छो गौः। सैन्धवः। वार्णवः॥

अपदातौ साल्वात् ॥ १३५ ॥

साल्वशब्दः कच्छादिषु पठ्यते, ततः पूर्वेणैव मनुष्यतत्स्थयोर्वुञि सिद्धे नियमार्थं वचनम्। अपदातावेव मनुष्ये मनुष्यस्थे च साल्वशब्दाद् वुञ् प्रत्ययो भवति। साल्वको मनुष्यः। साल्वकमस्य हसितम्, जल्पितम्। अपदाताविति किम् ? साल्वः पदातिर्व्रजति॥

गोयवाग्वोश्च ॥ १३६ ॥

गवि यवाग्वां च जातादौ प्रत्ययार्थे साल्वशब्दाद् वुञ् प्रत्ययो भवति शैषिकः। कच्छाद्यणोऽपवादः। साल्वको गौः। साल्विका यवागूः। साल्वमन्यत्॥

गर्तोत्तरपदाच्छः ॥ १३७ ॥

देश इत्येव। गर्तोत्तरपदाद् देशवाचिनः प्रातिपदिकात् छः प्रत्ययो भवति शैषिकः। अणोऽपवादः। वाहीकग्रामलक्षणं च प्रत्ययं परत्वाद् बाधते। वृकगर्तीयम्। शृगालगर्तीयम्। श्वाविद्गर्तीयम्। उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम्। बाहुगर्तम्॥

गहादिभ्यश्च ॥ १३८ ॥

गह इत्येवमादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति शैषिकः। अणादेरपवादः। गहीयः। अन्तःस्थीयः। देशाधिकारेऽपि संभवापेक्षं विशेषणम्, न सर्वेषाम्। मध्य मध्यमं

चाण् चरण इति पठ्यते, तस्यायमर्थः। मध्यशब्दः प्रत्ययसन्नियोगेन मध्यममापद्यते। मध्यमीयाः। चरणे तु प्रत्ययार्थेऽण् भवति, माध्यमा इति। तदेतद् विशेष एव स्मर्यते—पृथिवीमध्यस्य मध्यमभावः, चरणसंबन्धेन निवासलक्षणोऽणिति च। मुखपार्श्वतसोर्लोपश्च। मुखतीयम्। पार्श्वतीयम्। कुग् जनस्य परस्य च । जनकीयम्। परकीयम्। देवस्य चेति वक्तव्यम्। देवकीयम्। वेणुकादिभ्यश्छण् वक्तव्यः। आकृतिगणोऽयम्। वैणुकीयम्। वैत्रकीयम्। औत्तरपदकीयम्। प्रास्थकीयम्। माध्यमकीयम्॥ गह। अन्तःस्थ। सम। विषम। मध्य मध्यमं चाण् चरणे (ग० सू० ९७)। उत्तम। अङ्ग। वङ्ग। मगध। पूर्वपक्ष। अपरपक्ष। अधमशाख। उत्तमशाख। समानशाख। एकग्राम। एकवृक्ष। एकपलाश। इष्वग्र। इष्वनी। अवस्यन्दी। कामप्रस्थ। खाडायनि। कावेरणि। शैशिरि। शौङ्गि। आसुरि। आहिंसि। आमित्रि। व्याडि। वैदजि। भौजि। आढ्यश्वि। आनृशंसि। सौवि। पारकि। अग्निशर्मन्। देवशर्मन्। श्रौति। आरटकि। वाल्मीकि। क्षेमवृद्धिन्। उत्तर। अन्तर। मुखपार्श्वतसोर्लोपः (ग० सू० ९८)। जनपरयोः कुक् च (ग० सू० ९९)। देवस्य च (ग० सू० १००)। वेणुकादिभ्यश्छण् (ग० सू० १०१)। गहादिः॥

प्राचां कटादेः ॥ १३९ ॥

देश इत्येव, तद्विशेषणं प्राग्ग्रहणम्। प्राग्देशवाचिनः कटादेः प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः। अणोऽपवादः। कटनगरीयम्। कटघोषीयम्। कटपल्वलीयम्॥

राज्ञः क च ॥ १४० ॥

असंभवाद् देशाधिकारो न विशेषणम्। राज्ञः ककारश्चान्तादेशो भवति छश्च प्रत्ययः। राजकीयम्। आदेशमात्रमिह विधेयम् , प्रत्ययस्तु 'वृद्धाच्छः' (४. २. ११४) इत्येव सिद्धः॥

वृद्धादकेकान्तखोपधात् ॥ १४१ ॥

देश इत्येव। वृद्धाद् देशवाचिनोऽक इक इत्येवमन्तात् खकारोपधात् च प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः। कोपधलक्षणस्याणोऽपवादः, वाहीकग्रामलक्षणस्य च प्रत्ययस्य, 'रोपधेतोः प्राचाम्' (४.२.१२३) इति च। अकान्तात् तावत्—आरीहणकीयम्। द्रौघणकीयम्। इकान्तात्—आश्वपथिकीयम्। शाल्मलिकीयम्। खोपधात्—कौटिशिखीयम्। आयोमुखीयम् ॥ अकेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम्॥ सौसुकीयम्। मौसुकीयम्। ऐन्द्रवेणुकीयम्॥

कन्थापलदनगरग्रामह्रदोत्तरपदात् ॥ १४२ ॥

देश इत्येव, वृद्धादिति च। कन्थाद्युत्तरपदाद् देशवाचिनो वृद्धात् प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः। वाहीकग्रामादिलक्षणस्य प्रत्ययस्यापवादः। दाक्षिकन्थीयम्। माहिकिकन्थीयम्। दाक्षिपलदीयम्। माहिकिपलदीयम्। दाक्षिनगरीयम्। माहिकिनगरीयम्। दाक्षिग्रामीयम्। माहिकिग्रामीयम्। दाक्षिह्रदीयम्। माहिकिह्रदीयम्॥

पर्वताच्च ॥ १४३ ॥

पर्वतशब्दाच् छः प्रत्ययो भवति शैषिकः। अणोऽपवादः। पर्वतीयो राजा। पर्वतीयः पुरुषः॥

विभाषामनुष्ये ॥ १४४ ॥

पर्वतशब्दाच् छः प्रत्ययो भवति वामनुष्ये वाच्ये। पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। पर्वतीयानि फलानि, पार्वतानि फलानि। पर्वतीयमुदकम्, पार्वतमुदकम्। अमनुष्य इति किम् ? पर्वतीयो मनुष्यः॥

कृकणपर्णाद् भारद्वाजे ॥ १४५ ॥

देश इत्येव। भारद्वाजशब्दोऽपि देशवचन एव, न गोत्रशब्दः। प्रकृतिविशेषणं चैतत्, न प्रत्ययार्थः। कृकणपर्णशब्दाभ्यां भारद्वाजदेशवाचिभ्यां छः प्रत्ययो भवति शैषिकः। कृकणीयम्। पर्णीयम्। भारद्वाज इति किम् ? कार्कणम्। पार्णम्॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य द्वितीयः पादः॥



॥ चतुर्थाध्यायस्य तृतीयः पादः ॥

युष्मदस्मदोरन्यतरस्यां खञ् च ॥ १ ॥

देशाधिकारो निवृत्तः। युष्मदस्मदोः खञ् प्रत्ययो भवति शैषिकः। चकाराच् छश्च। अन्यतरस्यांग्रहणाद् यथाप्राप्तम्। तदेते त्रयः प्रत्यया भवन्ति, तत्र वैषम्याद् यथासंख्यं न भवति। त्यदादित्वाद् वृद्धसंज्ञकयोर्युष्मदस्मदोश्छे प्राप्ते प्रत्येकं प्रत्ययत्रयं विधीयते। यौष्माकीणः। आस्माकीनः। युष्मदीयः। अस्मदीयः। यौष्माकः। आस्माकः॥

तस्मिन्नणि च युष्माकास्माकौ ॥ २ ॥

तस्मिन्निति साक्षाद् विहितः खञ् निर्दिश्यते, न चकारानुकृष्टश्छः। तस्मिन् खञि अणि च युष्मदस्मदोर्यथासंख्यं युष्माक अस्माक इत्येतावादेशौ भवतः। निमित्तयोरादेशौ प्रति यथासंख्यं कस्माद् न भवति ? योगविभागः करिष्यते, तस्मिन् खञि युष्मदस्मदोर्युष्माकास्माकौ भवतः। ततोऽणि चेति। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः। तस्मिन्नणि चेति किम् ? युष्मदीयः। अस्मदीयः॥

तवकममकावेकवचने ॥ ३ ॥

एकवचनपरयोर्युष्मदस्मदोस्तवक ममक इत्येतावादेशौ भवतो यथासंख्यं तस्मिन् खञि अणि च परतः। निमित्तयोस्तु यथासंख्यं पूर्ववदेव न भवति। ननु च 'न लुमताङ्गस्य' (१.१.६३) इति प्रत्ययलक्षणप्रतिषेधादेकवचनपरता युष्मदस्मदोर्न संभवति? वचनात् प्रत्ययलक्षणं भविष्यति। अथवा नैवेदं प्रत्ययग्रहणम्। किं तर्हि ? अन्वर्थग्रहणम्। एकवचने युष्मदस्मदी एकस्यार्थस्य वाचके तवकममकावादेशौ प्रतिपद्येते इति सूत्रार्थः। तावकीनः। मामकीनः। तावकः। मामकः। तस्मिन्नणि चेत्येव—त्वदीयः। मदीयः॥

अर्धाद् यत् ॥ ४ ॥

अर्धशब्दाद् यत् प्रत्ययो भवति शैषिकः। अणोऽपवादः। अर्ध्यम् ॥ सपूर्वपदाट् ठञ् वक्तव्यः॥ बालेयार्धिकम्। गौतमार्धिकम्॥

परावराधमोत्तमपूर्वाच्च ॥ ५ ॥

पर अवर अधम उत्तम इत्येवंपूर्वाच् चार्धाद् यत् प्रत्ययो भवति शैषिकः। परार्ध्यम्।

---

१ - ' प्रत्ययलक्षणम् ' इति मुद्रितेष्वपपाठः ।

अवरार्ध्यम्। अधमार्ध्यम्। उत्तमार्ध्यम्। पूर्वग्रहणं किम्, परावराधमोत्तमेभ्य इत्येवोच्यते, अर्धादिति वर्तते। तस्य तत्पूर्वता विज्ञास्यते ? परावरशब्दावदिग्ग्रहणावपि स्तः, परं सुखम् अवरं सुखमिति। तत्र कृतार्थत्वाद् दिक्छब्दपक्षे परेण ठञ्यतौ स्याताम्। अस्मात् पूर्वग्रहणाद् यत् प्रत्ययो भवति—परार्ध्यम्, अवरार्ध्यमिति॥

दिक्पूर्वपदाट् ठञ् च ॥ ६ ॥

दिक्पूर्वपदादर्धान्तात् प्रातिपदिकात् ठञ् प्रत्ययो भवति चकाराद् यत् च शैषिकः। अणोऽपवादः। पौर्वार्धिकम्, पूर्वार्ध्यम्। दाक्षिणार्धिकम्, दक्षिणार्ध्यम्। पदग्रहणं स्वरूपविधिनिवारणार्थम्॥

ग्रामजनपदैकदेशादञ्ठञौ ॥ ७ ॥

दिक्पूर्वपदादित्येव। ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च प्रातिपदिकाद् दिक्पूर्वपदादर्धान्तादञ्ठञौ प्रत्ययौ भवतः शैषिकौ यतोऽपवादौ। इमे खल्वस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः, पौर्वार्धिकाः। दाक्षिणार्धाः, दाक्षिणार्धिकाः॥

मध्यान् मः ॥ ८ ॥

मध्यशब्दाद् मः प्रत्ययो भवति शैषिकः। अणोऽपवादः। मध्यमः॥ आदेश्चेति वक्तव्यम्॥ आदिमः॥ अवोऽधसोर्लोपश्च॥ अवमम्। अधमम्॥

अ साम्प्रतिके ॥ ९ ॥

अकारः प्रत्ययो भवति मध्यशब्दात् सांप्रतिके जातादौ प्रत्ययार्थे। मस्यापवादः। सांप्रतिकं न्याय्यं युक्तमुचितं सममुच्यते। नातिदीर्घं नातिह्रस्वं मध्यं काष्ठम्। नात्युत्कृष्टो नात्यवकृष्टो मध्यो वैयाकरणः। मध्या स्त्री॥

द्वीपादनुसमुद्रं यञ् ॥ १० ॥

समुद्रसमीपे यो द्वीपः, तस्माद् यञ् प्रत्ययो भवति शैषिकः। कच्छादिपाठाद् (४.२.१३३) अणो मनुष्यवुञः (४.२.१३४) चापवादः। द्वैप्यम्। द्वैप्यं भवन्तोऽनुचरन्ति चक्रम्। अनुसमुद्रमिति किम् ? द्वैपकम्। द्वैपमन्यत्॥

---

१ – 'द्वैप्याः' इति पाठान्तरम्।

कालाट् ठञ् ॥ ११ ॥

कालविशेषवाचिनः प्रातिपदिकाट् ठञ् प्रत्ययो भवति शैषिकः। अणोऽपवादः। वृद्धात् तु छं परत्वाद् बाधते। मासिकः। आर्धमासिकः। सांवत्सरिकः। यथाकथंचिद् गुणवृत्त्यापि काले वर्तमानात् प्रत्यय इष्यते। कादम्बपुष्पिकम्। व्रैहिपलालिकम्। 'तत्र जातः' (४.३.२५) इति प्रागतः कालाधिकारः॥

श्राद्धे शरदः ॥ १२ ॥

शरच्छब्दाट् ठञ् प्रत्ययो भवति श्राद्धेऽभिधेये शैषिकः। ऋत्वणः (४.३.१६) अपवादः। श्राद्ध इति च कर्म गृह्यते, न श्रद्धावान् पुरुषः, अनभिधानात्। शारदिकं श्राद्धम्। शारदमन्यत्॥

विभाषा रोगातपयोः ॥ १३ ॥

शरद इत्येव। रोग आतपे चाभिधेये शरच्छब्दाट् ठञ् प्रत्ययो वा भवति शैषिकः। ऋत्वणोऽपवादः। शारदिको रोगः। शारदिक आतपः। शारदो रोगः। शारद आतपः। रोगातपयोरिति किम् ? शारदं दधि॥

निशाप्रदोषाभ्यां च ॥ १४ ॥

निशाप्रदोषशब्दाभ्यां च विभाषा ठञ् प्रत्ययो भवति शैषिकः। 'कालाट् ठञ्' (४.३.११) इति नित्ये ठञि प्राप्ते विकल्प उच्यते। नैशिकम्, नैशम्। प्रादोषिकम्, प्रादोषम्॥

श्वसस्तुट् च ॥ १५ ॥

विभाषेत्येव। श्वःशब्दाद् विभाषा ठञ् प्रत्ययो भवति, तस्य च तुडागमो भवति। त्यप् प्रत्ययोऽप्यतो विहित 'ऐषमोह्यःश्वसोऽन्यतरस्याम्' (४.२.१०५) इति। एताभ्यां मुक्ते ट्युट्युलावपि भवतः। शौवस्तिकः, श्वस्त्यः, श्वस्तनः॥

संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ १६ ॥

कालादित्येव। संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् प्रत्ययो भवति शैषिकः। ठञोऽपवादः। अण्ग्रहणं वृद्धाच्छस्य (४.२.११४) बाधनार्थम्। संधिवेलादिभ्यस्तावत्—सांधिवेलम्। सांध्यम्। ऋतुभ्यः—ग्रैष्मम्। शैशिरम्। नक्षत्रेभ्यः—

तैषम्। पौषम्॥ संधिवेला। संध्या। अमावास्या। त्रयोदशी। चतुर्दशी। पञ्चदशी। पौर्णमासी। प्रतिपत्। संवत्सरात् फलपर्वणोः (ग० सू० १०२)। सांवत्सरं फलम्। सांवत्सरं पर्व॥

प्रावृष एण्यः ॥ १७ ॥

प्रावृष्शब्दादेण्यः प्रत्ययो भवति शैषिकः। ऋत्वणोऽपवादः। प्रावृषेण्यो बलाहकः॥

वर्षाभ्यष्ठक् ॥ १८ ॥

वर्षाशब्दाट् ठक् प्रत्ययो भवति शैषिकः। ऋत्वणोऽपवादः। वार्षिकं वासः। वार्षिकमनुलेपनम्॥

छन्दसि ठञ् ॥ १९ ॥

वर्षाशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः। ठकोऽपवादः। स्वरे भेदः। नभंश्च नभ१स्यंश्च१ वार्षिकावृतू (तै० सं० ४.४.११.१)॥

वसन्ताच्च ॥ २० ॥

छन्दसीत्येव। वसन्तशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः। ऋत्वणोऽ- पवादः। मधुंश्च१ माधवश्च१ वासन्तिकावृतू (तै० सं० ४.४.११.१)॥

हेमन्ताच्च ॥ २१ ॥

छन्दसीत्येव। हेमन्तशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः। ऋत्वणोऽ- पवादः। सहंश्च सह१स्यंश्च१ हैमन्तिकावृतू (तै० सं० ४.४.११.१)। योगविभाग उत्तरार्थः॥

सर्वत्राण् च तलोपश्च ॥ २२ ॥

हेमन्तशब्दादण् प्रत्ययो भवति, तत्सन्नियोगेन चास्य तकारलोपः। हैमनं वासः। हैमनमुपलेपनम्। सर्वत्रग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम्। छन्दसि भाषायां च सर्वत्रैतद् भवति। ननु च छन्दसीति नानुवर्तिष्यते ? सैवाननुवृत्तिः शब्देनाख्यायते प्रयत्नाधिक्येन पूर्वसूत्रेऽपि संबन्धार्थम्। हैमन्तिकमिति हि भाषायामपि ठञं स्मरन्ति। अथाण्चेति चकारः किमर्थः ? अण् , यथाप्राप्तं च ऋत्वणिति। कः पुनरनयोरणोर्विशेषः ? ऋत्वणि

---

१ - इतः पूर्वं ' सौवातम् ' इत्यधिकं पद० ।

हि तकारलोपो नास्ति हैमन्ती पङ्क्तिरिति। तदेवं त्रीणि रूपाणि भवन्ति। हैमंन्तिकम् (तै० सं० ४.४.११.१), हैमन्तम् (पै० सं० १७.२६.११), हैमंन्तनम् (शौ० सं० १५.४.१४) इति॥

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ २३ ॥

कालादित्येव। सायं चिरं प्राह्णे प्रगे इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ प्रत्ययौ भवतः, तयोश्चादिष्टयोः तुडागमो भवति। सायंतनम्। चिरंतनम्। प्राह्णेतनम्। प्रगेतनम्। अव्ययेभ्यः—दोषातनम्। दिवातनम्। सायमिति मकारान्तं पदमव्ययम्, ततोऽ- व्ययत्वादेव सिद्धः प्रत्ययः। यस्तु स्यतेरन्तकर्मणो घञि सायशब्दस्तस्येदं मकारान्तत्वं प्रत्ययसन्नियोगेन निपात्यते। दिवसावसानं सायः। चिरशब्दस्यापि मकारान्तत्वं निपात्यते। प्राह्णे प्रगे इत्येकारान्तत्वम् ॥ चिरपरुत्परारिभ्यस्त्नो वक्तव्यः॥ चिरत्नम्। परुत्नम्। परारित्नम् ॥ प्रगस्य छन्दसि गलोपश्च॥ प्रंत्नम्(ऋ० १.३६.४) ॥ अग्रपश्चाड्डिमच्॥ अग्रिमम्। पश्चिमम् ॥ अन्ताच्चेति वक्तव्यम्॥ अन्तिमम्॥

विभाषा पूर्वाह्णापराह्णाभ्याम् ॥ २४ ॥

पूर्वाह्णापराह्णशब्दाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ भवतः, तुट् च तयोरागमः। 'कालाट् ठञ्' (४.३.११) इति ठञि प्राप्ते वचनम्, पक्षे सोऽपि भवति। पूर्वाह्णेतनम्। अपराह्णेतनम्। पौर्वाह्णिकम्। आपराह्णिकम्। 'घकालतनेषु कालनाम्नः' (६.३.१७) इति सप्तम्या अलुक्। यदा तु न सप्तमी समर्थविभक्तिः पूर्वाह्णः सोढोऽस्येति तदा पूर्वाह्णतन इति भवितव्यम्॥

तत्र जातः ॥ २५ ॥

अणादयो घादयश्च प्रत्ययाः प्रकृताः, तेषामतः प्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते। तत्रेति सप्तमीसमर्थाद् जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। स्रुघ्ने जातः स्रौघ्नः। माथुरः। औत्सः। औदपानः। राष्ट्रियः। अवारपारीणः। शाकलिकः। माकलिकः। ग्राम्यः। ग्रामीणः। कात्रेयकः। औम्भेयकः॥

प्रावृषष्ठप् ॥ २६ ॥

प्रावृट्शब्दात् सप्तमीसमर्थाद् जात इत्येतस्मिन्नर्थे ठप् प्रत्ययो भवति। एण्यस्या- पवादः। पकारः स्वरार्थः। प्रावृषि जातः प्रावृषिकः॥

संज्ञायां शरदो वुञ् ॥ २७ ॥

शरच्छब्दात् सप्तमीसमर्थाद् जात इत्येतस्मिन्नर्थे वुञ् प्रत्ययो भवति, ऋत्वणोऽपवादः, समुदायेन चेत् संज्ञा गम्यते। शारदका दर्भाः। शारदका मुद्गाः। दर्भविशेषस्य मुद्गविशेषस्य चेयं संज्ञा। संज्ञायामिति किम् ? शारदं सस्यम्। संज्ञाधिकारं केचित् 'कृतलब्धक्रीतकुशलाः' (४.३.३८) इति यावदनुवर्तयन्ति॥

पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् ॥ २८ ॥

पूर्वाह्णादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवति तत्र जात इत्येतस्मिन् विषये संज्ञायां गम्यमानायाम्। पूर्वाह्णकः। अपराह्णकः। 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (४.३.२४) इत्यस्यापवादः। आर्द्रकः। मूलकः। नक्षत्राणोऽपवादः। प्रदोषकः। 'निशाप्रदोषाभ्यां च' (४.३.१४) इत्यस्यापवादः। अवस्करकः। औत्सर्गिकस्याणोऽपवादः। असंज्ञायां तु यथाप्राप्तं ठञादय एव भवन्ति॥

पथः पन्थ च ॥ २९ ॥

पथिशब्दाद् वुन् प्रत्ययो भवति तत्र जात इत्येतस्मिन् विषये, अणोऽपवादः, प्रत्ययसन्नियोगेन च पथः पन्थ इत्ययमादेशो भवति। पथि जातः पन्थकः॥

अमावास्याया वा ॥ ३० ॥

अमावास्याशब्दाद् वुन् प्रत्ययो भवति वा तत्र जात इत्येतस्मिन् विषये। संधिवेलादिषु (४.३.१६) पाठादणोऽपवादः। अमावास्यकः, आमावास्यः। एकदेशविकृतस्यानन्यत्वाद् (परि० ३७) अमावस्याशब्दाद् अपि भवति। अमावस्यकः। आमावस्यः॥

अ च ॥ ३१ ॥

अमावास्याशब्दादकारः प्रत्ययो भवति तत्र जात इत्येतस्मिन् विषये। पूर्वेण वुन्नणोः प्राप्तयोरयं तृतीयः प्रत्ययो विधीयते। अमावास्यः, अमावास्यकः, आमावास्यः। अमावस्यः, अमावस्यकः, आमावस्यः॥

सिन्ध्वपकराभ्यां कन् ॥ ३२ ॥

सिन्धुशब्दादपकरशब्दात् च कन् प्रत्ययो भवति तत्र जात इत्येतस्मिन् विषये। सिन्धुशब्दः कच्छादिः, ततोऽण्णि मनुष्यवुञि (४.२.१३३, १३४) च प्राप्ते विधानम्, अपकरशब्दादप्यौत्सर्गिकेऽणि। सिन्धुकः। अपकरकः॥

---

१ - ' अमावस्यशब्दात् ' इति मुद्रितपाठः।

अणञौ च ॥ ३३ ॥

सिन्ध्वपकरशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतस्तत्र जात इत्येतस्मिन् विषये। पूर्वेण कनि प्राप्ते वचनम्। सैन्धवः। आपकरः॥

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ ३४ ॥

श्रविष्ठादिभ्यः शब्देभ्यो नक्षत्रेभ्य आगतस्य जातार्थे लुग् भवति। तस्मिन् स्त्रीप्रत्ययस्यापि 'लुक् तद्धितलुकि' (१.२.४६) इति लुग् भवति। श्रविष्ठासु जातः श्रविष्ठः। फल्गुनः। अनुराधः। स्वातिः। तिष्यः। पुनर्वसुः। हस्तः। विशाखः। अषाढः। बहुलः ॥ लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्॥ चित्रायां जाता, चित्रा। रेवती। रोहिणी। स्त्रीप्रत्ययस्य लुकि कृते गौरादित्वाद् (४.१.४१) ङीष् ॥ फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ॥ फल्गुनी। अषाढा ॥ श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः॥ श्राविष्ठीयः। आषाढीयः॥

स्थानान्तगोशालखरशालाच्च ॥ ३५ ॥

स्थानान्तात् प्रातिपदिकाद् गोशालशब्दात् खरशालशब्दात् च जातार्थे प्रत्ययस्य लुग् भवति। गोस्थाने जातो गोस्थानः। अश्वस्थानः। गोशालः। खरशालः॥

वत्सशालाभिजिदश्वयुक्छतभिषजो वा॥ ३६ ॥

वत्सशालादिभ्यः परस्य जातार्थे प्रत्ययस्य लुग् वा भवति। वत्सशालायां जातो वत्सशालः, वात्सशालः। अभिजित् , आभिजितः। अश्वयुक् , आश्वयुजः। शतभिषक्, शातभिषजः। बहुलग्रहणस्यायं प्रपञ्चः॥

नक्षत्रेभ्यो बहुलम्॥ ३७ ॥

नक्षत्रेभ्य उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग् भवति। रोहिणः, रौहिणः। मृगशिराः, मार्गशीर्षः॥

कृतलब्धक्रीतकुशलाः ॥ ३८ ॥

तत्रेत्येव। सप्तमीसमर्थात् कृतादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलो वा स्रौघ्नः। माथुरः। राष्ट्रियः। ननु च यद् यत्र

कृतं जातमपि तत् तत्र भवति, यच्च यत्र क्रीतं लब्धमपि तत् तत्रैव भवति, किमर्थं भेदेनो- पादानं क्रियते ? शब्दार्थस्य भिन्नत्वाद् वस्तुमात्रेण क्रीतं लब्धं भवति, शब्दार्थस्तु भिद्यत एव॥

प्रायभवः ॥ ३९ ॥

तत्रेत्येव। सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकात् प्रायभव इत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। प्रायशब्दः साकल्यस्य किंचिन्न्यूनतामाह। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। माथुरः। राष्ट्रियः। प्रायभवग्रहणमनर्थकम्, तत्रभवेन कृतार्थत्वात्। अनित्यभवः प्रायभव इति चेद्, मुक्तसंशयेन तुल्यम्॥

उपजानूपकर्णोपनीवेष्ठक् ॥ ४० ॥

उपजान्वादिभ्यः शब्देभ्यः सप्तमीसमर्थेभ्यः प्रायभव इत्येतस्मिन् विषये ठक् प्रत्ययो भवति। अणोऽपवादः। औपजानुकः। औपकर्णिकः। औपनीविकः॥

संभूते ॥ ४१ ॥

तत्रेत्येव। सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकात् संभूत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। अवक्लृप्तिः प्रमाणानतिरेकश्च संभवत्यर्थ इह गृह्यते, नोत्पत्तिः सत्ता वा, जातभवाभ्यां गतत्वात्। स्रुघ्ने संभवति स्रौघ्नः। माथुरः। राष्ट्रियः॥

कोशाड् ढञ् ॥ ४२ ॥

कोशशब्दाद् ढञ् प्रत्ययो भवति तत्र संभूत इत्यस्मिन् विषये। अणोऽपवादः। कोशे संभूतं कौशेयं वस्त्रम्। रूढिरेषा, तेन क्रिमौ न भवति, खड्गकोशात् च॥

कालात् साधुपुष्प्यत्पच्यमानेषु ॥ ४३ ॥

तत्रेत्येव। कालविशेषवाचिभ्यः सप्तमीसमर्थेभ्यः साध्वादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। हेमन्ते साधुर्हैमनः प्राकारः। शैशिरमनुलेपनम्। वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः। ग्रैष्म्यः पाटलाः। शरदि पच्यन्ते शारदाः शालयः। ग्रैष्मा यवाः॥

उप्ते च ॥ ४४ ॥

तत्रेत्येव, कालादिति च। सप्तमीसमर्थात् कालवाचिनः प्रातिपदिकादुप्तेऽर्थे यथा-

---

१ - ' शब्दार्थस्याभिन्नत्वात् ' इति है०।

विहितं प्रत्ययो भवति। हेमन्त उप्यन्ते हैमन्ता यवाः। ग्रैष्मा व्रीहयः। योगविभाग उत्तरार्थः॥

आश्वयुज्या वुञ् ॥ ४५ ॥

आश्वयुजीशब्दाद् वुञ् प्रत्ययो भवत्युप्तेऽर्थे। ठञोऽपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः। अश्विनीभ्यां युक्ता पौर्णमासी, आश्वयुजी। अश्विनीपर्यायोऽश्वयुक्शब्दः॥

ग्रीष्मवसन्तादन्यतरस्याम् ॥ ४६ ॥

ग्रीष्मवसन्तशब्दाभ्यामन्यतरस्यां वुञ् प्रत्ययो भवत्युप्तेऽर्थे। ऋत्वणोऽपवादः। ग्रैष्मकम्, ग्रैष्मं सस्यम्। वासन्तकम्, वासन्तम्॥

देयमृणे ॥ ४७॥

तत्रेत्येव, कालादिति च। सप्तमीसमर्थात् कालवाचिनः प्रातिपदिकाद् देयमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यद् देयमृणं चेत् तद् भवति। मासे देयमृणं मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। ऋण इति किम् ? मासे देया भिक्षा॥

कलाप्यश्वत्थयवबुसाद् वुन् ॥ ४८ ॥

कालादित्येव। कलापिन् अश्वत्थ यवबुस इत्येतेभ्यः कालवाचिभ्यः सप्तमीसमर्थेभ्यो देयमृणमित्येतस्मिन्नर्थे वुन् प्रत्ययो भवति। कलाप्यादयः शब्दाः साहचर्यात् काले वर्तन्ते। यस्मिन् काले मयूराः कलापिनो भवन्ति, स कलापी। यस्मिन्नश्वत्थाः फलन्ति सोऽश्वत्थः। यस्मिन् यवबुसं संपद्यते स यवबुसशब्देनोच्यते। कलापिनि काले देयमृणम्, कलापकम्। अश्वत्थकम्। यवबुसकम्॥

ग्रीष्मावरसमाद् वुञ् ॥ ४९ ॥

ग्रीष्मावरसमशब्दाभ्यां वुञ् प्रत्ययो भवति देयमृणम् इत्येतस्मिन्नर्थे। अण्ठञोरपवादः। ग्रीष्मे देयमृणं ग्रैष्मकम्। आवरसमकम्। प्रत्ययान्तरकरणं वृद्ध्यर्थम्। समाशब्दो वर्षपर्यायः॥

संवत्सराग्रहायणीभ्यां ठञ् च ॥ ५० ॥

---

१ - ' ग्रीष्मम् ' इति है० , बाल० पाठः।

संवत्सराग्रहायणीशब्दाभ्यां ठञ् प्रत्ययो भवति, चकारादु वुञ् च देयमृणमित्येतस्मिन्नर्थे। संवत्सरे देयमृणं सांवत्सरिकम्, सांवत्सरकम्। आग्रहायणिकम्, आग्रहायणकम्। वेति वक्तव्ये ठञ्ग्रहणं संधिवेलादिषु (४.३.१६) 'संवत्सरात् फलपर्वणोः' (ग० सू० १०२) इति पठ्यते, तत्र फल ऋणत्वेन विवक्षितेऽणं बाधित्वा ठञेव यथा स्यादिति॥

व्याहरति मृगः ॥ ५१ ॥

तत्रेत्येव, कालादिति च। कालवाचिनः सप्तमीसमर्थात् प्रातिपदिकाद् व्याहरति मृग इत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। निशायां व्याहरति मृगो नैशः, नैशिकः। प्रादोषः, प्रादोषिकः। मृग इति किम् ? निशायां व्याहरत्युलूकः॥

तदस्य सोढम् ॥ ५२ ॥

कालादित्येव। तदिति प्रथमासमर्थात् कालवाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं सोढं चेत् तद् भवति। सोढं जितमभ्यस्तमित्यर्थः। निशासहचरितमध्ययनं निशा, तत् सोढमस्य छात्रस्य नैशः, नैशिकः। प्रादोषः, प्रादोषिकः॥

तत्र भवः ॥ ५३ ॥

कालादिति निवृत्तम्। तत्रेति सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकाद् भव इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सत्ता भवत्यर्थो गृह्यते न जन्म, 'तत्र जातः' (४.३.२५) इति गतार्थत्वात्। स्रुघ्ने भवः स्रौघ्नः। माथुरः। राष्ट्रियः। पुनस्तत्रग्रहणं तदस्येति निवृत्त्यर्थम्॥

दिगादिभ्यो यत् ॥ ५४ ॥

दिश् इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणश्छस्य चापवादः। दिशि भवं दिश्यम्। वर्ग्यम्। मुखजघनशब्दयोरशरीरावयवार्थः पाठः, सेनामुख्यम् , सेनाजघन्यमिति॥ दिश्। वर्ग। पूग। गण। पक्ष। धाय्या। मित्र। मेधा। अन्तर। पथिन्। रहस्। अलीक। उखा। साक्षिन्। आदि। अन्त। मुख। जघन। मेघ। यूथ। उदकात् संज्ञायाम् (ग० सू० १०३)। न्याय। वंश। अनुवंश। विश। काल। अप्। आकाश। दिगादिः॥

शरीरावयवाच्च ॥ ५५ ॥

शरीरं प्राणिकायः। शरीरावयववाचिनः प्रातिपदिकाद् यत् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। दन्तेषु भवं दन्त्यम्। कर्ण्यम्। ओष्ठ्यम्॥

दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ॥ ५६ ॥

दृत्यादिभ्यः प्रातिपदिकेभ्यो ढञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। दृतौ भवं दार्तेयम्। कौक्षेयम्। कालशेयम्। वास्तेयम्। आस्तेयम्। आहेयमजरं विषम्। अस्तिशब्दः प्रातिपदिकम्, न तिङन्तः॥

ग्रीवाभ्योऽण् च ॥ ५७ ॥

ग्रीवाशब्दादण् प्रत्ययो भवति, चकाराड् ढञ् च, तत्र भव इत्येतस्मिन् विषये। शरीरावयवाद् यतोऽपवादः। ग्रीवासु भवं ग्रैवम् , ग्रैवेयम्। ग्रीवाशब्दो धमनीवचनः, तासां बहुत्वाद् बहुवचनं कृतम्॥

गम्भीराञ् ञ्यः ॥ ५८ ॥

गम्भीरशब्दाद् ञ्यः प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। गम्भीरे भवं गाम्भीर्यम् ॥ बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्॥ बाह्यम्। दैव्यम्। पाञ्चजन्यम्॥

अव्ययीभावाच्च ॥ ५९ ॥

अव्ययीभावसंज्ञकात् प्रातिपदिकात् च ञ्यः प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। न च सर्वस्मादव्ययीभावाद् भवति। किं तर्हि ? परिमुखादेः। परिमुखादीनां च गणपाठस्यैतदेव प्रयोजनम्। तेषां विशेषणमव्ययीभावग्रहणम्। परिमुखं भवं पारिमुख्यम्। पारिहनव्यम्। परिमुखादेरन्यत्र न भवति। औपकूलम्॥ परिमुख। परिहनु। पर्योष्ठ। पर्युलूखल। परिसीर। अनुसीर। उपसीर। उपस्थल। उपकलाप। अनुपथ। अनुखड्ग। अनुतिल। अनुशीत। अनुमाष। अनुयव। अनुयूप। अनुवंश॥

अन्तःपूर्वपदाट् ठञ् ॥ ६० ॥

अव्ययीभावादित्येव। अन्तःशब्दो विभक्त्यर्थे समस्यते। तत्पूर्वपदादव्ययीभावाट् ठञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। आन्तर्वेश्मिकम्। आन्तर्गेहिकम् ॥ समानशब्दाट् ठञ् वक्तव्यः॥ समाने भवं सामानिकम् ॥ तदादेश्च॥ सामानग्रामिकम्। सामानदेशिकम् ॥ अध्यात्मादिभ्यश्च॥ आध्यात्मिकम्। आधिदैविकम्। आधिभौतिकम्। अध्यात्मादिराकृतिगणः ॥ ऊर्ध्वदमाच्च ठञ् वक्तव्यः॥ और्ध्वदमिकः। ऊर्ध्वशब्देन समानार्थ ऊर्ध्व शब्दः ॥ ऊर्ध्वदेहाच्च॥ और्ध्वदेहिकम् ॥ लोकोत्तरपदाच्च॥

ऐहलौकिकम्। पारलौकिकम्॥ **मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयः प्रत्ययो वक्तव्यः॥** मुखतीयम्। पार्श्वतीयम्॥ **जनपरयोः कुक् च॥** जनकीयम्। परकीयम्॥ **मध्यशब्दादीयः॥** मध्यीयः॥ **मण्मीयौ च प्रत्ययौ वक्तव्यौ॥** माध्यमम्। मध्यमीयम्॥ **मध्यो मध्यं दिनण् चास्मात्॥** मध्ये भवं माध्यन्दिनम्॥ **स्थाम्नो लुग् वक्तव्यः॥** अश्वत्थामा॥ **अजिनान्ताच्च॥** वृकाजिनः। सिंहाजिनः॥

समानस्य तदादेश्चाध्यात्मादिषु चेष्यते।
ऊर्ध्वदमाच्च देहाच्च लोकोत्तरपदस्य च॥
मुखपार्श्वतसोरीयः कुग् जनस्य परस्य च।
ईयः कार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा॥
मध्यो मध्यं दिनण् चास्मात् स्थाम्नो लुगजिनात्तथा॥

ग्रामात् पर्यनुपूर्वात्॥ ६१॥

अव्ययीभावादित्येव। ग्रामशब्दान्तादव्ययीभावात् परि अनु इत्येवंपूर्वाट् ठञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। पारिग्रामिकः। आनुग्रामिकः॥

जिह्वामूलाङ्गुलेश्छः॥ ६२॥

जिह्वामूलशब्दादङ्गुलिशब्दात् च छः प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। यतोऽपवादः। जिह्वामूलीयम्। अङ्गुलीयम्॥

वर्गान्ताच्च॥ ६३॥

वर्गशब्दान्तात् च प्रातिपदिकाच् छः प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अणोऽपवादः। कवर्गीयम्। चवर्गीयम्॥

अशब्दे यत्खावन्यतरस्याम्॥ ६४॥

वर्गान्तादित्येव। शब्दादन्यस्मिन् प्रत्ययार्थे वर्गान्तात् प्रातिपदिकादन्यतरस्यां यत्खौ प्रत्ययौ भवतः तत्र भव इत्येतस्मिन् विषये। छे प्राप्ते वचनं पक्षे सोऽपि भवति। वासुदेववर्ग्यः, वासुदेववर्गीणः, वासुदेववर्गीयः। युधिष्ठिरवर्ग्यः, युधिष्ठिरवर्गीणः, युधिष्ठिरवर्गीयः। अशब्द इति किम्? कवर्गीयो वर्णः॥

कर्णललाटात् कनलंकारे॥ ६५॥

कर्णललाटशब्दाभ्यां कन् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषयेऽलंकारेऽ-

भिधेये। यतोऽपवादः। कर्णिका। ललाटिका। अलंकार इति किम् ? कर्ण्यम्। ललाट्यम्॥

तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ॥ ६६ ॥

व्याख्यायतेऽनेनेति व्याख्यानम्, व्याख्यातव्यस्य नाम व्याख्यातव्यनाम। तस्येति षष्ठीसमर्थाद् व्याख्यातव्यनाम्नः प्रातिपदिकाद् व्याख्यानेऽभिधेये यथाविहितं प्रत्ययो भवति, तत्र भवे च। वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति 'तत्र भवः' (४.३.५३) इति। सुपां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्तः। सुप्सु भवं सौपम्। तैङम्। कार्तम्। व्याख्यातव्यनाम्न इति किम् ? पाटलिपुत्रस्य व्याख्यानी सुकोसला, पाटलिपुत्रं सुकोसलया व्याख्यायते, एवंसंनिवेशं पाटलिपुत्रमिति, न तु पाटलिपुत्रं व्याख्यातव्यनाम। भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः। कृतनिर्देशौ हि तौ॥

बह्वचोऽन्तोदात्ताट् ठञ् ॥ ६७ ॥

बह्वचो व्याख्यातव्यनाम्नः प्रातिपदिकादन्तोदात्ताद् भवव्याख्यानयोष्ठञ् प्रत्ययो भवति। अणोऽपवादः। षात्वणत्विकम्। नातानतिकम्। समासस्वरेणान्तोदात्ताः प्रकृतयः। बह्वच इति किम् ? द्व्यचष्ठकं (४.३.७२) वक्ष्यति। एकाच् प्रत्युदाहियते। सौपम्। तैङम्। कार्तम्। अन्तोदात्तादिति किम् ? संहितायाः सांहितम्। संहिताशब्दो हि गतिस्वरेणाद्युदात्तः॥

क्रतुयज्ञेभ्यश्च ॥ ६८ ॥

क्रतुभ्यो यज्ञेभ्यश्च व्याख्यातव्यनामभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति। अणोऽपवादः। क्रतुभ्यस्तावत्—अग्निष्टोमस्य व्याख्यानस्तत्र भवः, आग्निष्टोमिकः। वाजपेयिकः। राजसूयिकः। यज्ञेभ्यः—पाकयज्ञिकः। नावयज्ञिकः। अनन्तोदात्तार्थ आरम्भः। क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योऽपि यथा स्यात्। पाञ्चौदनिकः। दाशौदनिकः। बहुवचनं स्वरूपविधिनिरासार्थम्॥

अध्यायेष्वेवर्षेः ॥ ६९ ॥

ऋषिशब्दाः प्रवरनामधेयानि, तेभ्य ऋषिशब्देभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति। अणोऽपवादः। अध्यायेष्वेव प्रत्ययार्थविशेषणेषु[1]। व्याख्यातव्यनाम्न इत्यनुवर्तते, तत्साहचर्यादृषिशब्दैर्ग्रन्थ उच्यते। वसिष्ठस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽ-

---

१ - ' प्रत्ययार्थे विशेषणेषु ' इति है०।

ध्यायः। वैश्वामित्रिकः। अध्यायेष्विति किम् ? वासिष्ठी ऋक्॥

पौरोडाशपुरोडाशात् ष्ठन् ॥ ७० ॥

पौरोडाशशब्दात् पुरोडाशशब्दात् च भवव्याख्यानयोरर्थयोः ष्ठन् प्रत्ययो भवति। पुरोडाशाः पिष्टपिण्डाः, तेषां संस्कारको मन्त्रः पौरोडाशः, तस्य व्याख्यानस्तत्र भवो वा पौरोडाशिकः। पौरोडाशिकी। पुरोडाशसहचरितो ग्रन्थः पुरोडाशः, तस्य व्याख्यानस्तत्र भवो वा पुरोडाशिकः। पुरोडाशिकी। षकारो ङीषर्थः॥

छन्दसो यदणौ ॥ ७१ ॥

छन्दःशब्दाद् भवव्याख्यानयोरर्थयोर्यदणौ प्रत्ययौ भवतः। द्व्यच इति ठकि प्राप्ते वचनम्। छ॑न्द॒स्यः॑ (तै० सं० १.६.११.४)। छान्दसः (कौ० गृ० १४१.३४) ॥

द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट् ठक् ॥७२॥

द्व्यजादिभ्यः प्रातिपदिकेभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोरर्थयोष्ठक् प्रत्ययो भवति। अणादेरपवादः। द्व्यचस्तावत्—ऐष्टिकः। पाशुकः। ऋकारान्तात् — चातुर्होतृकः। पाञ्चहोतृकः। ब्राह्मण—ब्राह्मणिकः। ऋक्—आर्चिकः। प्रथम—प्राथमिकः। अध्वर—आध्वरिकः। पुरश्चरण—पौरश्चरणिकः। नामाख्यातग्रहणं संघातविगृहीतार्थम्। नामिकः। आख्यातिकः। नामाख्यातिकः॥

अणृगयनादिभ्यः ॥ ७३ ॥

ऋगयनादिभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोरण् प्रत्ययो भवति। ठञादेरपवादः। आर्गयनः। पादव्याख्यानः। अण्ग्रहणं बाधकबाधनार्थम्। वास्तुविद्यः॥ ऋगयन। पदव्याख्यान। छन्दोमान। छन्दोभाषा। छन्दोविचिति। न्याय। पुनरुक्त। निरुक्त। व्याकरण। निगम। वास्तुविद्या। अङ्गविद्या। क्षत्रविद्या। उत्पात। उत्पाद। संवत्सर। मुहूर्त। निमित्त। उपनिषत्। शिक्षा। ऋगयनादिः॥

तत आगतः ॥ ७४ ॥

तत इति पञ्चमीसमर्थादागत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। स्रुघ्नादागतः स्रौघ्नः। माथुरः। राष्ट्रियः। तत इति मुख्यमपादानं विवक्षितं यत् तदिह गृह्यते, न नान्तरीयकम्। स्रुघ्नादागच्छन् वृक्षमूलादागत इति॥

---

१ - ‘ मन्त्रः ’ इति न्यासपद० ।

ठगायस्थानेभ्यः ॥ ७५ ॥

आय इति स्वामिग्राह्यो भाग उच्यते, स यस्मिन्नुत्पद्यते तदायस्थानम्। आयस्थानवाचिभ्यः प्रातिपदिकेभ्यष्ठक् प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। अणोऽपवादः। छं तु परत्वाद् बाधते। शुल्कशालाया आगतः शौल्कशालिकः। आकरिकम्। बहुवचनं स्वरूपविधिनिरासार्थम्॥

शुण्डिकादिभ्योऽण् ॥ ७६ ॥

शुण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। आयस्थानठकोऽपवादः। शुण्डिकादागतः शौण्डिकः। कार्कणः। अण्ग्रहणं बाधकबाधनार्थम्। औदपानः॥ शुण्डिक। कृकण। स्थण्डिल। उदपान। उपल। तीर्थ। भूमि। तृण। पर्ण। शुण्डिकादिः॥

विद्यायोनिसंबन्धेभ्यो वुञ् ॥ ७७ ॥

विद्यायोनिकृतः संबन्धो येषां ते विद्यायोनिसंबन्धाः। तद्वाचिभ्यः शब्देभ्यो वुञ् प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। अणोऽपवादः। छं तु परत्वाद् बाधते। विद्यासंबन्धेभ्यस्तावत्—उपाध्यायादागतम् औपाध्यायकम्। शैष्यकम्। आचार्यकम्। योनिसंबन्धेभ्यः—मातामहकः। पैतामहकः। मातुलकः॥

ऋतष्ठञ् ॥ ७८ ॥

विद्यायोनिसंबन्धेभ्य इत्येव। ऋकारान्तेभ्यः प्रातिपदिकेभ्यो विद्यायोनिसंबन्धवाचिभ्यष्ठञ् प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। वुञोऽपवादः। विद्यासंबन्धवाचिभ्यस्तावत्—होतुरागतं हौतृकम्। पौतृकम्। योनिसंबन्धवाचिभ्यः—भ्रातृकम्। स्वासृकम्। मातृकम्। तपरकरणं मुखसुखार्थम्। विद्यायोनिभ्यामन्यत्र सावित्रम्॥

पितुर्यच्च ॥ ७९ ॥

पितृशब्दाद् यत् प्रत्ययो भवति, चकाराट् ठञ् च तत आगत इत्येतस्मिन् विषये। पितुरागतं पित्र्यम्। पैतृकम्॥

गोत्रादङ्कवत् ॥ ८० ॥

अपत्याधिकारादन्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते। गोत्रप्रत्ययान्तात् प्रातिपदिकादङ्कवत् प्रत्ययविधिर्भवति तत आगत इत्येतस्मिन् विषये। अङ्कग्रहणेन तस्येदमर्थ-

सामान्यं लक्ष्यते। तस्माद् वुञप्यतिदिश्यते नाणेव 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' (४.३. १२७) इति। औपगवानामङ्कः औपगवकः। कापटवकः। नाडायनकः। चारायणकः। एवमौपगवेभ्य आगतम् , औपगवकम्। कापटवकम्। नाडायनकम्। चारायणकम्॥

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ॥ ८१ ॥

हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां रूप्यः प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। मनुष्यग्रहणमहेत्वर्थम्। हेतुः कारणम्। हेतुभ्यस्तावत्—समादागतं समरूप्यम्, समीयम्। विषमरूप्यम्, विषमीयम्। गहादित्वात् (४.२.१३८) छः। मनुष्येभ्यः—देवदत्तरूप्यम्। यज्ञदत्तरूप्यम्। दैवदत्तम्। याज्ञदत्तम्। बहुवचनं स्वरूपविधिनिरासार्थम्॥

मयट् च ॥ ८२ ॥

हेतुभ्यो मनुष्येभ्यश्च मयट् प्रत्ययो भवति तत आगत इत्येतस्मिन् विषये। सममयम्। विषममयम्। मनुष्येभ्यः—देवदत्तमयम्। यज्ञदत्तमयम्। टकारो ङीबर्थः। सममयी। योगविभागो यथासंख्यनिरासार्थः॥

प्रभवति ॥ ८३ ॥

तत इत्येव। पञ्चमीसमर्थाद् ङ्याप्प्रातिपदिकात् प्रभवतीत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। प्रभवति प्रकाशते, प्रथमत उपलभ्यत इत्यर्थः। हिमवतः प्रभवति हैमवती गङ्गा। दारदी सिन्धुः॥

विदूराञ् ञ्यः ॥ ८४ ॥

विदूरशब्दाद् ञ्यः प्रत्ययो भवति ततः प्रभवतीत्येतस्मिन् विषये। अणोऽपवादः। विदूरात् प्रभवति वैदूर्यो मणिः। ननु च वालवायादसौ प्रभवति, न विदूरात्, तत्र तु संस्क्रियते ? एवं तर्हि —

वालवायो विदूरं च प्रकृत्यन्तरमेव वा।
न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्॥

तद् गच्छति पथिदूतयोः ॥ ८५ ॥

तदिति द्वितीयासमर्थाद् गच्छतीत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति, योऽसौ गच्छति पन्थाश्चेत् स भवति दूतो वा। स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा। माथुरः।

---

१ - ' वुञतिदिश्यते नाण् ' इत्यपपाठो है०।

तत्स्थेषु गच्छत्सु पन्था गच्छतीत्युच्यते। अथ वा स्रुघ्नप्राप्तिः पथो गमनम्। पथिदूतयोरिति किम् ? स्रुघ्नं गच्छति सार्थः॥

अभिनिष्क्रामति द्वारम् ॥ ८६ ॥

तदित्येव। तदिति द्वितीयासमर्थादभिनिष्क्रामतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यदभिनिष्क्रामति द्वारं चेत् तद् भवति। आभिमुख्येन निष्क्रामति, अभिनिष्क्रामति। स्रुघ्नमभिनिष्क्रामति कान्यकुब्जद्वारं स्रौघ्नम्। माथुरम्। राष्ट्रियम्। द्वारमभिनिष्क्रमण-क्रियायां करणं प्रसिद्धम्, तदिह स्वातन्त्र्येण विवक्ष्यते, यथा साध्वसिश्छिनत्तीति। द्वारमिति किम्? स्रुघ्नमभिनिष्क्रामति पुरुषः॥

अधिकृत्य कृते ग्रन्थे ॥ ८७ ॥

तदित्येव। अधिकृत्यैतदपेक्षया द्वितीया। अधिकृत्य, प्रस्तुत्य, आगूर्येत्यर्थः। तदिति द्वितीयासमर्थादधिकृत्य कृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् तत् कृतं ग्रन्थश्चेत् स भवति। सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः। गैरिमित्रः। यायातः। ग्रन्थ इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः ॥ लुबाख्यायिकाभ्यः प्रत्ययस्य बहुलम्॥ वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता। सुमनोत्तरा। उर्वशी। न च भवति—भैमरथी॥

शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ८८ ॥

तदित्येव। अधिकृत्य कृते ग्रन्थ इति च। शिशुक्रन्दादिभ्यो द्वितीयासमर्थेभ्यश्छः प्रत्ययो भवत्यधिकृत्य कृते ग्रन्थे। अणोऽपवादः। शिशूनां क्रन्दनं शिशुक्रन्दः। तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः। यमस्य सभा यमसभम्, यमसभीयः। द्वन्द्वात्—अग्निकाश्यपीयः। श्येनकपोतीयः। शब्दार्थसंबन्धीयं प्रकरणम्। वाक्यपदीयम्। इन्द्रजननादिभ्यः—इन्द्र-जननीयम्। प्रद्युम्नागमनीयम्। इन्द्रजननादिराकृतिगणः प्रयोगतोऽनुसर्तव्यः, प्रातिपदिकेषु न पठ्यते ॥ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः॥ दैवासुरम्। राक्षोऽसुरम्। गौणमुख्यम्। इन्द्रजननादेराकृतिगणत्वात् शिशुक्रन्दादयोऽपि तत्रैव द्रष्टव्याः। प्रपञ्चार्थमेषां ग्रहणम्। एवं सति देवासुरादिप्रतिषेधोऽपि न वक्तव्यः, ततश्छप्रत्ययस्यादर्शनात्॥

सोऽस्य निवासः ॥ ८९ ॥

---

१ - ' तदिति ' इति नास्ति बाल० । २ - ' ० तदपेक्ष्य ' इति मुद्रितेषु ।

३ - ' गौरिमित्रः ' इति बाल०, तारा० । ४ - ' लुबाख्यायिकार्थस्य ' इति मुद्रितेषु ।

स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं निवासश्चेत् स भवति। निवसन्त्यस्मिन्निवासो देश उच्यते। स्रुघ्नो निवासोऽस्य स्रौघ्नः। माथुरः। राष्ट्रियः॥

अभिजनश्च ॥ ६० ॥

सोऽस्येत्येव। स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थमभिजनश्चेत् स भवति। अभिजनः पूर्वबान्धवः। तत्संबन्धाद् देशोऽप्यभिजन इत्युच्यते—यस्मिन् पूर्वबान्धवैरुषितम्। तस्मादिह देशवाचिनः प्रत्ययः, न बन्धुभ्यः, निवासप्रत्यासत्तेः। स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। माथुरः। राष्ट्रियः। निवासाभिजनयोः को विशेषः ? यत्र संप्रत्युष्यते स निवासः, यत्र पूर्वैरुषितं सोऽभिजनः। योगविभाग उत्तरार्थः॥

आयुधजीविभ्यश्छः पर्वते ॥ ६१ ॥

सोऽस्याभिजन इति वर्तते। आयुधजीविभ्य इति तादर्थ्ये चतुर्थी, पर्वत इति प्रकृतिविशेषणम्। पर्वतवाचिनः प्रथमासमर्थादभिजनादस्येति षष्ठ्यर्थे छः प्रत्ययो भवति। आयुधजीविभ्य आयुधजीव्यर्थम्, आयुधजीविनोऽभिधातुं प्रत्ययो भवतीत्यर्थः। हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां हृद्गोलीयाः। अन्धकवर्तीयाः। रोहितगिरीयाः। आयुधजीविभ्य इति किम् ? ऋक्षोदः पर्वतोऽभिजन एषां ब्राह्मणानाम्, आर्क्षोदा ब्राह्मणाः। पर्वत इति किम् ? सांकाश्यका आयुधजीविनः॥

शण्डिकादिभ्यो ञ्यः ॥ ६२ ॥

शण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्यो ञ्यः प्रत्ययो भवति सोऽस्याभिजन इत्येतस्मिन् विषये। अणादेरपवादः। शाण्डिक्यः। सार्वसेन्यः॥ शण्डिक। सर्वसेन। सर्वकेश। शक। सट। रक। शङ्ख। बोध। शण्डिकादिः॥

सिन्धुतक्षशिलादिभ्योऽणञौ ॥ ६३ ॥

आदिशब्दः प्रत्येकमभिसंबध्यते। सिन्ध्वादिभ्यः प्रातिपदिकेभ्यस्तक्षशिलादिभ्यश्च यथासंख्यमणञौ प्रत्ययौ भवतः सोऽस्याभिजन इत्येतस्मिन् विषये। सैन्धवः। वार्णवः॥ सिन्धु। वर्णु। गन्धार। मधुमत्। कम्बोज। कश्मीर। साल्व। किष्किन्धा। गब्दिका। उरस। दरत्। ये तु कच्छादिषु (४.२.१३३) पठ्यन्ते सिन्धुवर्णुप्रभृतयः, तेभ्यस्तत

---

१ - ' च ' इत्यधिकं बाल०। २ - ' गदिका ' इति है०।

एवाणि सिद्धे मनुष्यवुञो (४.२.१३४) बाधनार्थं वचनम्। तक्षशिलादिभ्यः खल्वपि—ताक्षशिलः। वात्सोद्धरणः॥ तक्षशिला। वत्सोद्धरण। कौमेदुर। काण्डवारण। ग्रामणी। सरालक। कंस। किन्नर। संकुचित। सिंहकोष्ठ। कर्णकोष्ठ। बर्बर। अवसान॥

तूदीशलातुरवर्मतीकूचवाराड् ढक्छण्ढञ्यकः ॥ ९४ ॥

तूद्यादिभ्यश्चतुर्भ्यः शब्देभ्यो यथासंख्यं चत्वार एव ढक् छण् ढञ् यक् इत्येते प्रत्यया भवन्ति सोऽस्याभिजन इत्येतस्मिन् विषये। अणोऽपवादः। तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः॥

भक्तिः ॥ ९५ ॥

समर्थविभक्तिः प्रत्ययार्थश्चानुवर्तते। अभिजन इति निवृत्तम्। स इति प्रथमा-समर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं भक्तिश्चेत् तद् भवति। भज्यते सेव्यत इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः। माथुरः। राष्ट्रियः॥

अचित्तादेशकालाट् ठक् ॥ ९६ ॥

देशकालव्यतिरिक्तादचित्तवाचिनः प्रातिपदिकाट् ठक् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन् विषये। अणोऽपवादः। वृद्धाच् छं परत्वाद् बाधते। अपूपो भक्तिरस्य आपूपिकः। शाष्कुलिकः। पायसिकः। अचित्तादिति किम् ? दैवदत्तः। अदेशादिति किम्? स्रौघ्नः। अकालादिति किम् ? ग्रैष्मः॥

महाराजाट् ठञ् ॥ ९७ ॥

महाराजशब्दाट् ठञ् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन् विषये। अणोऽपवादः। महाराजो भक्तिरस्य माहाराजिकः। प्रत्ययान्तरकरणं स्वरार्थम्॥

वासुदेवार्जुनाभ्यां वुन् ॥ ९८ ॥

वासुदेवार्जुनशब्दाभ्यां वुन् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन् विषये। छाणोरप-वादः। वासुदेवो भक्तिरस्य वासुदेवकः। अर्जुनकः। ननु च वासुदेवशब्दाद् 'गोत्रक्षत्रियाख्येभ्यः०' (४.३.९९) इति वुञस्त्येव। न चात्र वुन्वुञोर्विशेषो विद्यते, किमर्थं वासुदेवग्रहणम्? संज्ञैषा देवताविशेषस्य न क्षत्रियाख्या। 'अल्पाच्तरम्' (२.२.३४) 'अजाद्यदन्तम्' (२.२.३३) इति वा अर्जुनशब्दस्य पूर्वनिपातमकुर्वन् ज्ञापयति—अभ्यर्हितं पूर्वं निपततीति॥

---

१ - ' अपूपा ' इति बाल०। २ - ' च ' इति है०।

गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ ९९ ॥

गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहुलं वुञ् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन् विषये। अणोऽपवादः। वृद्धाच्छं परत्वाद् बाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। औपगवकः। कापटवकः। क्षत्रियाख्येभ्यः—नाकुलकः। साहदेवकः। साम्बकः। आख्याग्रहणं प्रसिद्धक्षत्रियशब्दपरिग्रहार्थम्, यथाकथंचित् क्षत्रियवृत्तिभ्यो मा भूत्। बहुलग्रहणात् क्वचिदप्रवृत्तिरेव। पाणिनो भक्तिरस्य पाणिनीयः। पौरवीयः॥

जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने॥ १००॥

जनपदिनो ये बहुवचने जनपदेन समानशब्दाः, तेषां जनपदवत् सर्वं भवति, प्रत्ययः प्रकृतिश्च, सोऽस्य भक्तिरित्येतस्मिन् विषये। 'जनपदतदवध्योश्च' (४.२.१२४) इत्यत्र प्रकरणे ये प्रत्यया विहिताः, ते जनपदिभ्योऽस्मिन्नर्थेऽतिदिश्यन्ते। जनपदिनो जनपदस्वामिनः क्षत्रियाः। अङ्गा जनपदो भक्तिरस्य आङ्गकः। वाङ्गकः। सौह्मकः। पौण्ड्रकः। तद्वदङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः। वाङ्गकः। सौह्मकः। पौण्ड्रकः। जनपदि- नामिति किम् ? पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः। सर्वग्रहणं प्रकृत्यतिदेशार्थम्, स च द्व्येकयोः प्रयोजयति। वृद्धिनिमित्तेषु च वुञादिषु विशेषो नास्तीति। मद्रवृज्योः कनि (४.२.१३१) विशेषः। मद्रस्यापत्यम्, 'द्व्यञ्मगधकलिङ्गसूरमसादण्' (४.१.१७०), माद्रः। वृजिशब्दादपि 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' (४.१.१७१), वार्ज्यः। स भक्तिरस्येति प्रकृतिनिर्हासे कृते मद्रकः। वृजिकः। जनपदेन समानशब्दानामिति किम् ? अनुषण्डो जनपदः, पौरवो राजा, स भक्तिरस्य पौरवीयः। बहुवचनग्रहणं समानशब्दताविषयलक्षणार्थम्। अन्यथा हि यत्रैव समानशब्दता तत्रैवातिदेशः स्याद्, एकवचनद्विवचनयोर्न स्यात्, वाङ्गो वाङ्गौ वा भक्तिरस्येति। बहुवचने तु बहुवचने समानशब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदेऽतिदेशो भवति। वाङ्गो वाङ्गौ वा भक्तिरस्य वाङ्गकः॥

तेन प्रोक्तम् ॥ १०१ ॥

तेनेति तृतीयासमर्थात् प्रोक्तमित्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। प्रकर्षेणोक्तं प्रोक्तमित्युच्यते, न तु कृतम्, 'कृते ग्रन्थे' (४.३.११६) इत्यनेन गतार्थत्वात्। अन्येन कृता, माथुरेण प्रोक्ता माथुरी वृत्तिः। पाणिनीयम्। आपिशलम्। काशकृत्स्नम्॥

तित्तिरिवरतन्तुखण्डिकोखाच् छण् ॥ १०२ ॥

तित्तिर्यादिभ्यः शब्देभ्यश्छण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये।

---

१ - ' गतत्वात् ' इति बाल०।

अणोऽपवादः। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः। वारतन्तवीयाः। खाण्डिकीयाः। औखीयाः। छन्दसि चायमिष्यते, तित्तिरिणा प्रोक्तः श्लोक इत्यत्र न भवति, 'शौनकादिभ्यश्छन्दसि' (४.३.१०६) इत्यत्रास्यानुवृत्तेः। छन्दोऽधिकारविहितानां च तद्विषयतेष्यते॥

काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ॥ १०३ ॥

काश्यपकौशिकशब्दाभ्यामृषिवाचिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये। छस्यापवादः। णकार उत्तरत्र वृद्ध्यर्थः। कल्पस्ताभ्यां प्रोक्त इति स्मर्यते। तस्यापि च तद्विषयता भवत्येव, 'शौनकादिभ्यश्छन्दसि' (४.३.१०६) इत्यत्रानुवृत्तेः, छन्दोऽधिकारविहितानां च तत्र तद्विषयतेष्यते। काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः। कौशिकिनः। ऋषिभ्यामिति किम् ? इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयम्॥

कलापिवैशम्पायनान्तेवासिभ्यश्च ॥ १०४ ॥

कलाप्यन्तेवासिनां वैशंपायनान्तेवासिनां च ये वाचकाः शब्दास्तेभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये। अणोऽपवादः। छं तु परत्वाद् बाधते। तत्र कलाप्यन्तेवासिनश्चत्वारः—हरिद्रुः, छगली, तुम्बुरुः, उलप इति। वैशम्पायनान्तेवासिनो नव—आलम्बिः, पलङ्गः, कमलः, ऋचाभः, आरुणिः, ताण्ड्यः, श्यामायनः, कठः, कलापी इति। प्रत्यक्षकारिणो गृह्यन्ते, न तु व्यवहिताः शिष्यशिष्याः। कुतः ? कलापिखाडायनग्रहणात्। तथाहि, वैशंपायनान्तेवासी कलापी, तदन्तेवासिनो वैशंपायनान्तेवासिन एव भवन्ति, किं कलापिग्रहणेन ? तथा वैशंपायनान्तेवासी कठः, तदन्तेवासी खाडायनः, तस्य किं शौनकादिषु पाठेन ? तदेतत् प्रत्यक्षकारिग्रहणस्य लिङ्गम्। कलाप्यन्तेवासिभ्यस्तावत्—हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। तौम्बुरविणः। औलपिनः। छगलिनो ढिनुकं (४.३.१०९) वक्ष्यति। वैशम्पायनान्तेवासिभ्यः—आलम्बिनः। पालङ्गिनः। कामलिनः। आर्चाभिनः। आरुणिनः। ताण्डिनः। श्यामायनिनः। कठाल् लुकं वक्ष्यति (४.३.१०७), कलापिनश्चाणम् (४.३.१०८) ।

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू।
उलपेन चतुर्थेन कालापकमिहोच्यते॥
आलम्बिश्चरकः प्राचां पलङ्गकमलावुभौ।
ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे॥
श्यामायन उदीच्येषु उक्तः कठकलापिनोः।

---

१ - ' शब्द ' 'वाचि ' इति न स्तो है०। २ - ' कौशिकिनः ' इति नास्ति बाल०।
३ - ' ० खाण्डायन० ' इति न्यासपद० ।

चरक इति वैशंपायनस्याख्या, तत्संबन्धेन सर्वे तदन्तेवासिनश्चरका इत्युच्यन्ते॥

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ॥ १०५ ॥

प्रत्ययार्थविशेषणमेतत्। तृतीयासमर्थात् प्रोक्ते णिनिः प्रत्ययो भवति यत् प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। ब्राह्मणेषु तावत्—भाल्लविनः। शाट्यायनिनः। ऐतरेयिणः। कल्पेषु—पैङ्गी कल्पः। आरुणपराजी। पुराणप्रोक्तेष्विति किम् ? याज्ञवल्कानि ब्राह्मणानि। आश्मरथः कल्पः। याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानेषु वार्ता। तया व्यवहरति सूत्रकारः। तद्विषयता कस्माद् न भवति? प्रतिपदं ब्राह्मणेषु यः प्रत्ययः, तस्य तद्विषयता विधीयते णिनेः। अयं तु याज्ञवल्क्य- शब्दस्य कण्वादिषु (४.२.१११) पाठादण्। न चायं योगश्छन्दोऽधिकारमनुवर्तयति, तेन कल्पेष्वपि न भवति। पुराण इति निपातनात् तुडभावः। न चात्यन्तबाधैव, तेन पुरातनमित्यपि भवति॥

शौनकादिभ्यश्छन्दसि ॥ १०६ ॥

शौनक इत्येवमादिभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये छन्दस्यभिधेये। छाणोरपवादः। शौनकेन प्रोक्तमधीयते शौनकिनः (कौ० सू० ८५.८)। वाजसनेयिनः (आप० श्रौ० १.८.१२) । छन्दसीति किम् ? शौनकीया शिक्षा। कठशाठ इत्यत्र पठ्यते। तत् संघातार्थम्, केवलाद्धि लुकं वक्ष्यति (४.३.१०७)। कठशाठाभ्यां प्रोक्तमधीयते काठशाठिनः॥ शौनक। वाजसनेय। साङ्गरव। शार्ङ्गरव। सांपेय। शाखेय। खाडायन। स्कन्ध। स्कन्द। देवदत्तशठ। रज्जुकण्ठ। रज्जुभार। कठशाठ। कशाय। तलवकार। पुरुषांसक। अश्वपेय। शौनकादिः॥

कठचरकाल् लुक् ॥ १०७ ॥

कठचरकशब्दाभ्यां परस्य प्रोक्तप्रत्ययस्य लुग् भवति। कठशब्दाद् वैशंपायनान्तेवासिभ्यः (४.३.१०४) इति णिनेः, चरकशब्दादप्यणः। कठेन प्रोक्तमधीयते कठाः। चरकाः। छन्दसीत्येव—काठाः। चारकाः॥

कलापिनोऽण् ॥ १०८ ॥

कलापिशब्दादण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये। वैशंपायनान्तेवासित्वाद् णिनेरपवादः। कलापिना प्रोक्तमधीयते कालापाः। 'इनण्यनपत्ये' (६.४.१६४) इति प्रकृतिभावे प्राप्ते, 'नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतलिजाजलिजाङ्गलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम्' (वा० ६.४.

१४४) इति टिलोपः। अथाण्ग्रहणं किम्, यथाप्राप्तमित्येव सिद्धम् ? अधिकविधानार्थम्, तेन माथुरी वृत्तिः, सौलभानि ब्राह्मणानीत्येवमादि सिद्धम्॥

छगलिनो ढिनुक् ॥ १०९ ॥

छगलिन्शब्दाद् ढिनुक् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये। कलाप्यन्ते-वासित्वाद् णिनेरपवादः। छगलिना प्रोक्तमधीयते छागलेयिनः॥

पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ॥ ११० ॥

णिनिरिहानुवर्तते, न ढिनुक्। पाराशर्यशिलालिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये। भिक्षुनटसूत्रयोरिति यथासंख्यं प्रत्ययार्थविशेषणम्। सूत्रशब्दः प्रत्येकमभिसंबध्यते। तद्विषयता चात्रेष्यते, तदर्थं छन्दोग्रहणमनुवर्त्यम्, गुणकल्पनया च भिक्षुनटसूत्रयोश्छन्दस्त्वम्। पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः। भिक्षुनटसूत्रयोरिति किम् ? पाराशरम्। शैलालम्॥

कर्मन्दकृशाश्वादिनिः ॥ १११ ॥

भिक्षुनटसूत्रयोरित्येव। कर्मन्दकृशाश्वशब्दाभ्यामिनिः प्रत्ययो भवति तेन प्रोक्त-मित्येतस्मिन् विषये यथासंख्यं भिक्षुनटसूत्रयोरभिधेययोः। अणोऽपवादः। अत्रापि तद्विषयतार्थं छन्दोग्रहणमनुवर्त्यम्। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः। भिक्षुनटसूत्रयोरित्येव—कार्मन्दम्। कार्शाश्वम्॥

तेनैकदिक् ॥ ११२ ॥

तेनेति तृतीयासमर्थादेकदिगित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। एकदिक् तुल्यदिक्, समानदिगित्यर्थः। सुदाम्ना एकदिक् सौदामनी विद्युत्। हैमवती। त्रैककुदी। पैलुमूली। तेनेति प्रकृते पुनः समर्थविभक्तिग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम्। पूर्वत्र हि छन्दोऽधिकारात् तद्विषयता साध्यते॥

तसिश्च ॥ ११३ ॥

तसिश्च प्रत्ययो भवति तेनैकदिगित्येतस्मिन् विषये। पूर्वेण घादिष्वणादिषु च प्राप्तेष्वयमपरः प्रत्ययो विधीयते। स्वरादिपाठादव्ययत्वम्। सुदामतः। हिमवत्तः। पिलुमूलतः॥

उरसो यच्च ॥ ११४ ॥

उरःशब्दाद् यत् प्रत्ययो भवति, चकारात् तसिश्च, तेनैकदिगित्येतस्मिन् विषये। अणोऽपवादः। उरसैकदिग् उरस्यः। उरस्तः॥

उपज्ञाते ॥ ११५ ॥

तेनेत्येव। तृतीयासमर्थादुपज्ञात इत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। विनोपदेशेन ज्ञातमुपज्ञातम्, स्वयमभिसंबुद्धमित्यर्थः। पाणिनिनोपज्ञातं पाणिनीयम-कालकं व्याकरणम्। काशकृत्स्नं गुरुलाघवम्। आपिशलं दुष्करणम्॥

कृते ग्रन्थे ॥ ११६ ॥

तेनेत्येव। तृतीयासमर्थात् कृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् तत् कृतं ग्रन्थश्चेत् स भवति। वररुचिना कृता वाररुचाः श्लोकाः। हैकुपादो ग्रन्थः। भैकुराटो ग्रन्थः। जालूकः। ग्रन्थ इति किम् ? तक्षकृतः प्रासादः। उत्पादितं कृतम्, विद्यमानमेव ज्ञातमुपज्ञातमित्ययमनयोर्विशेषः॥

संज्ञायाम् ॥ ११७ ॥

तृतीयासमर्थात् कृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समुदायेन चेत् संज्ञा ज्ञायते। मक्षिकाभिः कृतं माक्षिकम्। कार्मुकम्। सारघम्। पौत्तिकम्। मधुनः संज्ञा एताः॥

कुलालादिभ्यो वुञ् ॥ ११८ ॥

तेन, कृते, संज्ञायामिति चैतत् सर्वमनुवर्तते। कुलालादिभ्यो वुञ् प्रत्ययो भवति तेन कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायाम्। कौलालकम्। वारुडकम्॥ कुलाल। वरुड। चण्डाल। निषाद। कर्मार। सेना। सिरिध्र। सेन्द्रिय। देवराज। परिषत्। वधू। रुरु। ध्रुव। रुद्र। अनडुह्। ब्रह्मन्। कुम्भकार। श्वपाक। कुलालादिः॥

क्षुद्राभ्रमरवटरपादपादञ् ॥ ११९ ॥

तेन, कृते, संज्ञायामिति सर्वमनुवर्तते। क्षुद्रादिभ्योऽञ् प्रत्ययो भवति तेन कृत इत्येतस्मिन् विषये संज्ञायां गम्यमानायाम्। अणोऽपवादः। स्वरे विशेषः। क्षुद्रादिभिः कृतं क्षौद्रम्। भ्रामरम्। वाटरम्। पादपम्॥

---

१ - ' ०संबद्ध० ' इति मुद्रितेषु । २ - ' पुष्करणम् ' इति बाल० ।

तस्येदम् ॥ १२० ॥

तस्येति षष्ठीसमर्थादिदमित्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। अणादयः पञ्च महोत्सर्गाः, घादयश्च प्रत्यया यथाविहितं विधीयन्ते। प्रकृतिप्रत्ययार्थयोः षष्ठ्यर्थमात्रं तत्संबन्धिमात्रं च विवक्षितम्, यदपरं लिङ्गसंख्याप्रत्यक्षपरोक्षादिकं तत् सर्वमविवक्षितम्। उपगोरिदमौपगवम्। कापटवम्। राष्ट्रियम्। अवारपारीणम्। अनन्तरादिष्वनभिधानाद् न भवति, देवदत्तस्यानन्तरमिति ॥ संवहेस्तुरणिट् च॥ संवोढुः स्वं सांवहित्रम्। सिद्ध एवात्राण्, इडर्थमुपसंख्यानम् ॥ अग्नीधः[1] शरणे रञ् भं च॥ आग्नीध्रम् ॥ समिधामाधाने षेण्यण्[2]॥ सामिधेन्यो मन्त्रः। सामिधेनी ऋक्॥

रथाद् यत् ॥ १२१ ॥

रथशब्दाद् यत् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। अणोऽपवादः। रथस्येदं रथ्यम्, चक्रं वा युगं वा। रथाङ्ग एवेष्यते नान्यत्र, अनभिधानात्। 'रथसीताहलेभ्यो यद्विधौ' (१.१.७२ महाभाष्यवा०) इति तदन्तविधिरुपसंख्यायते। परमरथ्यम्। उत्तमरथ्यम्॥

पत्रपूर्वादञ् ॥ १२२ ॥

पतन्ति तेनेति पत्रमश्वादिकं वाहनमुच्यते। तत्पूर्वाद् रथशब्दादञ् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। पूर्वस्य यतोऽपवादः। आश्वरथं चक्रम्। औष्ट्ररथम्। गार्दभरथम्॥

पत्राध्वर्युपरिषदश्च ॥ १२३ ॥

पत्रं वाहनम्, तद्वाचिनः प्रातिपदिकादध्वर्युपरिषच्छब्दाभ्यां चाञ् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। अणोऽपवादः ॥ पत्राद् वाह्ये॥ अश्वस्येदं वहनीयमाश्वम्। औष्ट्रम्। गार्दभम्। आध्वर्यवम्। पारिषदम्॥

हलसीराट् ठक् ॥ १२४ ॥

हलसीरशब्दाभ्यां ठक् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। अणोऽपवादः। हलस्येदं हालिकम्। सैरिकम्॥

द्वन्द्वाद् वुन् वैरमैथुनिकयोः ॥ १२५ ॥

---

१ - ' आग्नीधः ' इति है०। २ - ' रण् ' इति मुद्रितेषु ।

द्वन्द्वसंज्ञकाद् वुन् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये, वैरमैथुनिकयोः प्रत्ययार्थ- विशेषणयोः। अणोऽपवादः। छं तु परत्वाद् बाधते। वैरे तावत्—बाभ्रव्यशालङ्कायनिका। काकोलूकिका। मैथुनिकायाम्—अत्रिभरद्वाजिका। कुत्सकुशिकिका। विवहनं मैथुनिका। वैरस्य नपुंसकत्वेऽप्यमी स्वभावतः स्त्रीलिङ्गाः ॥ वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः॥ दैवासुरम्। राक्षोऽसुरं वैरम्॥

गोत्रचरणाद् वुञ् ॥ १२६ ॥

गोत्रवाचिभ्यश्चरणवाचिभ्यश्च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। अणोऽपवादः। छं तु परत्वाद् बाधते। गोत्रात् तावत्—ग्लौचुकायनकम्। औपगवकम् ॥ चरणाद् धर्माम्नाययोरिष्यते॥ काठकम्। कालापकम्। मौदकम्। पैप्पलादकम्॥

सङ्घाङ्कलक्षणेष्वञ्ञिञामण् ॥ १२७ ॥

संघादिषु प्रत्ययार्थविशेषणेष्वञन्ताद्, यञन्ताद्, इञन्तात् च प्रातिपदिकादण् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। पूर्वस्य वुञोऽपवादः ॥ घोषग्रहणमत्र कर्तव्यम्॥ तेन वैषम्याद् यथासंख्यं न भवति। अञन्तात्—बैदः संघः। बैदोऽङ्कः। बैदं लक्षणम्। बैदो घोषः। यञन्तात्—गार्गः संघः। गार्गोऽङ्कः। गार्गं लक्षणम्। गार्गो घोषः। इञन्तात्—दाक्षः संघः। दाक्षोऽङ्कः। दाक्षं लक्षणम्। दाक्षो घोषः। अङ्कलक्षणयोः को विशेषः ? लक्षणं लक्ष्यस्यैव चिह्नभूतं स्वं यथा विद्या बिदानाम्, अङ्कस्तु गवादिस्थोऽपि गवादीनां स्वं न भवति। णित्करणं ङीबर्थं पुंवद्भावप्रतिषेधार्थं च। बैदी विद्यास्य बैदीविद्यः॥

शाकलाद्वा ॥ १२८ ॥

शाकलशब्दात् संघादिषु प्रत्ययार्थविशेषणेषु वाण् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। वुञोऽपवादः। शाकल्येन प्रोक्तमधीयते, शाकलाः। तेषां संघः शाकलः, शाकलकः। शाकलोऽङ्कः, शाकलकोऽङ्कः। शाकलं लक्षणम्, शाकलकं लक्षणम्। शाकलो घोषः, शाकलको घोषः॥

---

१ - ' विवहनमैथुनिका ' इत्यपपाठो मुद्रितेषु। २ - यथान्यासपद० ।
३ - ' शाकलेन ' इति मुद्रितेषु पाठः।

छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ् ञ्यः ॥ १२९ ॥

संघादयो निवृत्ताः, सामान्येन विधानम्। छन्दोगादिभ्यः शब्देभ्यो ञ्यः प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। वुञणोरपवादः। चरणाद् धर्माम्नाययोः, तत्साहचर्याद् नटशब्दादपि धर्माम्नाययोरेव भवति। छन्दोगानां धर्मो वाम्नायो वा छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्। अन्यत्र छान्दोगं कुलमित्यादि॥

न दण्डमाणवान्तेवासिषु ॥ १३० ॥

दण्डप्रधाना माणवा दण्डमाणवाः, अन्तेवासिनः शिष्याः। तेष्वभिधेयेषु वुञ् प्रत्ययो न भवति। गोत्रग्रहणमिहानुवर्तते, तेन वुञ्प्रतिषेधो विज्ञायते। गौकक्षाः दण्डमाणवा अन्तेवासिनो वा। दाक्षाः। माहकाः॥

रैवतिकादिभ्यश्छः ॥ १३१ ॥

रैवतिकादिभ्यश्छः प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। गोत्रप्रत्ययान्ता एते, ततः पूर्वेण वुञि प्राप्ते छविधानार्थं वचनम्। रैवतिकीयः। स्वापिशीयः॥ रैवतिक। स्वापिशि। क्षैमवृद्धि। गौरग्रीवि। औदमेयि। औदवाहि। बैजवापि॥

कौपिञ्जलहास्तिपदादण् ॥ १३२ ॥

कौपिञ्जलहास्तिपदशब्दाभ्यामण् प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये। गोत्रवुञोऽपवादः, गोत्राधिकारात्। कौपिञ्जलः। हास्तिपदः॥

आथर्वणिकस्येकलोपश्च ॥ १३३ ॥

अणित्येव। आथर्वणिकशब्दादण् प्रत्ययो भवति, तत्सन्नियोगेन चेकलोपः, तस्येदमित्येतस्मिन् विषये। चरणवुञोऽपवादः। आथर्वणिकस्यायम् आथर्वणो धर्म आम्नायो वा। 'चरणाद् धर्माम्नाययोः' (वा० ४.३.१२६)॥

तस्य विकारः ॥ १३४ ॥

तस्येति षष्ठीसमर्थाद् विकार इत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति। प्रकृतेरवस्थान्तरं विकारः। किमिहोदाहरणम् ? अप्राण्याद्युदात्तमवृद्धम् , यस्य च नान्यत् प्रतिपदं विधानम्। अश्मनो विकार आश्मनः। आश्मः। 'अश्मनो विकारे' (वा० ६.४.१४४) इति टिलोपः पाक्षिकः। भास्मनः। मार्त्तिकः। नित्स्वरेणाद्युदात्ता एते। तस्यप्रकरणे तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थम्। विकारावयवयोर्घादयो न भवन्ति। हालः। सैरः॥

अवयवे च प्राण्योषधिवृक्षेभ्यः ॥ १३५ ॥

प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्योऽवयवे यथाविहितं प्रत्ययो भवति, चकारादू विकारे च। तत्र प्राणिभ्योऽञं वक्ष्यति (४.३.१५४)। कपोतस्य विकारोऽवयवो वा कापोतः। मायूरः। तैत्तिरः। ओषधिभ्यः—मौर्वं काण्डम्। मौर्वं भस्म। वृक्षेभ्यः—कारीरं काण्डम्। कारीरं भस्म। इत उत्तरे प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावयवयोर्भवन्ति। अन्येभ्यस्तु विकारमात्रे। कथं द्वयमप्यधिक्रियते तस्य विकारः, अवयवे च प्राण्योषधिवृक्षेभ्य इति ? विकारावयवयोर्युगपदधिकारोऽपवादविधानार्थः। कृतनिर्देशौ (४.३.१२०) हि तौ॥

बिल्वादिभ्योऽण् ॥ १३६ ॥

बिल्व इत्येवमादिभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः। यथायोगमञ्-मयटोरपवादः। बिल्वस्य विकारोऽवयवो वा बैल्वः। गवेधुकाशब्दोऽत्र पठ्यते, ततः कोपधादेव सिद्धे मयड्बाधनार्थं ग्रहणम्॥ बिल्व। व्रीहि। काण्ड। मुद्ग। मसूर। गोधूम। इक्षु। वेणु। गवेधुका। कर्पासी। पाटली। कर्कन्धू। कुटीर। बिल्वादिः॥

कोपधाच्च ॥ १३७ ॥

ककारोपधात् प्रातिपदिकादण् प्रत्ययो भवति यथायोगं विकारावयवयोरर्थयोः। अञोऽपवादः। तर्कु—तार्कवम्। तित्तिडीक—तैत्तिडीकम्। माण्डूकम्। दार्दुरूकम्। माधूकम्॥

त्रपुजतुनोः षुक् ॥ १३८ ॥

त्रपुजतुशब्दाभ्यामण् प्रत्ययो भवति विकारे, तत्सन्नियोगेन तयोः षुगागमो भवति। ओरञोऽपवादः। त्रपुणो विकारः त्रापुषम्। जातुषम्। अप्राण्यादित्वाद् नावयवे॥

ओरञ् ॥ १३९ ॥

उवर्णान्तात् प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। अणोऽपवादः। अनुदात्तादेरन्यदिहोदाहरणम्। दैवदारवम्। भाद्रदारवम्॥

अनुदात्तादेश्च ॥ १४० ॥

अनुदात्तादेः प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। अणोऽपवादः। दाधित्थम्। कापित्थम्। माहित्थम्॥

पलाशादिभ्यो वा ॥ १४१ ॥

पलाशादिभ्यः प्रातिपदिकेभ्यो वाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। पालाशम्। खादिरम्। यावासम्। उभयत्र विभाषेयम्। पलाशखदिरशिंशपास्पन्दनानामनुदात्तादित्वात् प्राप्ते, अन्येषामप्राप्ते॥ पलाश। खदिर। शिंशपा। स्पन्दन। करीर। शिरीष। यवास। विकङ्कत। पलाशादिः॥

शम्याष्ट्लञ् ॥ १४२ ॥

शमीशब्दाट् ट्लञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। अञोऽपवादः। शामीलं भस्म। शामीली स्रुक्॥

मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ १४३ ॥

प्रकृतिमात्राद् वा मयट् प्रत्ययो भवति भक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयोर्भाषायां विषये यथायथं प्रत्ययेषु प्राप्तेषु। अश्ममयम्, आश्मनम्। मूर्वामयम्, मौर्वम्। भाषायामिति किम् ? बैल्वः खादिरो वा यूपः (आप० श्रौ० १८.१.८) स्यात्। अभक्ष्याच्छादनयोरिति किम् ? मौद्गः सूपः। कार्पासमाच्छादनम्। एतयोरित्यनेन किम्, यावता विकारावयवौ प्रकृतावेव ? ये विशेषप्रत्ययाः 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४) इत्येवमादयस्तद्विषयेऽपि यथा स्यात्—कपोतमयम्, कापोतम्। लोहमयम् , लौहमिति॥

नित्यं वृद्धशरादिभ्यः ॥ १४४ ॥

भाषायामभक्ष्याच्छादनयोरित्येव। वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति। वृद्धेभ्यस्तावत्—आम्रमयम्। शालमयम्। शाकमयम्। शरादिभ्यः—शरमयम्। दर्भमयम्। मृन्मयम्। नित्यग्रहणं किम्, यावतारम्भसामर्थ्यादेव नित्यं भविष्यति ? एकाचो नित्यं मयटमिच्छन्ति, तदनेन क्रियते—त्वङ्मयम्, स्रङ्मयम्, वाङ्मयमिति॥ शर। दर्भ। मृत्। कुटी। तृण। सोम। बल्वज। शरादिः॥

गोश्च पुरीषे ॥ १४५ ॥

गोशब्दात् पुरीषेऽभिधेये मयट् प्रत्ययो भवति। गोमयम्। पुरीष इति किम् ? गव्यं पयः। पुरीषं न विकारो नाप्यवयवः, तस्येदंविषये विधानम्। विकारावयवयोस्तु गोपयसोर्यतं (४.३.१६०) वक्ष्यति॥

---

१ - ' आश्मम् ' इत्यपि स्यात्। जयादित्यो विकारे टिलोपं पाक्षिकं मन्यते (४.३.१३४), वामनस्तु नित्यम्।

पिष्टाच्च ॥ १४६ ॥

पिष्टशब्दाद् नित्यं मयट् प्रत्ययो भवति तस्य विकार इत्येतस्मिन् विषये। अणोऽपवादः। पिष्टमयं भस्म॥

संज्ञायां कन् ॥ १४७ ॥

पिष्टशब्दात् कन् प्रत्ययो भवति विकारे संज्ञायां विषये। मयटोऽपवादः। पिष्टकः॥

व्रीहेः पुरोडाशे ॥ १४८ ॥

व्रीहिशब्दाद् मयट् प्रत्ययो भवति पुरोडाशे विकारे। बिल्वाद्यणोऽपवादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्॥

असंज्ञायां तिलयवाभ्याम् ॥ १४९ ॥

तिलयवशब्दाभ्यामसंज्ञाविषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः। तिलमयम्। यवमयम्। असंज्ञायामिति किम् ? तैलम्। यावकः। 'यावादिभ्यः कन्' (५.४.२६)॥

द्व्यचश्छन्दसि ॥ १५० ॥

द्व्यचः प्रातिपदिकाच् छन्दसि विषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः। भाषायां मयडुक्तः, छन्दस्यप्राप्तो विधीयते। यस्यं पर्णꣳमयीं जुहूर्भवति (तै० सं० ३.५.७.१)। दर्भꣳमयंꣳ वासो भवति (मै० सं० १. ११.८)। शरमयं बर्हिर्भवति (आ० श्रौ० ६.७.५)॥

नोत्वद्वर्ध्रबिल्वात् ॥ १५१ ॥

उत्वतः प्रातिपदिकाद् वर्ध्रबिल्वशब्दाभ्यां च मयट् प्रत्ययो न भवति। 'द्व्यचश्छन्दसि' (४.३.१५०) इति प्राप्तः प्रतिषिध्यते। मौञ्जं शिꣳक्यम् (तै० सं० ५.१.१०.५)। गार्मुतं चꣳरुम् (तै० सं० २.४.४.१)। वार्ध्री बालप्रग्रथिता (आप० श्रौ० १८.१०.२३) भवति। बैꣳल्वो ब्रह्मवर्चꣳसकामेन कार्यः (मै० सं० ३.६.३)। तपरकरणं तत्कालार्थम्। धूममयान्यभ्राणि। मतुबनिर्देशस्तदन्तविधिनिरासार्थः। इहैव स्यात्—वैणवी यष्टिरिति॥

तालादिभ्योऽण् ॥ १५२ ॥

तालादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः। मयडादी-

नामपवादः। तालं धनुः। बार्हिणम्। ऐन्द्रालिशम्॥ तालाद् धनुषि (ग० सू० १०४)। बार्हिण। इन्द्रालिश। इन्द्रादृश। इन्द्रायुध। चाप। श्यामाक। पीयूक्षा। तालादिः॥

जातरूपेभ्यः परिमाणे ॥ १५३ ॥

जातरूपं सुवर्णम्। बहुवचननिर्देशात् तद्वाचिनः सर्वे गृह्यन्ते। जातरूपवाचिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति परिमाणे विकारे। मयडादीनामपवादः। हाटको निष्कः। हाटकं कार्षापणम्। जातरूपम्। तापनीयम्। परिमाण इति किम्? यष्टिरियं हाटकमयी॥

प्राणिरजतादिभ्योऽञ् ॥ १५४ ॥

प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्चाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। अणादीनामपवादः। अनुदात्तादेरञ् (४.३.१४०) विहित एव, परिशिष्टमिहोदाहरणम्। प्राणिभ्यस्तावत्—कापोतम्। मायूरम्। तैत्तिरम्। रजतादिभ्यः—राजतम्। सैसम्। लौहम्। रजतादिषु येऽनुदात्तादयः पठ्यन्ते रजतकण्टकारप्रभृतयः, तेभ्योऽञि सिद्धे पुनर्वचनं मयड्बाधनार्थम्॥ रजत। सीस। लोह। उदुम्बर। नीलदारु। रोहितक। बिभीतक। पीतदारु। तीव्रदारु। त्रिकण्टक। कण्टकार। रजतादिः॥

ञितश्च तत्प्रत्ययात् ॥ १५५ ॥

अञित्येव। तदिति विकारावयवयोरर्थयोः प्रत्यवमर्शः। ञिद् यो विकारावयव-प्रत्ययः, तदन्तात् प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरेव। मयटोऽपवादः। 'ओरञ्' (४.३.१३६), 'शम्याष्ट्लञ्' (४.३.१४२), 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४), 'उष्ट्राद् वुञ्' (४.३.१५७), 'एण्या ढञ्' (४.३.१५६), 'कंसीयपरशव्ययोर्यञञौ०' (४.३.१६८) इत्येते प्रत्यया गृह्यन्ते। दैवदारवस्य विकारोऽवयवो वा दैवदारवम्। दाधित्थस्य दाधित्थम्। पालाशस्य पालाशम्। शामीलस्य शामीलम्। कापोतस्य कापोतम्। औष्ट्रकस्य औष्ट्रकम्। ऐणेयस्य ऐणेयम्। कांस्यस्य कांस्यम्। पारशवस्य पारशवम्। ञित इति किम्? बैल्वमयम्। तत्प्रत्ययादिति किम्? बैदमयम्॥

क्रीतवत् परिमाणात् ॥ १५६ ॥

'प्राग्वतेष्ठञ्' (५.१.१८) इत्यत आरभ्य क्रीतार्थे ये प्रत्ययाः परिमाणाद् विहिताः, ते विकारेऽतिदिश्यन्ते। परिमाणात् क्रीत इव प्रत्यया भवन्ति तस्य विकार इत्येतस्मिन् विषये। अणादीनामपवादः। संख्यापि परिमाणग्रहणेन गृह्यते, न रूढिपरिमाणमेव।

---

१ - 'नीचदारु' इति बाल०। २ - 'कपीत दारु' इति बाल०। 'पीतदास' इति है०।

३ - 'संख्या च' इति पाठान्तरम्।

निष्केण क्रीतं नैष्किकम्। एवं निष्कस्य विकारो नैष्किकः। शतेन क्रीतं शत्यम्, शतिकम्। शतस्य विकारः शत्यः, शतिकः। साहस्रः। वतिः सर्वसादृश्यार्थः। 'अध्यर्धपूर्वाद् द्विगोर्लुगसंज्ञायाम्' (५.१.२८) इत्येवमादिकमप्यतिदिश्यते। द्विसहस्रः, द्विसाहस्रः। द्विनिष्कः, द्विनैष्किकः॥

उष्ट्राद् वुञ् ॥ १५७ ॥

उष्ट्रशब्दाद् वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। प्राण्यञोऽपवादः। उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः॥

उमोर्णयोर्वा ॥ १५८ ॥

उमाशब्दादूर्णाशब्दात् च वा वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। औमकम्, औमम्। और्णकम्, और्णम्॥

एण्या ढञ् ॥ १५९ ॥

एणीशब्दाद् ढञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। प्राण्यञोऽपवादः। ऐणेयं मांसम्। पुंसस्त्वञेव भवति। एणस्य मांसमैणम्॥

गोपयसोर्यत् ॥ १६० ॥

गोपयःशब्दाभ्यां यत् प्रत्ययो भवति विकारावयवयोरर्थयोः। गव्यम्। पयस्यम्। 'सर्वत्र गोरजादिप्रसङ्गे यत्' (वा० ४.१.८५) अस्त्येव, मयड्विषये तु विधीयते॥

द्रोश्च ॥ १६१ ॥

द्रुशब्दाद् यत् प्रत्ययो भवति विकारावयवयोरर्थयोः। ओरञोऽपवादः। द्रव्यम्॥

माने वयः ॥ १६२ ॥

द्रुशब्दाद् माने विकारविशेषे वयः प्रत्ययो भवति। यतोऽपवादः। द्रुवयम्॥

फले लुक् ॥ १६३ ॥

विकारावयवयोरुत्पन्नस्य फले तद्विशेषे विवक्षिते लुग् भवति। आमलक्याः फलम् आमलकम्। कुवलम्। बदरम्। फलितस्य वृक्षस्य फलमवयवो भवति विकारश्च, पल्लवितस्येव पल्लवः॥

---

१ - ' अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ' इति मूले।

प्लक्षादिभ्योऽण् ॥ १६४ ॥

फल इत्येव। प्लक्षादिभ्यः प्रातिपदिकेभ्यः फले विकारावयवत्वेन विवक्षितेऽण् प्रत्ययो भवति। अञोऽपवादः। विधानसामर्थ्यात् तस्य न लुग् भवति। प्लाक्षम्। नैयग्रोधम्॥ प्लक्ष। न्यग्रोध। अश्वत्थ। इङ्गुदी। शिग्रु। कर्कन्धु। बृहती। प्लक्षादिः॥

जम्ब्वा वा ॥ १६५ ॥

फल इत्येव। जम्बूशब्दात् फलेऽभिधेये वाण् प्रत्ययो भवति। अञोऽपवादः। अत्राणो विधानसामर्थ्यात् लुग् न भवति, अञस्तु भवत्येव। जाम्बवानि फलानि, जम्बूनि वा॥

लुप् च ॥ १६६ ॥

वेत्येव। जम्ब्वाः फलेऽभिधेये प्रत्ययस्य वा लुब् भवति। युक्तवद्भावे विशेषः। जम्ब्वाः फलं जम्बूः फलम् , जम्बु फलम् , जाम्बवमिति वा ॥ लुप्प्रकरणे फलपाकशुषामुपसंख्यानम्॥ व्रीहयः। यवाः। माषाः। मुद्गाः। तिलाः ॥ पुष्पमूलेषु बहुलम्॥ मल्लिकायाः पुष्पं मल्लिका। नवमल्लिका जातिः। बिदार्या मूलं बिदारी। अंशुमती। बृहती। न च भवति—पाटलानि पुष्पाणि। शाल्वानि मूलानि। बहुलवचनात् क्वचिदन्यदपि भवति। कदम्बं पुष्पम्। अशोकम्। करवीरम्। बैल्वानि फलानीति॥

हरीतक्यादिभ्यश्च ॥ १६७ ॥

हरीतकी इत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुब् भवति। लुकि प्राप्ते लुपो विधाने युक्तवद्भावे स्त्रीप्रत्ययश्रवणे च विशेषः। हरीतक्याः फलं हरीतकी। कोशातकी। नखरजनी। अत्र च व्यक्तिर्युक्तवद्भावेनेष्यते, वचनं त्वभिधेयवदेव भवति। हरीतक्याः फलानि हरीतक्यः॥ हरीतकी। कोशातकी। नखरजनी। शष्कण्डी। दाडी। दोडी। दीडी। श्वेतपाकी। अर्जुनपाकी। काला। द्राक्षा। ध्वाङ्क्षा। गर्गरिका। कण्टकारिका। शेफालिका। येषां च फलपाकनिमित्तः शोषः (ग० सू० १०५)। पुष्पमूलेषु बहुलम् (ग० सू० १०६)। हरीतक्यादिः॥

कंसीयपरशव्ययोर्यञञौ लुक् च ॥ १६८ ॥

---

१ - ' येषां.....बहुलम् ' इति पाठः क्वाचित्कः।

'प्राक्क्रीताच्छः' (५.१.१)—कंसीयः। 'उगवादिभ्यो यत्' (५.१.२)—परशव्यः। कंसीयपरशव्यशब्दाभ्यां यथासंख्यं यञञौ प्रत्ययौ भवतस्तस्य विकार इत्येतस्मिन् विषये, तत्संनियोगेन च कंसीयपरशव्ययोर्लुग् भवति। कंसीयस्य विकारः कांस्यः। परशव्यस्य विकारः पारशवः। प्रातिपदिकाधिकाराद् धातुप्रत्ययस्य न लुग् भवति। परशव्यशब्दादनुदात्तादित्वादेवाञि सिद्धे लुगर्थं वचनम्। ननु च 'यस्येति०' (६.४.१४८) इति लोपे कृते 'हलस्तद्धितस्य' (६.४.१५०) इति यलोपो भविष्यति ? नैतदस्ति। ईतीति तत्र वर्तते॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य तृतीयः पादः॥

— o —

॥ चतुर्थाध्यायस्य चतुर्थः पादः ॥

प्राग्वहतेष्ठक् ॥ १॥

'तद्वहति रथयुगप्रासङ्गम्' (४.४.७६) इति वक्ष्यति। प्रागेतस्माद् वहतिसंशब्दनाद् यानर्थाननुक्रमिष्यामः, ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति—'तेन दीव्यति खनति जयति जितम्' (४.४.२) इति। अक्षैर्दीव्यति आक्षिकः ॥ ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानम्॥ माशब्द इत्याह माशब्दिकः। नैत्यशब्दिकः। कार्यशब्दिकः। वाक्यादेतत् प्रत्ययविधानम् ॥ आहौ प्रभूतादिभ्यः॥ प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। क्रियाविशेषणात् प्रत्ययः ॥ पृच्छतौ सुस्नातादिभ्यः॥ सुस्नातं पृच्छति सौस्नातिकः। सौखरात्रिकः। सौखशायनिकः ॥ गच्छतौ परदारादिभ्यः॥ परदारान् गच्छति पारदारिकः। गौरुतल्पिकः॥

तेन दीव्यति खनति जयति जितम् ॥ २ ॥

तेनेति तृतीयासमर्थाद् दीव्यति खनति जयति जितमित्येतेष्वर्थेषु ठक् प्रत्ययो भवति। अक्षैर्दीव्यति आक्षिकः। शालाकिकः। अभ्रया खनति आभ्रिकः। कौद्दालिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितम् आक्षिकम्। शालाकिकम्। सर्वत्र करणे तृतीया समर्थविभक्तिः। देवदत्तेन जितमिति प्रत्ययो न भवति, अनभिधानात्। अङ्गुल्या खनतीति च। प्रत्ययार्थे संख्याकालयोरविवक्षा। क्रियाप्रधानत्वेऽपि चाख्यातस्य तद्धितः स्वभावात् साधनप्रधानः॥

संस्कृतम् ॥ ३ ॥

तेनेति तृतीयासमर्थात् संस्कृतमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। सत उत्कर्षाधानं संस्कारः। दध्ना संस्कृतं दाधिकम्। शार्ङ्गवेरिकम्। मारिचिकम्[1]। योगविभाग उत्तरार्थः॥

कुलत्थकोपधादण् ॥ ४ ॥

कुलत्थशब्दात् ककारोपधाच् छब्दाच् च प्रातिपदिकादण् प्रत्ययो भवति संस्कृतमित्येतस्मिन् विषये। ठकोऽपवादः। कुलत्थैः संस्कृतं कौलत्थम्। ककारोपधात्—तैत्तिडीकम्। दार्दभकम्॥

तरति ॥ ५ ॥

तेनेति तृतीयासमर्थात् तरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। तरति प्लवत इत्यर्थः। काण्डप्लवेन तरति काण्डप्लविकः। औडुपिकः॥

गोपुच्छाट् ठञ् ॥ ६ ॥

गोपुच्छशब्दाट् ठञ् प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे। ठकोऽपवादः। स्वरे विशेषः। गौपुच्छिकः॥

नौद्व्यचष्ठन् ॥ ७ ॥

नौशब्दाद् द्व्यचश्च प्रातिपदिकाट् ठन् प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे। ठकोऽपवादः। नावा तरति नाविकः। द्व्यचः खल्वपि—घटिकः। प्लविकः। बाहुकः। षकारः सांहितिको नानुबन्धः। बाहुका स्त्री।

---

१ - 'मारीचिकम्' इत्यपपाठो है०।

आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात् किशरादेः षितः षडेते ठगधिकारे॥
विधिवाक्यापेक्षं च षट्त्वम्, प्रत्ययास्तु सप्त॥

चरति ॥ ८ ॥

तेनेति तृतीयासमर्थात् चरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। चरतिर्भक्षणे गतौ च (भ्वा० ३७६) वर्तते। दध्ना चरति दाधिकः। हास्तिकः। शाकटिकः॥

आकर्षात् ष्ठल् ॥ ९ ॥

आकर्षशब्दात् ष्ठल् प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे। ठकोऽपवादः। लकारः स्वरार्थः। षकारो ङीषर्थः। आकर्षेण चरति आकर्षिकः। आकर्षिकी। आकर्ष इति सुवर्णपरीक्षार्थो निकषोपल उच्यते॥

पर्पादिभ्यः ष्ठन् ॥ १० ॥

पर्प इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे। ठकोऽपवादः। नकारः स्वरार्थः। षकारो ङीषर्थः। पर्पिकः। पर्पिकी। अश्विकः। अश्विकी॥ पर्प। अश्व। अश्वत्थ। रथ। जाल। न्यास। व्याल। पादः पच्च (ग० सू० १०७)। पदिकः। पर्पादिः॥

श्वगणाट् ठञ् च ॥ ११ ॥

श्वगणशब्दात् ठञ् प्रत्ययो भवति, चकारात् ष्ठन्, चरतीत्येतस्मिन्नर्थे। ठकोऽपवादः। श्वगणेन चरति श्वागणिकः। श्वागणिकी। ष्ठन्—श्वगणिकः। श्वगणिकी। श्वादेरिञि (७.३.८) इत्यत्र वक्ष्यति—'इकारादिग्रहणं च कर्तव्यं श्वागणिकाद्यर्थम्' (वा० ७.३.८) इति। तेन ठञि द्वारादिकार्यं न भवति॥

वेतनादिभ्यो जीवति ॥ १२ ॥

तेनेति तृतीयासमर्थेभ्यो वेतनादिभ्यः शब्देभ्यो जीवतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। वेतनेन जीवति वैतनिकः कर्मकरः। धनुर्दण्डग्रहणमत्र संघातविगृहीतार्थम्। धानुर्दण्डिकः। धानुष्कः। दाण्डिकः॥ वेतन। वाह। अर्धवाह। धनुर्दण्ड। जाल। वेस। उपवेस। प्रेषण। उपस्ति। सुख। शय्या। शक्ति। उपनिषत्। उपवेष। स्रक्। पाद। उपस्थान। वेतनादिः॥

---

१ - ' पाद। पञ्च। पदिक। ' इति है०।

वस्नक्रयविक्रयाट् ठन् ॥ १३ ॥

वस्नक्रयविक्रयशब्दाभ्यां तृतीयासमर्थाभ्यां ठन् प्रत्ययो भवति, जीवतीत्येतस्मिन् विषये। ठकोऽपवादः। वस्नेन जीवति वस्निकः। क्रयविक्रयग्रहणं संघातविगृहीतार्थम्। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः॥

आयुधाच्छ च ॥ १४ ॥

आयुधशब्दाच् छप्रत्ययो भवति, चकारात् ठंश्च, जीवतीत्येतस्मिन् विषये। आयुधेन जीवति आयुधीयः। आयुधिकः॥

हरत्युत्सङ्गादिभ्यः ॥ १५ ॥

तेनेत्येव। उत्सङ्गादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। हरतिर्देशान्तरप्रापणे वर्तते। उत्सङ्गेन हरति औत्सङ्गिकः। औडुपिकः॥ उत्सङ्ग। उडुप। उत्पत। पिटक। उत्सङ्गादिः॥

भस्त्रादिभ्यः ष्ठन् ॥ १६ ॥

भस्त्रेत्येवमादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ष्ठन् प्रत्ययो भवति। भस्त्रया हरति भस्त्रिकः। भस्त्रिकी। भरटिकः। भरटिकी॥ भस्त्रा। भरट। भरण। शीर्षभार। शीर्षेभार। अंसभार। अंसेभार। भस्त्रादिः॥

विभाषा विवधवीवधात् ॥ १७ ॥

हरतीत्येव। विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषा ष्ठन् प्रत्ययो भवति। तेन मुक्ते प्रकृतष्ठग् भवति। विवधेन हरति विवधिकः। विवधिकी। वीवधिकः। वीवधिकी। ठक् खल्वपि—वैवधिकः। वैवधिकी। विवधवीवधशब्दौ समानार्थौ पथि पर्याहारे च वर्तेते॥

अण् कुटिलिकायाः ॥ १८ ॥

हरतीत्येव। कुटिलिकाशब्दात् तृतीयासमर्थादण् प्रत्ययो भवति हरतीत्येतस्मिन्नर्थे। कुटिलिकया हरति मृगो व्याधं कौटिलिको मृगः। कुटिलिकया हरत्यङ्गारान् कौटिलिकः कर्मारः। कुटिलिका वक्रगतिः, कर्माराणामायुधकर्षणी लोहमयी यष्टिश्चोच्यते॥

निर्वृत्तेऽक्षद्यूतादिभ्यः ॥ १९ ॥

तेनेत्येव। अक्षद्यूतादिभ्यस्तृतीयासमर्थेभ्यो निर्वृत्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अक्षद्यूतेन निर्वृत्तम् आक्षद्यूतिकं वैरम्। जानुप्रहतिकम्॥ अक्षद्यूत। जानुप्रहत। जङ्घाप्रहत। पादस्वेदन। कण्टकमर्दन। गतागत। यातोपयात। अनुगत। अक्षद्यूतादिः॥

त्रेर्मम् नित्यम् ॥ २० ॥

निर्वृत्त इत्येव। 'ड्वितः क्त्रिः' (३.३.८८) इत्ययं त्रिशब्दो गृह्यते। त्र्यन्ताद् नित्यं मप् प्रत्ययो भवति तेन निर्वृत्त इत्येतस्मिन्नर्थे। 'डुपचष् पाके' (भ्वा० ७२२)—पक्त्रिमम्। डुवप् (भ्वा० ७२६)—उप्त्रिमम्। डुकृञ् (तना० १०)—कृत्रिमम्। नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम्। तेन त्र्यन्तं नित्यं मप्रत्ययान्तमेव भवति, विषयान्तरे न प्रयोक्तव्यमिति ॥ भावप्रत्ययान्तादिमब् वक्तव्यः॥ पाकेन निर्वृत्तं पाकिमम्। त्यागिमम्। सेकिमम्। कुट्टिमम्॥

अपमित्ययाचिताभ्यां कक्कनौ ॥ २१ ॥

निर्वृत्त इत्येव। अपमित्ययाचितशब्दाभ्यां यथासंख्यं कक् कन् इत्येतौ प्रत्ययौ भवतो निर्वृत्त इत्येतस्मिन्नर्थे। आपमित्यकम्। याचितकम्॥

संसृष्टे ॥ २२ ॥

तेनेत्येव। तृतीयासमर्थात् संसृष्ट इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। संसृष्टमेकीभूतमभिन्नमित्यर्थः। दध्ना संसृष्टं दाधिकम्। मारिचिकम्। शार्ङ्गवेरिकम्। पैप्पलिकम्॥

चूर्णादिनिः ॥ २३ ॥

चूर्णशब्दादिनिः प्रत्ययो भवति संसृष्टे। ठकोऽपवादः। चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः। चूर्णिनो धानाः॥

लवणाल्लुक् ॥ २४ ॥

संसृष्ट इत्यनेनोत्पन्नस्य ठको लवणशब्दाद् लुग् भवति। लवणः सूपः। लवणं शाकम्। लवणा यवागूः। द्रव्यवाची लवणशब्दो लुकं प्रयोजयति, न गुणवाची॥

मुद्गादण् ॥ २५ ॥

मुद्गशब्दादण् प्रत्ययो भवति संसृष्ट इत्येतस्मिन् विषये। ठकोऽपवादः। मौद्ग ओदनः। मौद्गी यवागूः॥

व्यञ्जनैरुपसिक्ते ॥ २६ ॥

तेनेत्येव। व्यञ्जनवाचिभ्यः प्रातिपदिकेभ्यस्तृतीयासमर्थेभ्य उपसिक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दध्ना उपसिक्तं दाधिकम्। सौपिकम्। खारिकम्। व्यञ्जनैरिति किम् ? उदकेनोपसिक्त ओदनः॥

ओजःसहोऽम्भसा वर्तते ॥ २७ ॥

ओजस् सहस् अम्भस् इत्येतेभ्यस्तृतीयासमर्थेभ्यो वर्तत इत्यर्थे ठक् प्रत्ययो भवति। ओजसा वर्तत औजसिकः शूरः। साहसिकश्चौरः। आम्भसिको मत्स्यः॥

तत्प्रत्यनुपूर्वमीपलोमकूलम् ॥ २८ ॥

तदिति द्वितीयासमर्थविभक्तिः। प्रति अनु इत्येवंपूर्वेभ्य ईपलोमकूलशब्देभ्यो द्वितीया- समर्थेभ्यो वर्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। ननु च वृतिरकर्मकः, तस्य कथं कर्मणा संबन्धः ? क्रियाविशेषणमकर्मकाणामपि कर्म भवति। प्रतीपं वर्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः॥

परिमुखं च ॥ २९ ॥

परिमुखशब्दाद् द्वितीयासमर्थाद् वर्तत इत्यस्मिन्नर्थे ठक् प्रत्ययो भवति। परिमुखं वर्तते पारिमुखिकः। चकारोऽनुक्तसमुच्चयार्थः। पारिपार्श्विकः॥

प्रयच्छति गर्ह्यम् ॥ ३० ॥

तदिति द्वितीयासमर्थात् प्रयच्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति, यत् तद् द्वितीया- समर्थं गर्ह्यं चेत् तद् भवति। द्विगुणार्थं द्विगुणम्, तादर्थ्यात् ताच्छब्द्यम्। द्विगुणं प्रयच्छति द्वैगुणिकः। त्रैगुणिकः ॥ वृद्धेर्वृधुषिभावो वक्तव्यः॥ वार्धुषिकः। प्रकृत्यन्तरं वा वृद्धिपर्यायो वृधुषिशब्दः। गर्ह्यमिति किम् ? द्विगुणं प्रयच्छत्यधमर्णः॥

कुसीददशैकादशात् ष्ठन्ष्ठचौ ॥ ३१ ॥

प्रयच्छति गर्ह्यमित्येव। कुसीदं वृद्धिः, तदर्थं द्रव्यं कुसीदम्। एकादशार्था दश दशैकादशशब्देनोच्यन्ते। कुसीददशैकादशशब्दाभ्यां यथासंख्यं ष्ठन् ष्ठच् इत्येतौ प्रत्ययौ भवतः प्रयच्छति गर्ह्यमित्येतस्मिन् विषये। ठकोऽपवादौ। कुसीदं प्रयच्छति कुसीदिकः। कुसीदिकी। दशैकादशिकः। दशैकादशिकी॥

उञ्छति ॥ ३२ ॥

तदिति द्वितीयासमर्थादुञ्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। बदराण्युञ्छति बादरिकः। श्यामाकिकः। भूमौ पतितस्यैकैकस्य कणस्योपादानमुञ्छः। कणानुञ्छति काणिकः॥

रक्षति ॥ ३३ ॥

तदिति द्वितीयासमर्थाद् रक्षतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। समाजं रक्षति सामाजिकः। सांनिवेशिकः॥

शब्ददर्दुरं करोति ॥ ३४ ॥

तदिति द्वितीयासमर्थाभ्यां शब्ददर्दुरशब्दाभ्यां करोतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। शब्दं करोति शाब्दिको वैयाकरणः। दार्दुरिकः कुम्भकारः॥

पक्षिमत्स्यमृगान् हन्ति ॥ ३५ ॥

तदित्येव। पक्ष्यादिभ्यो द्वितीयासमर्थेभ्यो हन्तीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। स्वरूपस्य पर्यायाणां तद्विशेषाणां च ग्रहणमिहेष्यते। पक्षिणो हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। तैत्तिरिकः। मत्स्य—मात्स्यिकः। मैनिकः। शाफरिकः। शाकुलिकः। मृग—मार्गिकः। हारिणिकः। सौकरिकः। सारङ्गिकः॥

परिपन्थं च तिष्ठति ॥ ३६ ॥

परिपन्थशब्दात् तदिति द्वितीयासमर्थात् तिष्ठतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। परिपन्थं तिष्ठति पारिपन्थिकश्चौरः। चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोति। परिपन्थं हन्ति पारिपन्थिकः। समर्थविभक्तिप्रकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थम्। परिपथशब्दपर्यायः परिपन्थशब्दोऽस्तीति ज्ञापयति। स विषयान्तरेऽपि प्रयोक्तव्यः॥

माथोत्तरपदपदव्यनुपदं धावति ॥ ३७ ॥

माथशब्दोत्तरपदात् प्रातिपदिकात् पदवी अनुपद इत्येताभ्यां च धावतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दण्डमाथं धावति दाण्डमाथिकः। शौल्कमाथिकः। पादविकः। आनुपदिकः। माथशब्दः पथिपर्यायः॥

आक्रन्दाट् ठञ् च ॥ ३८ ॥

आक्रन्दन्त्येतस्मिन्नित्याक्रन्दो देशः। अथवाक्रन्द्यत इत्याक्रन्द आर्तायनमुच्यते। विशेषाभावाद् द्वयोरपि ग्रहणम्। आक्रन्दशब्दात् तदिति द्वितीयासमर्थाद् धावतीत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति, चकारात् ठक् च। स्वरे विशेषः। आक्रन्दं धावति आक्रन्दिकः। आक्रन्दिकी॥

पदोत्तरपदं गृह्णाति ॥ ३९ ॥

पदशब्द उत्तरपदं यस्य तस्मात् पदोत्तरपदशब्दात् तदिति द्वितीयासमर्थाद् गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः। पदान्तादिति नोक्तम्—बहुच्पूर्वान् मा भूदिति॥

प्रतिकण्ठार्थललामं च ॥ ४० ॥

प्रतिकण्ठार्थललामशब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः। आर्थिकः। लालामिकः॥

धर्मं चरति ॥ ४१ ॥

धर्मशब्दात् तदिति द्वितीयासमर्थात् चरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। चरतिरासेवायां नानुष्ठानमात्रे। धर्मं चरति धार्मिकः॥ अधर्माच्चेति वक्तव्यम्॥ आधर्मिकः॥

प्रतिपथमेति ठंश्च ॥ ४२ ॥

प्रतिपथशब्दाद् द्वितीयासमर्थाद् एतीत्यस्मिन्नर्थे ठन् प्रत्ययो भवति, चकारात् ठक् च। प्रतिपथमेति प्रतिपथिकः। प्रातिपथिकः॥

समवायान् समवैति ॥ ४३ ॥

समवायवाचिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यः समवैतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। समवायः समूह उच्यते, न संप्रधारणा। समवायानिति बहुवचनं स्वरूपविधि- निरासार्थम्। समवैति आगत्य तदेकदेशीभवतीत्यर्थः। समवायान् समवैति सामवायिकः। सामाजिकः। सामूहिकः। सान्निवेशिकः॥

परिषदो ण्यः ॥ ४४ ॥

परिषदो ण्यः प्रत्ययो भवति समवायान् समवैतीत्येतस्मिन् विषये। ठकोऽपवादः। परिषदं समवैति पारिषद्यः॥

सेनाया वा ॥ ४५ ॥

सेनाशब्दाद् वा ण्यः प्रत्ययो भवति समवायान् समवैतीत्येतस्मिन्नर्थे। ठकोऽपवादः। पक्षे सोऽपि भवति। सेनां समवैति सैन्यः। सैनिकः॥

संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ४६ ॥

ललाटकुक्कुटीशब्दाभ्यां तदिति द्वितीयासमर्थाभ्यां पश्यतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति संज्ञायां विषये। संज्ञाग्रहणमभिधेयनियमार्थम् , न तु रूढ्यर्थम्। ललाटं पश्यति लालाटिकः सेवकः। कौक्कुटिको भिक्षुः। सर्वावयवेभ्यो ललाटं दूरे दृश्यते। तदनेन ललाटदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषः कार्येष्वनुपस्थायित्वं लक्ष्यते। लालाटिकः सेवकः। स्वामिनः कार्येषु नोपतिष्ठत इत्यर्थः। कुक्कुटीशब्देनापि कुक्कुटीपातो लक्ष्यते। देशस्याल्पतया हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्छति, स उच्यते कौक्कुटिक इति॥

तस्य धर्म्यम् ॥ ४७ ॥

तस्येति षष्ठीसमर्थाद् धर्म्यमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। धर्म्यं न्याय्यम्, आचारयुक्तमित्यर्थः। शुल्कशालाया धर्म्यं शौल्कशालिकम्। आकरिकम्। आपणिकम्। गौल्मिकम्॥

अण् महिष्यादिभ्यः ॥ ४८ ॥

महिषीत्येवमादिभ्योऽण् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन् विषये। ठकोऽपवादः। महिष्या धर्म्यं माहिषम्। प्राजावतम्॥ महिषी। प्रजावती। प्रलेपिका। विलेपिका। अनुलेपिका। पुरोहित। मणिपाली। अनुचारक। होतृ। यजमान। महिष्यादिः॥

ऋतोऽञ् ॥ ४९ ॥

ऋकारान्तात् प्रातिपदिकादञ् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन् विषये। ठकोऽपवादः। पोतुर्धर्म्यं पौत्रम्। औद्गात्रम् ॥ नराच्चेति वक्तव्यम्॥ नरस्य धर्म्या नारी ॥ विशसितुरिड्लोपश्च॥ विशसितुर्धर्म्यं वैशस्त्रम् ॥ विभाजयितुर्णिलोपश्च॥ विभाजयितुर्धर्म्यं वैभाजित्रम्॥

अवक्रयः ॥ ५० ॥

तस्येत्येव। षष्ठीसमर्थादवक्रय इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अवक्रीणीतेऽनेनेत्यवक्रयः, पिण्डक उच्यते। शुल्कशालाया अवक्रयः शौल्कशालिकः। आकरिकः। आपणिकः। गौल्मिकः। नन्ववक्रयोऽपि धर्म्यमेव ? नैतदस्ति। लोकपीडया धर्मातिक्रमेणाप्यवक्रयो भवति॥

तदस्य पण्यम् ॥ ५१ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं पण्यं चेत् तद् भवति। अपूपाः पण्यमस्य आपूपिकः। शाष्कुलिकः। मौदकिकः। पण्यमिति विशेषणं तद्धितवृत्तावन्तर्भूतम् , अतः पण्यशब्दो न प्रयुज्यते॥

लवणाट् ठञ् ॥ ५२ ॥

लवणशब्दाट् ठञ् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन् विषये। ठकोऽपवादः। स्वरे विशेषः। लवणं पण्यमस्य लावणिकः॥

किशरादिभ्यः ष्ठन् ॥ ५३ ॥

किशर इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन् विषये। ठकोऽपवादः। किशरादयो गन्धविशेषवचनाः। किशराः पण्यमस्य किशरिकः। किशरिकी। नरदिकः। नरदिकी॥ किशर। नरद। नलद। सुमङ्गल। तगर। गुग्गुलु। उशीर। हरिद्रा। हरिद्रायणी। किशरादिः॥

शलालुनोऽन्यतरस्याम् ॥ ५४ ॥

शलालुशब्दादन्यतरस्यां ष्ठन् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन् विषये। ठकोऽपवादः, पक्षे सोऽपि भवति। शलालुशब्दो गन्धविशेषवचनः। शलालु पण्यमस्य शलालुकः। शलालुकी। शालालुकः। शालालुकी॥

शिल्पम् ॥ ५५ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं शिल्पं चेत् तद् भवति। शिल्पं कौशलम्। मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः। पाणविकः। वैणिकः। मृदङ्गवादने वर्तमानो मृदङ्गशब्दः प्रत्ययमुत्पादयति। शिल्पं तद्धितवृत्तावन्तर्भवति॥

मड्डुकझर्झराद्दणन्यतरस्याम् ॥ ५६ ॥

मड्डुकझर्झरशब्दाभ्यामन्यतरस्यामण् प्रत्ययो भवति तदस्य शिल्पमित्येतस्मिन् विषये। ठकोऽपवादः। पक्षे सोऽपि भवति। मड्डुकवादनं शिल्पमस्य माड्डुकः, माड्डुकिकः। झार्झरः, झार्झरिकः॥

प्रहरणम् ॥ ५७ ॥

तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं प्रहरणं चेत् तद् भवति। असिः प्रहरणमस्य आसिकः। प्रासिकः। चाक्रिकः। धानुष्कः॥

परश्वधाट् ठञ् च ॥ ५८ ॥

परश्वधशब्दाट् ठञ् प्रत्ययो भवति, चकाराट् ठक्। स्वरे विशेषः। परश्वधः प्रहरणमस्य पारश्वधिकः॥

शक्तियष्ट्योरीकक् ॥ ५९ ॥

शक्तियष्टिशब्दाभ्यामीकक् प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन् विषये। ठकोऽपवादः। शक्तिः प्रहरणमस्य शाक्तीकः। याष्टीकः॥

अस्तिनास्तिदिष्टं मतिः ॥ ६० ॥

तदस्येत्येव। तदिति प्रथमासमर्थेभ्योऽस्ति नास्ति दिष्ट इत्येतेभ्यः शब्देभ्योऽस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं मतिश्चेत् तद् भवति। अस्ति मतिरस्य आस्तिकः। नास्ति मतिरस्य नास्तिकः। दैष्टिकः। न च मतिसत्तामात्रे प्रत्यय इष्यते। किं तर्हि ? परलोकोऽस्तीति यस्य मतिरस्ति, स आस्तिकः। तद्विपरीतो नास्तिकः। प्रमाणानुपातिनी यस्य मतिः स दैष्टिकः। तदेतदभिधानशक्तिस्वभावाल् लभ्यते। अस्तिनास्तिशब्दौ निपातौ, वचनसामर्थ्याद् वा आख्यातादू वाक्याच् च प्रत्ययः॥

शीलम् ॥ ६१ ॥

तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं शीलं चेत् तद् भवति। शीलं स्वभावः। अपूपभक्षणं शीलमस्य आपूपिकः। शाष्कुलिकः। मौदकिकः। भक्षणक्रिया तद्विशेषणं च शीलं तद्धितवृत्तावन्तर्भवति॥

---

१ - ' अस्ति ' इति नास्ति है०।

छत्रादिभ्यो णः ॥ ६२ ॥

छत्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो णः प्रत्ययो भवति तदस्य शीलमित्येतस्मिन् विषये। ठकोऽपवादः। छत्रं शीलमस्य छात्रः। छादनादावरणाच्छत्रम्। गुरुकार्येष्वव-हितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः। स्थाशब्दोऽत्र पठ्यते, स चोपसर्गपूर्वोऽत्र गृह्यते—आस्था संस्था अवस्थेति॥ छत्र। बुभुक्षा। शिक्षा। पुरोह। स्था। चुरा। उपस्थान। ऋषि। कर्मन्। विश्वधा। तपस्। सत्य। अनृत। शिबिका। छत्रादिः॥

कर्माध्ययने वृत्तम् ॥ ६३ ॥

तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं कर्म चेद् तद्वृत्तमध्ययनविषयं भवति। एकमन्यदध्ययने कर्म वृत्तमस्य ऐकान्यिकः। द्वैयन्यिकः। त्रैयन्यिकः। एकमन्यदिति विगृह्य 'तद्धितार्थो०' (२.१.५१) इति समासः। ततश्च ठक् प्रत्ययः। अध्ययने कर्म वृत्तमित्येतत् सर्वं तद्धितवृत्तावन्तर्भवति। यस्या- ध्ययनप्रयुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातम्, स उच्यत ऐकान्यिक इति। एवं द्वैयन्यिकः, त्रैयन्यिक इति॥

बह्वच्पूर्वपदाट् ठच् ॥ ६४ ॥

बह्वच् पूर्वपदं यस्य तस्माद् बह्वच्पूर्वपदात् प्रातिपदिकात् ठच् प्रत्ययो भवति तदस्य कर्माध्ययने वृत्तमित्येतस्मिन्नर्थे। ठकोऽपवादः। द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः। त्रयोदशान्यिकः। चतुर्दशान्यिक इति। चतुर्दशापपाठा अस्य जाता इत्यर्थः। उदात्ते कर्तव्ये योऽनुदात्तं करोति, स उच्यतेऽन्यत् त्वं करोषीति॥

हितं भक्षाः ॥ ६५ ॥

तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं हितं चेत् तद् भवति, तच्च भक्षाः। ननु च हितयोगे चतुर्थ्या भवितव्यम्, तत्र कथं षष्ठ्यर्थे प्रत्ययो विधीयते ? एवं तर्हि सामर्थ्याद् विभक्तिविपरिणामो भविष्यति। अपूपभक्षणं हितमस्मै आपूपिकः। शाष्कुलिकः। मौदकिकः। हितार्थक्रिया च तद्धित-वृत्तावन्तर्भवति॥

तदस्मै दीयते नियुक्तम् ॥ ६६ ॥

---

१ - ' यस्याध्ययने नियुक्तस्य ' इति बाल०।

तदिति प्रथमासमर्थाद् अस्मा इति चतुर्थ्यर्थे ठक् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं तच्चेद् दीयते नियुक्तम्। नियोगेनाव्यभिचारेण दीयत इत्यर्थः। अव्यभिचारो नियोगः। अग्रे भोजनमस्मै नियुक्तं दीयत आग्रभोजनिकः। आपूपिकः। शाष्कुलिकः। केचित् तु नियुक्तं नित्यमाहुः। अपूपा नित्यमस्मै दीयन्त आपूपिकः॥

श्राणामांसौदनाट् टिठन् ॥ ६७ ॥

श्राणामांसौदनशब्दाभ्यां टिठन् प्रत्ययो भवति तदस्मै दीयते नियुक्तमित्येतस्मिन्नर्थे। ठकोऽपवादः। इकार उच्चारणार्थः। टकारो ङीबर्थः। श्राणा नियुक्तमस्मै दीयते श्राणिकः। श्राणिकी। मांसौदनिकः। मांसौदनिकी। अथ ठञेव कस्माद् नोक्तः, न ह्यत्र ठञष्टिठनो वा विशेषोऽस्ति ? मांसौदनग्रहणं संघातविगृहीतार्थं केचिदिच्छन्ति। तत्र वृद्ध्यभावो विशेषः। ओदनिकः। ओदनिकी॥

भक्तादणन्यतरस्याम् ॥ ६८ ॥

भक्तशब्दादण् प्रत्ययो भवत्यन्यतरस्यां तदस्मै दीयते नियुक्तमित्येतस्मिन् विषये। ठकोऽपवादः। पक्षे सोऽपि भवति। भक्तमस्मै दीयते नियुक्तं भाक्तः, भाक्तिकः॥

तत्र नियुक्तः ॥ ६९ ॥

तत्रेति सप्तमीसमर्थाद् नियुक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। नियुक्तोऽधिकृतो व्यापारित इत्यर्थः। शुल्कशालायां नियुक्तः शौल्कशालिकः। आकरिकः। आपणिकः। गौल्मिकः। दौवारिकः॥

अगारान्ताट् ठन् ॥ ७० ॥

अगारशब्दान्तात् प्रातिपदिकात् ठन् प्रत्ययो भवति तत्र नियुक्त इत्येतस्मिन् विषये। ठकोऽपवादः। देवागारे नियुक्तो देवागारिकः। कोष्ठागारिकः। भाण्डागारिकः॥

अध्यायिन्यदेशकालात् ॥ ७१ ॥

तत्रेत्येव। सप्तमीसमर्थाददेशवाचिनः प्रातिपदिकादकालवाचिनश्चाध्यायिन्यभिधेये ठक् प्रत्ययो भवति। अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते, तत इदं प्रत्ययविधानम्। श्मशानेऽधीते श्माशानिकः। चातुष्पथिकः। अकालात्—चतुर्दश्यामधीते चातुर्दशिकः। आमावास्यिकः। अदेशकालादिति किम् ? स्रुघ्नेऽधीते। पूर्वाह्णेऽधीते॥

---

१ - ‘ ननु च ’ इति बाल०।

कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥ ७२ ॥

तत्रेत्येव। कठिनशब्दान्तात् सप्तमीसमर्थात् प्रस्तारसंस्थानशब्दाभ्यां च ठक् प्रत्ययो भवति व्यवहरतीत्येतस्मिन्नर्थे। व्यवहारः क्रियातत्त्वम्, यथा लौकिकव्यवहार इति। वंशकठिने व्यवहरति वांशकठिनिकः चक्रचरः। वार्ध्रकठिनिकः। प्रास्तारिकः। सांस्थानिकः॥

निकटे वसति ॥ ७३ ॥

निकटशब्दात् सप्तमीसमर्थाद् वसतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। यस्य शास्त्रतो निकटवासस्तत्रायं विधिः। आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति शास्त्रम्। निकटे वसति नैकटिको भिक्षुः॥

आवसथात् ष्ठल् ॥ ७४ ॥

तत्रेत्येव। आवसथशब्दात् सप्तमीसमर्थाद् वसतीत्येतस्मिन्नर्थे ष्ठल् प्रत्ययो भवति। लकारः स्वरार्थः। षकारो ङीषर्थः। आवसथे वसति आवसथिकः। आवसथिकी। ठकः पूर्णोऽवधिः, अतः परमन्यः प्रत्ययो विधीयते॥

प्राग्घिताद् यत् ॥ ७५ ॥

'तस्मै हितम्' (५.१.५) इति वक्ष्यति। प्रागेतस्माद् हितसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामो यत्प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति—'तद्वहति रथयुगप्रासङ्गम्' (४.४.७६)—रथ्यः। युग्यः। प्रासङ्ग्यः॥

तद् वहति रथयुगप्रासङ्गम् ॥ ७६ ॥

तदिति द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यो वहतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। रथं वहति रथ्यः। युग्यः। प्रासङ्ग्यः। 'रथसीताहलेभ्यो यद्विधौ' (१.१.७२ महाभाष्यवा०) इति तदन्तविध्युपसंख्यानात् परमरथ्य इत्यपि भवति॥

धुरो यड्ढकौ ॥ ७७ ॥

तद् वहतीत्येव। धुर् इत्येतस्माद् द्वितीयासमर्थाद् वहतीत्येतस्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः। धुरं वहतीति धुर्यः। धौरेयः॥

खः सर्वधुरात् ॥ ७८ ॥

तद् वहतीत्येव। सर्वधुराशब्दाद् द्वितीयासमर्थाद् वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति। सर्वधुरां वहति सर्वधुरीणः। स्त्रीलिङ्गे न्याय्ये सर्वधुरादिति प्रातिपदिकमात्रापेक्षो निर्देशः। ख इति योगविभागः कर्तव्य इष्टसंग्रहार्थः। उत्तरधुरीणः। दक्षिणधुरीणः॥

एकधुराल्लुक् च ॥ ७९ ॥

तद् वहतीत्येव। एकधुराशब्दाद् द्वितीयासमर्थाद् वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति, तस्य च लुग् भवति। वचनसामर्थ्यात् पक्षे लुग् विधीयते। एकधुरां वहति एकधुरीणः। एकधुरः॥

शकटादण् ॥ ८० ॥

तद् वहतीत्येव। शकटशब्दाद् द्वितीयासमर्थाद् वहतीत्येतस्मिन्नर्थेऽण् प्रत्ययो भवति। शकटं वहति शाकटो गौः॥

हलसीराट् ठक् ॥ ८१ ॥

तद् वहतीत्येव। हलसीरशब्दाभ्यां द्वितीयासमर्थाभ्यां वहतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। हलं वहति हालिकः। सैरिकः॥

संज्ञायां जन्याः ॥ ८२ ॥

तद् वहतीत्येव। जनीशब्दाद् द्वितीयासमर्थाद् वहतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, समुदायेन चेत् संज्ञा गम्यते। जनीं वहति जन्या, जामातुर्वयस्या। सा हि विहारादिषु जामातृसमीपं प्रापयति। जनी वधूरुच्यते॥

विध्यत्यधनुषा ॥ ८३ ॥

तदिति द्वितीयासमर्थाद् विध्यतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, न चेद् धनुष् करणं भवति। पादौ विध्यन्ति पद्याः शर्कराः। ऊरव्याः कण्टकाः। अधनुषेति किम् ? पादौ विध्यति धनुषा। नन्वसमर्थत्वादनभिधानात् च प्रत्ययो न भवति, नहि धनुषा पद्य इत्युक्ते विवक्षितोऽर्थः प्रतीयते ? एवं तर्हि धनुष्प्रतिषेधेन व्यधनक्रिया विशेष्यते—यस्यां धनुष्करणं न संभाव्यत इति। तेनेह न भवति—चौरं विध्यति, शत्रुं विध्यति देवदत्त इति॥

---

१ - 'सा.....प्रापयति' इति बहुत्र नास्ति।

धनगणं लब्धा ॥ ८४ ॥

तदित्येव। धनगणशब्दाभ्यां द्वितीयासमर्थाभ्यां लब्धेत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। धन्यः। गण्यः। लब्धेति तृन्नन्तम् , तेन द्वितीया समर्था विभक्तिर्युज्यते॥

अन्नाण् णः ॥ ८५ ॥

अन्नशब्दात् तदिति द्वितीयासमर्थात् लब्धेत्येतस्मिन्नर्थे णः प्रत्ययो भवति। अन्नं लब्धा आन्नः॥

वशं गतः ॥ ८६ ॥

वशशब्दात् तदिति द्वितीयासमर्थाद् गत इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। वशं गतो वश्यः। कामप्राप्तो विधेय इत्यर्थः॥

पदमस्मिन् दृश्यम् ॥ ८७ ॥

निर्देशादेव प्रथमा समर्थविभक्तिः। पदशब्दात् प्रथमासमर्थाद् दृश्यार्थोपाधिकादस्मिन्निति सप्तम्यर्थे यत् प्रत्ययो भवति। पदं दृश्यमस्मिन् पद्यः कर्दमः। पद्याः पांसवः। शक्यार्थे कृत्यप्रत्ययः। शक्यते यस्मिन् पदं द्रष्टुं प्रतिमुद्रोत्पादनेन, स पद्यः कर्दमः। कर्दमस्यावस्थोच्यते नातिद्रवो नातिशुष्क इति॥

मूलमस्याबर्हि ॥ ८८ ॥

मूलशब्दात् प्रथमासमर्थादाबर्हीत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत् प्रत्ययो भवति। मूलमेषामाबर्हि मूल्या माषाः। मूल्या मुद्गाः। 'वृहू उद्यमने' (तुदा० ५८), येषां मूलमावृह्यत उत्पाट्यते, ते मूल्याः, सुष्ठु निष्पन्नाः। मूलोत्पाटनेन विना ग्रहीतुं न शक्यन्त इत्यर्थः॥

संज्ञायां धेनुष्या ॥ ८९ ॥

धेनुष्येति निपात्यते संज्ञायां विषये। संज्ञाग्रहणमभिधेयनियमार्थम्। धेनोः षुगा- गमो यश्च प्रत्ययो निपात्यते। अन्तोदात्तोऽपि ह्ययमिष्यते। या धेनुरुत्तमर्णाय ऋण- प्रदानाद् दोहनार्थं दीयते सा धेनुष्या। पीतदुग्धेति यस्याः प्रसिद्धिः। धेनुष्यां भवते ददामि॥

गृहपतिना संयुक्ते ञ्यः ॥ ९० ॥

निर्देशादेव तृतीयासमर्थविभक्तिः। गृहपतिशब्दात् तृतीयासमर्थात् संयुक्त इत्येतस्मिन्नर्थे ञ्यः प्रत्ययो भवति। गृहपतिना संयुक्तो गार्हपत्योऽग्निः। अन्यस्यापि गृहपतिना संयोगोऽस्ति, तत्र संज्ञाधिकारादतिप्रसङ्गनिवृत्तिः॥

नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु॥ ६१ ॥

नावादिभ्योऽष्टभ्यः शब्देभ्योऽष्टस्वेव तार्यादिष्वर्थेषु यथासंख्यं यत् प्रत्ययो भवति। प्रत्ययार्थद्वारेण तृतीयासमर्थविभक्तिर्लभ्यते। नावा तार्यं नाव्यमुदकम्। नाव्या नदी। शक्यार्थे कृत्यः। वयसा तुल्यो वयस्यः सखा। संज्ञाधिकारोऽभिधेयनियमार्थः। तेन वयसा तुल्ये शत्रौ न भवति। धर्मेण प्राप्यं धर्म्यम्। ननु च 'धर्मादनपेते' (४.४.६२) इति वक्ष्यमाणेनैव सिद्धम् ? नैतदस्ति। धर्मं यदनुवर्तते तद् धर्मादनपेतमित्युच्यते। फलं तु धर्मादपेत्यैव, कार्यविरोधित्वाद् धर्मस्य। विषेण वध्यो विष्यः। विषेण वधमर्हतीत्यर्थः। मूलेनानाम्यं मूल्यम्। आनाम्यमभिभवनीयम्। पटादीनामुत्पत्तिकारणं मूलम्, तेन तदभिभूयते शेषीक्रियते। मूल्यं हि सगुणं मूलं करोति। 'पोरदुपधात्' (३.१.६८) इति यति प्राप्त आनाम्यमिति निपातनाद् ण्यत्। मूलेन समो मूल्यः पटः। उपादानेन समानफल इत्यर्थः। सीतया समितं सीत्यं क्षेत्रम्। समितं संगतमित्यर्थः। 'रथसीताहलेभ्यो यद्विधौ' (महाभाष्यवा० १.१.७२) इति तदन्तविधिरपीष्यते। परमसीत्यम्। उत्तमसीत्यम्। द्विसीत्यम्। त्रिसीत्यम्। तुलया संमितं तुल्यम्। संमितं समानं सदृशमित्यर्थः। यथा तुला परिच्छिनत्ति परम्, एवं तदपीति॥

धर्मपथ्यर्थन्यायादनपेते ॥ ६२ ॥

निर्देशादेव पञ्चमी समर्थविभक्तिः। धर्मादिभ्यः पञ्चमीसमर्थेभ्योऽनपेत इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। धर्मादनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम्। संज्ञाधिकारादभिधेयनियमः॥

छन्दसो निर्मिते ॥ ६३ ॥

प्रत्ययार्थसामर्थ्यलभ्या समर्थविभक्तिः। छन्दःशब्दात् तृतीयासमर्थाद् निर्मित इत्ये- तस्मिन्नर्थे यत् प्रत्ययो भवति। निर्मित उत्पादितः। छन्दसा निर्मितश्छन्दस्यः। इच्छया कृत इत्यर्थः। इच्छापर्यायश्छन्दःशब्द इह गृह्यते॥

---

१ - मूल्यमूलशब्दयोर्विपर्यासो मुद्रितेषु । २ - ' छन्दसा ' इत्यधिकं है०।

उरसोऽण् च ॥ ९४ ॥

उरःशब्दात् तृतीयासमर्थाद् निर्मित इत्येतस्मिन्नर्थेऽण् प्रत्ययो भवति, चकाराद् यत् च। उरसा निर्मित औरसः पुत्रः। उरस्यः पुत्रः। संज्ञाधिकारादभिधेयनियमः॥

हृदयस्य प्रियः ॥ ९५ ॥

निर्देशादेव समर्थविभक्तिः। हृदयशब्दात् षष्ठीसमर्थात् प्रिय इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। हृदयस्य प्रियो हृद्यो देशः। हृद्यं वनम्। संज्ञाधिकारादभिधेयनियमः। इह न भवति—हृदयस्य प्रियः पुत्र इति॥

बन्धने चर्षौ ॥ ९६ ॥

हृदयस्येत्येव। बन्धन इति प्रत्ययार्थः। तद्विशेषणमृषिग्रहणम्। बध्यते येन तद् बन्धनम्। हृदयशब्दात् षष्ठीसमर्थाद् बन्धन ऋषावभिधेये यत् प्रत्ययो भवति। ऋषिर्वेदो गृह्यते। हृदयस्य बन्धनमृषिर्हृद्यः। परहृदयं येन बध्यते वशीक्रियते, स वशीकरणमन्त्रो हृद्य इत्युच्यते॥

मतजनहलात् करणजल्पकर्षेषु ॥ ९७ ॥

मतादिभ्यस्त्रिभ्यः शब्देभ्यस्त्रिष्वेव करणादिष्वर्थेषु यथासंख्यं यत् प्रत्ययो भवति। प्रत्ययार्थसामर्थ्याद् लब्धा षष्ठी समर्थविभक्तिः। मतं ज्ञानं तस्य करणं मत्यम्। भावसाधनं वा। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। द्विहल्यः। त्रिहल्यः। कर्षणं कर्षः। भावसाधनं वा॥

तत्र साधुः ॥ ९८ ॥

तत्रेति सप्तमीसमर्थात् साधुरित्येतस्मिन्नर्थे यत् प्रत्ययो भवति। सामसु साधुः सामन्यः। वेमन्यः। कर्मण्यः। शरण्यः। साधुरिह प्रवीणो योग्यो वा गृह्यते, नोपकारकः। तत्र हि परत्वात् 'तस्मै हितम्' (५.१.५) इत्यनेन विधिना भवितव्यम्॥

प्रतिजनादिभ्यः खञ् ॥ ९९ ॥

प्रतिजनादिभ्यः शब्देभ्यः खञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्नर्थे। यतोऽपवादः। प्रतिजने साधुः प्रातिजनीनः। जनेजने साधुरित्यर्थः। ऐदंयुगीनः। सांयुगीनः॥ प्रतिजन। इदंयुग। संयुग। समयुग। परयुग। परकुल। परस्यकुल। अमुष्यकुल। सर्वजन। विश्वजन। पञ्चजन। महाजन। प्रतिजनादिः। यत्र हितार्थ एव साध्वर्थस्तत्र वचनात् प्राक्क्रीतीया बाध्यन्ते॥

भक्ताण् णः ॥ १०० ॥

भक्तशब्दाद् णः प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। भक्ते साधुर्भाक्तः शालिः। भाक्तास्तण्डुलाः॥

परिषदो ण्यः ॥ १०१ ॥

परिषच्छब्दाद् ण्यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। परिषदि साधुः पारिषद्यः। णप्रत्ययोऽप्यत्रेष्यते। तदर्थं योगविभागः क्रियते। परिषदो णो भवति। परिषदि साधुः पारिषदः। ततो ण्यः। परिषद इत्येव॥

कथादिभ्यष्ठक् ॥ १०२ ॥

कथादिभ्यः शब्देभ्यष्ठक् प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। कथायां साधुः काथिकः। वैकथिकः॥ कथा। विकथा। वितण्डा। कुष्टचित्। जनवाद। जनेवाद। वृत्ति। सद्गृह। गुण। गण। आयुर्वेद। कथादिः॥

गुडादिभ्यष्ठञ् ॥ १०३ ॥

गुडादिभ्यः शब्देभ्यष्ठञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। गुडे साधुर्गौडिक इक्षुः। कौल्माषिको मुद्गः। साक्तुको यवः॥ गुड। कुल्माष। सक्तु। अपूप। मांसौदन। इक्षु। वेणु। संग्राम। संघात। प्रवास। निवास। उपवास। गुडादिः॥

पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ १०४ ॥

पथ्यादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। पथि साधु पाथेयम्। आतिथेयम्। वासतेयम्। स्वापतेयम्॥

सभाया यः ॥ १०५ ॥

सभाशब्दाद् यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये। यतोऽपवादः। स्वरे विशेषः। सभायां साधुः सभ्यः॥

ढश्छन्दसि ॥ १०६ ॥

सभाशब्दाद् ढः प्रत्ययो भवति तत्र साधुरित्येतस्मिन् विषये छन्दसि। यस्यापवादः। स१भेयो युवास्य१ यजमानस्य वीरो जायताम् (मा० सं० २२.२२)॥

समानतीर्थे वासी ॥ १०७ ॥

साधुरिति निवृत्तम्। वासीति प्रत्ययार्थः। समानतीर्थशब्दात् तत्रेति सप्तमीसमर्थाद् वासीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। समाने तीर्थे वासीति सतीर्थ्यः। समानोपाध्याय इत्यर्थः। तीर्थशब्देनेह गुरुरुच्यते॥

समानोदरे शयित ओ चोदात्तः ॥ १०८ ॥

समानोदरशब्दात् सप्तमीसमर्थात् शयित इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, ओकारश्चोदात्तः। शयितः स्थित इत्यर्थः। समानोदरे शयितः समानोदर्यो भ्राता॥

सोदराद् यः ॥ १०९ ॥

सोदरशब्दात् सप्तमीसमर्थात् शयित इत्येतस्मिन्नर्थे यः प्रत्ययो भवति। 'विभाषोदरे' (६.३.८८) इति सूत्रेण यकारादौ प्रत्यये विवक्षिते प्रागेव समानस्य सभावः[1]। समानोदरे शयितः सोदर्यो भ्राता। ओ चोदात्तः (४.४.१०८) इति नानुवर्तते। यकारे स्वरः॥

भवे छन्दसि ॥ ११० ॥

तत्रेत्येव। सप्तमीसमर्थाद् भव इत्येतस्मिन्नर्थे छन्दसि विषये यत् प्रत्ययो भवति। अणादीनां घादीनां चापवादः। सति दर्शने तेऽपि भवन्ति सर्वविधीनां छन्दसि व्यभिचारात्। नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒ नमः॑ (तै० सं० ४.५.७.२)। आ पादपरिसमाप्तेश्छन्दोऽधिकारः, भवाधिकारश्च 'समुद्राभ्राद् घः' (४.४.११८) इति यावत्॥

पाथोनदीभ्यां ड्यण् ॥ १११ ॥

पाथःशब्दाद् नदीशब्दात् च ड्यण् प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे। यतोऽपवादः। पाथसि भवः पा॒थ्यो वृषा॒ (ऋ० ६.१६.१५)। चनो॑ दधीत ना॒द्यो गिरो॑ मे (ऋ० २.३५.१)। पाथोऽन्तरिक्षम्॥

वेशन्तहिमवद्भ्यामण् ॥ ११२ ॥

वेशन्तशब्दाद् हिमवच्छब्दात् चाण् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। यतोऽपवादः। वैश॒न्तीभ्य॒ः स्वाहा॑ (तै० सं० ७.४.१३.६)। हैमव॒तीभ्य॒ः स्वाहा॑ (तु०—शौ० सं० १६.२.१)॥

---

१ - ' समानस्य सभावस्तीर्थे यः ' इत्यपि क्वचित्।

स्रोतसो विभाषा ङ्यङ्ङ्यौ ॥ ११३ ॥

स्रोतस्शब्दाद् विभाषा ङ्यत् ङ्य इत्येतौ प्रत्ययौ भवतस्तत्र भव इत्येतस्मिन् विषये। यतोऽपवादः। पक्षे सोऽपि भवति। स्रोतसि भवः स्रौत्यः (ऋ० १०.१०४.८)। स्रौंत१स्यः (शौ० सं० १६.२.४)। ङ्यङ्ङ्ययोः स्वरे विशेषः॥

सगर्भसयूथसनुताद् यन् ॥ ११४ ॥

सगर्भसयूथसनुतशब्देभ्यो यन् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। यतोऽपवादः। स्वरे विशेषः। अनु भ्राता सग१र्भ्य१ः (मा० सं० ४.२०)। अनु सखा सयूंथ्यः (तै० सं० १.२.४.२)। यो न१ः सनुंत्यः (ऋ० २.३०.६)। सर्वत्र 'समानस्य छन्दस्य०' (६.३.८४) इति सभावः॥

तुग्राद् घन् ॥ ११५ ॥

तुग्रशब्दाद् घन् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। यतोऽपवादः। त्वमग्ने वृषभस्तुग्रियाणाम्। अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्दः॥

अग्राद् यत् ॥ ११६ ॥

अग्रशब्दाद् यत् प्रत्ययो भवति तत्र भव इत्येतस्मिन् विषये। अग्रे भवम् अग्र्यंम् (मा० सं० १६.३०)। किमर्थमिदं यावता सामान्येन यद् विहित एव ? 'घच्छौ च' (४.४.११७) इति वक्ष्यति, ताभ्यां बाधा मा भूदिति पुनर्विधीयते॥

घच्छौ च ॥ ११७ ॥

अग्रशब्दाद् यत् घच्छौ च प्रत्यया भवन्ति तत्र भव इत्येतस्मिन् विषये। अग्र्यं म् (ख० १.३.७)। अग्रियम् (ऋ० १.१३.१०)। अग्रीयम् (मै० सं० २.७.१३)। चकारः 'तुग्राद् घन्' (४.४.११५) इत्यस्यानुकर्षणार्थः। अग्रियम्। स्वरे विशेषः॥

समुद्राभ्राद् घः ॥ ११८ ॥

समुद्रशब्दादभ्रशब्दात् च घः प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे। यतोऽपवादः। समुद्रियां न१दीनाम् (ऋ० ७.८७.१)। अ१भ्रियस्येव१ घोषाः (ऋ० १०.६८.१)। अभ्रशब्दस्यापूर्वनिपातः, तस्य लक्षणस्य व्यभिचारित्वात्॥

---

१ - ' अग्न्याकाश० ' इति पाठान्तरम्।

बर्हिषि दत्तम् ॥ ११९ ॥

भव इति निवृत्तम्। बर्हिःशब्दात् सप्तमीसमर्थाद् दत्तमित्येतस्मिन्नर्थे यत् प्रत्ययो भवति। बर्ह्यिष्येषु निधिषु प्रियेषु (ऋ० १०.१५.५)॥

दूतस्य भागकर्मणी ॥ १२० ॥

निर्देशादेव समर्थविभक्तिः। दूतशब्दात् षष्ठीसमर्थाद् भागे कर्मणि चाभिधेये यत् प्रत्ययो भवति। भागोंऽशः। कर्म क्रिया। यदग्नेः यासिं दूत्यम् (ऋ० १.१२.४)। दूतभागः, दूतकर्म वा॥

रक्षोयातूनां हननी ॥ १२१ ॥

निर्देशादेव समर्थविभक्तिः। रक्षःशब्दाद् यातुशब्दात् च षष्ठीसमर्थाद् हननीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। हन्यतेऽनयेति हननी। यां वां मित्रावरुणौ रक्षस्या तनूः (मै० सं० २.३.१)। रक्षसां हननी। यातव्या (मै० सं० २.३.१)। यातूनां हननी। बहुवचनं स्तुतिवैशिष्ट्यज्ञापनार्थम्। बहूनां रक्षसां हननेन तनूः स्तूयते॥

रेवतीजगतीहविष्याभ्यः प्रशस्ये ॥ १२२ ॥

रेवत्यादिभ्यः षष्ठीसमर्थेभ्यः प्रशस्ये वाच्ये यत् प्रत्ययो भवति। प्रशंसनं प्रशस्यम्। भावे क्यप् प्रत्ययो भवति। यद्वो रेवती रेवत्यम् (काठ० सं० १.८)। यद्वो जगतीर्जगत्यम् (काठ० सं० १.८)। यद्वो हविष्या हविष्यम् (काठ० सं० १.८)। हविषे हिता हविष्याः, तासां प्रशंसनं हविष्यम्। 'यस्येति च' (६.४.१४८) इति लोपे कृते 'हलो यमां यमि लोपः' (८.४.६४) इति लोपः॥

असुरस्य स्वम् ॥ १२३ ॥

असुरशब्दात् षष्ठीसमर्थात् स्वमित्येतस्मिन्नर्थे यत् प्रत्ययो भवति। अणोऽपवादः। असुर्यं वां एतत्पात्रं यत् कुलालकृतम् चक्रवृत्तम् (मै० सं० १.८.३)॥

मायायामण् ॥ १२४ ॥

असुरशब्दात् षष्ठीसमर्थाद् मायायां स्वविशेषेऽण् प्रत्ययो भवति। पूर्वस्य यतोऽपवादः। आसुरी माया स्वधया कृतासिं (मा० सं० ११.६९)॥

तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ॥ १२५ ॥

तद्वानिति निर्देशादेव समर्थविभक्तिः। मतुबन्तात् प्रातिपदिकात् प्रथमासमर्थादा-सामिति षष्ठ्यर्थे यत् प्रत्ययो भवति, यत् प्रथमासमर्थमुपधानो मन्त्रश्चेत् स भवति, यत् तदासामिति निर्दिष्टमिष्टकाश्चेत् ता भवन्ति। लुक् च मतोरिति प्रकृतिनिर्ह्रासः। इतिकरणस्ततश्चेद् विवक्षा। तद्वानित्यवयवेन समुदायो निर्दिश्यते। वर्चः शब्दो यस्मिन् मन्त्रेऽस्ति, स वर्चस्वान्। उपधीयते येन स उपधानः। चयनवचन इत्यर्थः। वर्चस्वानुपधान- मन्त्र आसामिष्टकानामिति विगृह्य यति विहिते मतोर्लुकि कृते व॒र्च॒स्या (तै० ब्रा० १.८.६.१) उपदधाति। ते॒ज॒स्या (तै० ब्रा० १.८.६.१) उपदधाति। पय॒स्याः (तै० सं० २.३.१३.२)। रेतस्याः (ष० विं० २.१)। तद्वानिति किम्? मन्त्रसमुदायादेव मा भूत्। उपधान इति किम्? वर्चस्वानुपस्थानमन्त्र आसामित्यत्र मा भूत्। मन्त्र इति किम्? अङ्गुलिमानुपधानो हस्त आसामित्यत्र मा भूत्। इष्टकास्विति किम्? वर्चस्वान् उपधानमन्त्र एषां कपालानामित्यत्र मा भूत्। इतिकरणो नियमार्थः। अनेकपदसंभवेऽपि केनचिदेव पदेन तद्वान् मन्त्रो गृह्यते, न सर्वेण॥

अश्विमानण् ॥ १२६ ॥

अश्विशब्दो यस्मिन् मन्त्रेऽस्ति सोऽश्विमान्। अश्विमच्छब्दादण् प्रत्ययो भवति। पूर्वस्य यतोऽपवादः। अश्विमानुपधानो मन्त्र आसामिष्टकानामिति विगृह्याण् विधीयते, तत्र मतुपो लुकि कृत 'इनण्यनपत्ये' (६.४.१६४) इति प्रकृतिभावः। आश्विनी॒रुपदधा॒ति (श० ब्रा० ८.२.१.१)॥

वयस्यासु मूर्ध्नो मतुप् ॥ १२७ ॥

वयस्वानुपधानो मन्त्रो यासां ता वयस्याः, तास्वभिधेयासु मूर्ध्नो मतुप् प्रत्ययो भवति। पूर्वस्य यतोऽपवादः। यस्मिन् मन्त्रे वयःशब्दो मूर्धन्शब्दश्च विद्यते, स वयस्वानपि भवति मूर्धन्वानपि। यथा—मू॒र्धा वय॑ः प्र॒जाप॑ति॒श्छन्दः॑ (मा० सं० १४.६) इति। तत्र वयस्वच्छब्दादिव मूर्धन्वच्छब्दादपि यति प्राप्ते मतुब् विधीयते। मूर्ध॒न्वतीं॑ र्भवन्ति (तै० सं० ५.३.८.२)। वयस्या एव मूर्धन्वत्यः। वयस्यास्विति किम्? यत्र मूर्धन्शब्द एव केवलो न वयःशब्दस्तत्र मा भूत्। मूर्धन्वत इति वक्तव्ये मूर्ध्न इत्युक्तम्, मतुपो लुकं भाविनं चित्ते कृत्वा॥

---

१ - 'वर्चस्वान् ..... मित्यत्र' इति युक्तोऽपि पाठः टिप्पण्यां प्रदर्शितः है०। मुद्रितेषु 'अङ्गुलि .. ....मित्यत्र' इति पूर्वप्रत्युदाहरणमेवानुमुद्रितम्।

२ - 'विधास्यते' इति है०। 'विधायते' इति बाल०।

मत्वर्थे मासतन्वोः ॥ १२८ ॥

यस्मिन्नर्थे मतुब् विहितः, तस्मिंश्छन्दसि विषये यत् प्रत्ययो भवति मासतन्वोः प्रत्ययार्थविशेषणयोः। प्रथमासमर्थादस्त्युपाधिकात् षष्ठ्यर्थे सप्तम्यर्थे च यत् प्रत्ययो भवति। मत्वर्थीयानामपवादः। नभांसि विद्यन्ते यस्मिन् मासे नभ१स्यः (तै० सं० १.४.१४.१) मासः। सह१स्यः (तै० सं० १.४.१४.१)। तप१स्यः (तै० सं० १.४.१४.१)। मध१व्यः (तै० सं० ५.२.६.३)। नभःशब्दोऽभ्रेषु वर्तते। तन्वां खल्वपि—ओजोऽस्यां विद्यत ओज१स्या त१नूः। रक्ष१स्या त१नूः (मै० सं० २.३.१)। मासतन्वोरिति किम् ? मधुमता पात्रेण चरति। मासतन्वोरनन्तरार्थे च। मध्वस्मिन्नस्ति मध्वस्मिन्ननन्तरमिति वा मधव्यो मासः ॥ लुगकारेकाररेफाश्च वक्तव्याः॥ लुक्तावत्—तपश्च तप१स्यश्च१ (तै० सं० १.४.१४.१)। नभश्च नभ१स्यश्च१ (तै० सं० १.४.१४.१)। सहश्च सह१स्यश्च१ (तै० सं० १.४.१४.१)। नपुंसकलिङ्गं छान्दसत्वात्। अकारः—इ१षः (तै० सं० १.४.१४.१) मासः । ऊ१र्जः (तै० सं० १.४.१४.१) मासः। इकारः—शुचिः (तै० सं० १.४.१४.१) मासः। रेफः—शुक्रः (तै० सं० १.४.१४.१) मासः॥

मधोर्ञ च ॥ १२९ ॥

मधुशब्दाद् मत्वर्थे ञः प्रत्ययो भवति चकाराद् यत् च। उपसंख्यानात् लुक् च। माधवः (तै० सं० १.४.१४.१)। मध१व्यः (तै० सं० ५.२.६.३)। मधुः (तै० सं० १.४.१४.१)। तन्वां खल्वपि—माधवा, मधव्या, मधुः तनूः॥

ओजसोऽहनि यत्खौ ॥ १३० ॥

मत्वर्थ इत्येव। ओजःशब्दाद् मत्वर्थे यत्खौ प्रत्ययौ भवतोऽहन्यभिधेये। ओजस्यमहः। ओजसीनमहः॥

वेशोयशआदेर्भगाद् यल् ॥ १३१ ॥

मत्वर्थ इत्येव। वेशोयशसी आदौ यस्य प्रातिपदिकस्य तस्माद् वेशोयशआदेर्भगान्तात् प्रातिपदिकाद् मत्वर्थे यल् प्रत्ययो भवति। लकारः स्वरार्थः। वेशोभगो विद्यते यस्य स वेशोभग्यः। यशोभग्यः। वेश इति बलमुच्यते। श्रीकामप्रयत्नमाहात्म्यवीर्ययशस्सु भगशब्दः। वेशश्चासौ भगश्च श्रीप्रभृतिर्वेशोभगः, सोऽस्यास्तीति वेशोभग्यः॥

ख च ॥ १३२ ॥

वेशोयशआदेर्भगान्तात् प्रातिपदिकाद् मत्वर्थे खः प्रत्ययो भवति। योगविभागो

यथासंख्यनिरासार्थ उत्तरार्थश्च। चकारादू यत्। वेशोभगीनः। वेशोभग्यः। यशोभगीनः। यशोभग्यः॥

पूर्वैः कृतमिनयौ च ॥ १३३ ॥

मत्वर्थ इति निवृत्तम्। निर्देशादेव समर्थविभक्तिः। पूर्वशब्दात् तृतीयासमर्थात् कृतमित्येतस्मिन्नर्थ इन य इत्येतौ प्रत्ययौ भवतः। चकारात् ख च। गम्भीरेभिः पथिभिः पूर्विणेभिः (काठ० सं० ६.६.१६)। पूर्व्यैः (तै० सं० १.८.५.२)। पूर्वीणैः। पूर्वैरिति बहुवचनान्तेन पूर्वपुरुषा उच्यन्ते। तत्कृताः पन्थानः प्रशस्ता इति पथां प्रशंसा॥

अद्भिः संस्कृतम् ॥ १३४ ॥

निर्देशादेव समर्थविभक्तिः। अप्शब्दात् तृतीयासमर्थात् संस्कृतमित्येतस्मिन्नर्थे यत् प्रत्ययो भवति। यस्येदमप्यं हविः (ऋ० १०.८६.१२)। अद्भिः संस्कृतमिति॥

सहस्रेण संमितौ घः ॥ १३५ ॥

निर्देशादेव समर्थविभक्तिः। सहस्रशब्दात् तृतीयासमर्थात् सम्मितावित्येतस्मिन्नर्थे घः प्रत्ययो भवति। सम्मितस्तुल्यः सदृशः। अयमग्निः सहस्रियः (तै० सं० ४.७.१३.४)। सहस्रतुल्य इत्यर्थः। केचित्तु समितावेति पठन्ति। तत्रापि समित्या सम्मित एव लक्षयितव्यः। तत्र छन्दसि प्रयोगदर्शनात्॥

मतौ च ॥ १३६ ॥

मत्वर्थे च सहस्रशब्दाद् घः प्रत्ययो भवति। सहस्रमस्य विद्यते सहस्रियः। 'तपःसहस्राभ्यां विनीनी' (५.२.१०२), 'अण् च' (५.२.१०३) इत्यस्यापवादः॥

सोममर्हति यः ॥ १३७ ॥

निर्देशादेव समर्थविभक्तिः। सोमशब्दाद् द्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थे यः प्रत्ययो भवति। सोममर्हन्ति सोम्या ब्राह्मणाः (काठ० सं० ५.२)। यज्ञार्हा इत्यर्थः। यति प्रकृते यग्रहणम्। स्वरे विशेषः॥

मये च ॥ १३८ ॥

सोमग्रहणम्, यश्चानुवर्तते। मय इति मयडर्थो लक्ष्यते। सोमशब्दाद् मयडर्थे

---

१ - 'ब्राह्मणास्सोम्याः' इति संहितापाठः।

यः प्रत्ययो भवति। आगतविकारावयवप्रकृता मयडर्थाः। 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' (४.३.८१), 'मयट् च' (४.३.८२), 'मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः' (४.३.१४३), 'तत्प्रकृतवचने मयट्' (५.४.२१) इति। तत्र यथायोगं समर्थविभक्तिः। पिबंति सोम्यं मधु (ऋ० ८.२४.१३)। सोममयमित्यर्थः॥

मधोः ॥ १३९ ॥

यशब्दो निवृत्तः। मधुशब्दाद् मयडर्थे यत् प्रत्ययो भवति। मधव्यान् स्तोकान् (पै० सं० १.८८.२)। मधुमयानित्यर्थः॥

वसोः समूहे च ॥ १४० ॥

वसुशब्दात् समूहे वाच्ये यत् प्रत्ययो भवति चकारात् मयडर्थे च। यथायोगं समर्थविभक्तिः। वसव्यः समूहः। मयडर्थो वा ॥ अक्षरसमूहे छन्दसः स्वार्थ उपसंख्यानम्॥ ओंश्रावय इंति चतुरक्षरम्। अस्तु श्रौंष१डिंति१ चतुरक्षरम्। यंज इंति द्व्यक्षरम्। यें यंजामहें इंति१ पञ्चाक्ष१रम्। द्व्यक्षरो व१षट्कारः। ए१षं वैं सप्तदशाक्षरश्छन्दस्यः प्र१जा१पतिर्यज्ञो मन्त्रे विहितः (मै० सं० १.४.११)। सप्तदशाक्षराण्येव छन्दस्य इत्यर्थः। छन्दःशब्दादक्षरसमूहे वर्तमानात् स्वार्थे यत् प्रत्ययः ॥ वसुशब्दादपि यद् वक्तव्यः॥ हस्तौ पृणस्व ब१हुभिर्व१सव्यैः (शौ० सं० ७.२६.८)। वसुभिरित्यर्थः। अ१ग्निरीशे वस१व्यस्य (ऋ० ४.५५.८)। वसोरित्यर्थः॥

नक्षत्राद् घः ॥ १४१ ॥

नक्षत्रशब्दाद् घः प्रत्ययो भवति स्वार्थे। समूह इति नानुवर्तते। नक्ष१त्रियेभ्यः स्वाहा (मा० सं० २२.२८)॥

सर्वदेवात् तातिल् ॥ १४२ ॥

सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति छन्दसि विषये स्वार्थिकः। स१र्वतातिम् (ऋ० १०.३६.१४)। दे१वतातिम् (ऋ० ३.१९.२)॥

शिवशमरिष्टस्य करे ॥ १४३ ॥

करोतीति करः प्रत्ययार्थः। तत्सामर्थ्यलभ्या षष्ठी समर्थविभक्तिः। शिवादिभ्यः

---

१ - पाठभेदेनोपलभ्यते। (अपि द्र० — तै० सं० १.६.११.१)।

शब्देभ्यः षष्ठीसमर्थेभ्यः कर इत्येतस्मिन्नर्थे तातिल् प्रत्ययो भवति। शिवं करोतीति शिवतातिः (पै० सं० ५.३६.१)। शंतातिः (ऋ० ८.१८.७)। अरिष्टतातिः (ऋ० १०.६०.८)॥

भावे च ॥ १४४ ॥

भावे चार्थे छन्दसि विषये शिवादिभ्यस्तातिल् प्रत्ययो भवति। शिवस्य भावः शिवतातिः (पै० सं० ५.३६.१)। शंतातिः (ऋ० ८.१८.७)। अरिष्टतातिः (ऋ० १०.६०.८)। यतः पूर्णोऽवधिः। अतः परमन्यः प्रत्ययोऽधिक्रियते॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः॥

— o —